CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

B-1

* श्रीरस्तु *

श्रीमद्वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिता

जगद्गुरुब्रह्मर्षिगोकुलचन्द्रविरचितमंगलभाष्यसहिताभाष्यभूमिकादियुताच

मङ्गलम् भगवान् विष्णुः मङ्गलम् गरुडध्वजः

मङ्गलम् पुरुडरीकाक्षः मङ्गलायतनो हरिः

चतुर्थाध्यायपर्यन्तः प्रथमोभागः । पुस्तक प्राप्तिस्थानं । मु० व डाक घर बुद्धाकर्ण

पं० हरिकृष्ण

जि० अमृतसर (पञ्जाब)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वेऽधिकाराः प्रख्यापकस्य (पवलिशर) पण्डित हरिकृष्णस्य सुरक्षिताः

* ॐ नमोवेदपुरुषाय *

श्री मद्वाजसनेयिमाध्यन्दिन-

शुक्लयजुर्वेदसंहिता

श्रीमद्पूज्यचरण जगद्गुरु ब्रह्मर्षिगोकुलचंद्रसूरिविरचित-

मङ्गलभाष्यसहिता तथा च शुक्लयजुर्वेदमङ्गलभाष्यभूमिकया

युता संध्यास्तुतिमन्त्रभाष्यसमलंकृता च

चतुर्थाध्यायपर्यन्तः प्रथमो भागः

पुस्तकप्राप्त्यर्थं स्मर्तव्योऽयं जनैः

प्रख्यापकः (पवलिशर) एवं लिपिकर्ता एषामेवाचार्यवराणां शिष्यः कविराजः

पण्डित हरिकृष्णः अमृतसरमण्डलान्तर्गत बुट्टरकलांग्रामवासी

पंचनद प्रदेशस्थः । शंभवतु ।

प्रथमवारस्यैकं सहस्रम्]श्रावणपूर्णिमाविक्रमसंवत् २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुक्लयजुर्वेदमङ्गलभाष्यभूमिकादीनाँ सूचीपत्रम्

संख्या	विषयाः	पृष्ठ
१.	श्रीवैष्णवाचार्य्य श्रीरामदासस्वामिनामभिनन्दनम् ।	
२.	मङ्गलभाष्यसोपानम् ।	
३.	शुक्लयजुर्वेदमङ्गलभाष्यकर्तृणां भाष्यभूमिकाकर्तृणां तथा संध्याभाष्यकर्तृणां श्रीगोकुलचन्द्रसूरीणां संक्षिप्तो जीवनपरिचयः ।	१
४.	पिण्डोरीधाम्नि भागवतेमन्दिरे रामनवम्यां श्रीमदाचार्यैः श्रीगोकुलचन्द्रमहर्षिभिर्विरचितम् पठितम् च रामस्तवनम् ।	
५.	चित्रं श्रीगोकुलचन्द्रसूरीणां शिष्यसहितं च ।	
६.	शुक्लयजुर्वेदभाष्यभूमिका ।	
७.	सभाष्याः सन्ध्यास्तुतिमन्त्राः ।	१०

* श्रीः *

शुक्लयजुर्वेदवाजसनेयिमाध्यन्दिनसंहिताध्यायविषयनिरूपणम्

अध्यायः	विषयाः	पृष्ठम्
१.	दर्शपूर्णमासेष्टिविषया मन्त्राः	२७
२.	दर्शपूर्णमासमन्त्राः	४२
३.	आधानाग्न्युपस्थानचातुर्मास्यादिमन्त्राः	५५
४.	अग्निष्टोमे सर्त्विग्यजमानस्य शालाप्रवेशमारभ्य क्रीतसोमस्य शालाप्रवेशान्तमन्त्राः	७७

पञ्च-नद प्रेस सीतला मँदिर अमृतसर में छपा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीपिण्डोरीधामाधीश्वराणां

श्रीमतां विप्रधेनुसेवकानां

श्रीयज्ञपुरुषसंकीर्त्तनधन्यजीवनानां

श्री ११०८ श्रीरामदासनामवतां वयं धन्यवादान् ब्रूमः । येषां परमोत्साहेन सभूमिकायाः मङ्गलभाष्योपेतायाः शुक्लयजुःसंहितायाः सन्ध्यास्तुतीमुद्रणे च समर्था जाताः ॥

तेषा चरणकमलेषु अस्माकं प्रणामाञ्जलयो विलसन्तु । शंभवतु ॥

निवेदकः

श्रीमङ्गलभाष्यविरचयितृणां सुद्गलशाखिनां श्रीपूज्यपादाचार्य्यब्रह्मर्षिगोकुलचन्द्रसूरीणां शिष्यः पण्डितहरिकृष्णः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मंगलभाष्यसोपानम्

अव्यक्ताव्यक्तप्रबोधप्रवराः, श्रुतिस्मृतिसारविज्ञातारः, धर्मशास्त्रनिष्णातमतयः, ज्ञानतपःपूताः आत्मवश्याः, व्यवसायात्मिकबुद्धयः, सत्याश्रिताः, शान्ताः, विद्वांसः जानन्तु। यतो मङ्गलभाष्यं ज्ञात्वेदं विधीयते।

श्रीमन्महीधरकृतवेददीपाख्यभाष्येमांसासवविधानं विहितं। तथा च श्रीमदुवटाचार्यैरपि मांसादिविषयनिवारणं न कृतं। आधुनिकैः विद्वद्भिरपि न लेखनी उत्थापिता तत्तद्दोषनिवारणायाश्चर्यकरं दुःखप्रदं चेदमिति।

एवं सच्छास्त्रवेत्तारः परिष्कृतबुद्धयः जानन्त्येव यत्सदाचारविगर्हितं मांसादियज्ञं नहि केवलमपि तु नरकप्रदं पापमूलकमधार्मिकं चेति।

सर्वागमानामाचारः प्रथमं परिकल्पते।
आचारः प्रथमो धर्मो धर्मस्य प्रभुरच्युतः॥ वेद व्यासः—

विश्वधर्मग्रन्थशिरोमणयः वेदास्तत्रात्मज्ञानं देवस्तवनं परब्रह्मणस्तद्विभूतीनां च प्रशंसनं प्राधान्यतो विद्यते, तत्र तत्र मन्त्रेषु अश्लीलप्रवचनं तथा मांसमद्यादिप्रवर्त्तनं चासुरैरेव प्रवर्तितं न पुनः अमरपुत्रैः ऋषिभिर्वा सँमानितमिति।

अयमेवार्थः श्रीमदाचार्यैः श्रीऋषिभिरस्मद्गुरुवर्यैः मङ्गलभाष्ये भूमिकायां च दर्शितः शुद्धः प्रस्फुटश्चेति।

मङ्गलभाष्ये कति यजूंषि मन्त्राश्च तत्तच्छब्दार्थवन्तो निदर्शिताः यद्यच्छब्दार्थाः वेददीपे उवटाचार्यभाष्ये वा दृश्यन्ते। नात्र दोषः शुद्धसमीक्षणमेवात्र प्रयोजनमिति।

आधुनिकसमयात् द्विसहस्रवर्षपूर्वं भाष्यं शुक्लयजुर्वेदस्य नोपलभ्यते। ये च भाष्यरूपाः ब्राह्मणग्रन्थाः यानि च धर्मसूत्राणि दृश्यन्ते। तेऽपि पुनः पशुयज्ञादिकमनाचारं कुत्रचित् दर्शयन्ति। तदनन्तरं शुक्लयजुर्वेदस्य पशुयज्ञाद्यनाचारार्थरहितं भाष्यं न कृतं केनापि। श्रीमहीधराचार्योवटाचार्याभ्यांमपि शुक्लयजुर्वेदस्य भाष्ये अश्लीलभाषणं पशुयज्ञसहितं च व्याख्यानं कृतमिति।

अस्मत्समयात् पूर्वं द्विशतवर्षेष्वपि बहवः पण्डिताः भारतेऽभूवन्। तैरपि लोकैषणायां धनैषणायां वा परस्परं कलहवादेन जपयज्ञैर्वा प्रवादशीलैः प्रभूतदक्षिणेच्छुभिश्च समयः व्यतिक्रान्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गतवर्षे २०१३ वैक्रमेऽब्दे श्रीमदाचार्य्यवराः अष्टोत्तरनवतितमेवर्षेप्राप्तेऽन्त्रवृद्धिरोगेण पीडिता आसन् । तत्पुनः गुरुदासपुरस्थे (सिविल हस्पताल) राजकीयमहौषधालये शल्यतन्त्रविचक्षणैः पाश्चात्यवैद्यैः शल्यक्रिया कृता । एषां चिकित्सायां पूज्यवरैः श्रीवैष्णवाचार्य्यैः ११०८ श्रीरामदासमहानुभावैः पञ्चशताधिकरूप्यकाः राजकीयातुरालयाध्यक्षेभ्यः विशिष्टातुरगृहवेतनादिव्ययेषु प्रदत्ताश्च । एवं शरीररक्षाकृता । यतोऽस्माकं श्रीमद्गुरुवर्याः मङ्गलभाष्यकर्त्तारः पुनः भाष्यकरणे समर्थाः बभूवुः । पौनः पुन्येन वयं पिण्डोरीधामाधीश्वराणां धन्यवादान् प्रवक्ष्यामः ।

अत्यन्तनैर्बल्येन रोगजनितेन तथा वृद्धावस्थाजनितेन च कष्टेन हि भाष्यकरणे समर्था बभूवुः । इदानीं शुक्लयजुर्वेदस्यैकादशाध्यायपर्यन्तं भाष्यं संवृत्तं । चतुर्थाध्यायपर्यन्तं मुद्रणालये दत्तम । भगवत्प्रसादतः पुनरग्रेऽपि मुद्रितं कारयिष्यामः ।

प्रथमप्रयासोऽस्माकमिति--लेखनीप्रमादाद् तथा मुद्रितलिपिनिरीक्षणे दृष्टिप्रमादात् तथा बुद्धिप्रमादात् कुत्रचित स्वरवर्णशब्दविभक्त्यादीनां भ्रंशता भवेत-करुणावरुणालयैः विद्वद्भिर्निरीक्ष्य विज्ञापनीयेयमिति ।

निवेदकः
विदुषामनुचरः
ब्राह्मणचरणकृपाकांक्षी
पं० हरिकृष्णः बुट्टरकलां
ग्रामवासी अमृतसरमण्डलीयः
पञ्चनदप्रदेशीयः

समयानुक्रमः

श्रावणी पूर्णिमा — २९ अगस्त
भृगुवासरः — खिष्टाब्दः १९५८
वैक्रमाब्दः २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमदाचार्य्यवराणां संक्षिप्तो जीवनपरिचयः

आधुनिकसमयात् पूर्वं खलु शताधिकानि संवत्सराणि जातानि । लवपुरमण्डलान्तर्गत-चूनियांनामनगरे सारस्वताष्टवंशान्तर्गतजोशीजातीयधर्मसद्भावपूरितः मुद्गलशाखी श्रीमान् पण्डितनन्दलालशर्माऽऽसीत् । तेषां पत्नी सती सारस्वताष्टवंशान्तर्गतपाठक-जातीया नाम्नी ज्वालादेव्यासीत् । जन्मना कर्मणा च ब्राह्मणः नन्दलालः पिता तथा सुशीला वात्सल्यरपूरिता माता बभूव । एषां गृहे प्रायः १९१४ चतुर्दशोत्तरैकोनविंशतिशततमेवैक्रमे संवत्सरे जन्माभूत् । बालकस्य नाम श्रीगोकुलचन्द्र स एव बालकोऽस्माकं मङ्गलभाष्यकर्त्ता ऋषिप्रवरः श्रीमदाचार्य्यो ख्यातः । श्रीनन्दलालशर्मणां पूर्वं वासस्थानं गुजरांवालामण्डला-न्तवर्त्तिरामनगरनामकेग्रामे आसीत् । केनचिद्धेतुना तैः चूनियां ग्रामे वासः कृतः । तेषांच विवाहः पूर्वमेव गुजरांवालामण्डलान्तवर्त्तिहाफिजांवादकलियांवाला नाम्नि ग्रामे पाठकजातीय-कन्यया सहाभूत् । अनयोः वासः पुनः चूनियां नाम्निनगरेऽभूत् ।

जन्मतोऽष्टमे सप्तमे वा वर्षे मातापितरौ दिवं गतौ । इतस्ततः परिभ्रमन् स्नेहवर्धितः बालकः गोपालरूपः गोकुलचन्द्रः खिन्नमानसः विचलितः विक्षिप्तश्चासीत् । एवं प्रभूतः समयः यातः । किशोरावस्थाप्राप्तायां रावलपिण्डीनगरेश्रीमतां श्रीसुजानसिंहचड्ढाक्षत्रियजातीयपाठशालायां प्रवेशः कृतः तत्र रघुनाथमन्दिरमासीत् तत्रैव व्याकरणपठनमारब्धवान् तथा च ब्रह्मचा-रिणः बालानन्दाचार्यात् पुनः यज्ञोपवीतसंस्कारं प्राप्तः । दीक्षा च गृहीता नैष्ठिकब्रह्मचर्यस्य । बालानन्दस्य जम्बुदेशगतमीरपुरचौमुकग्रामे जन्मस्थानमासीत् । चत्वारि पञ्च वा वर्षाणि यावत् तत्र व्याकरणं सन्ध्यापाठं दैनिकं सूर्योपस्थानादिकं धार्मिकं कृत्यं चाधिगतम् । आचार्यो बालानन्दः शास्त्री जगन्नाथपुरीं गतः तीर्थमिषेण तत्रैव भौतिकीं तनुं तत्याज । पुनः श्रीगोकुलचन्द्रः चिन्तितो मनसि विक्षेपं प्राप्तः । पुनः । कतिकालादनन्तरं वजीराबादमार्गतः जम्बुरघुनाथपाठशालामवलोक्य तत्र विरक्त इव पुनः उत्तरवेणीं जम्बुप्रान्तान्तर्गतां जगाम । तत्र दाक्षिणात्यात् पण्डितप्रवरात् श्री ओझारामात् श्रीमद्भागवतमध्यात्मरामायणं च पठितवान् ते पुनः ओझारामशास्त्रिणः काश्मीरान्तर्गतामरनाथयात्रामारब्धवन्तस्तत्रैव च तृण इव शरीरं त्यक्त्वा दिवंगताः । एकवर्षं यावत्तत्र पठितं । पुनः १९६८ वैक्रमे संवत्सरे १९०८ खिष्टाब्दे पिण्डोरीधामतीर्थमायातः । तत्र पण्डितविहारीलालात्पुनः सिद्धान्तकौमुदीचेन्दुशेखरश्च पठितः । पुनः स्वयमेव निरुक्तं न्यायं योगं सांख्यं चाधिगम्य व्यासशास्त्रं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चाधीत्य पूर्वमीमांसश्च सम्यगवलोकितः। तथा समयेन पुनः ऋक्संहिता शुक्लयजुःसंहिता सामसंहिता चाभ्यस्ता। एवं चात्र पिण्डोरीधामतीर्थे छात्राः विद्यार्थिनो बहवः पाठिताः। एवं हि १९३० खिष्टाब्दे १९८५ वैक्रमे संवत्सरेऽहं हरिकृष्णनामापि तत्र विद्याप्राप्त्यर्थं श्रीस्वामिना त्रिवेणीगिरिणा सह जगाम तत्र वर्षैकं यावत् व्याकरणं पाठितम्। पुनः समये २ तत्र गत्वान्तेवासीव स्वल्पकालान्तर्गतामपि शुद्धां विद्यां श्रीगुरुप्रसादतः प्राप्तवान्। एभिः पुनः सन्ध्याभाष्यं १९४६ खिष्टाब्दे २००२ वैक्रमेऽब्दे स्वयं पाठितंदत्तं च लोककल्याणार्थं। अधुना तैः शुक्लयजुर्वेदभाष्यं क्रियते। शंभवतु।

माघकृष्ण चतुर्थी शनिवारः २०१२ वैक्रमः संवत्सरः।

१९ जनवरी १९५७ खिष्टाब्द

यत्संक्षिप्तं जीवनचरितं लिखितं मया तत्समये २ कदाचित् श्रीमदाचार्य्यवरैः अभिहितं च मम मातापितरौ अतीवनिर्धनौस्त स्म। जन्ममासः तिथिः वारं च मया पृष्टं तदुत्तरे नाहं जाने सप्तमेऽष्टमे वा वर्षे प्राप्ते मम मातापितरौ दिवं गतौ तदा मम किं ज्ञानं ९८ अष्टोत्तरनवतितमवर्षावस्था ममाधुनेति च कथितं किं पुनर्जीवनवृत्तपरिचयैर्ज्ञानेनैव विद्वांसः संतोषं प्राप्नुयुः। शंभवतु।

एषामेवाचार्य्यवराणां कृपापात्रः शिष्यः पण्डितहरिकृष्णः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्री रामस्तवनं प्रारभ्यते

यदाचार्य्यप्रवरैः श्रीमद्गोकुलचन्द्रमहर्षिभिः श्रीरामनवम्यां भागवतमन्दिरे पिण्डोरीधाम्नि कथितम्

श्रीविष्णुर्जगदीश्वरश्चमुनिभिर्देवैर्यदा प्रार्थितः ।
रक्षोवंशविनाशनाय जगति जातश्च रामः प्रभुः ।
हत्वा दैत्यकुलं च तेन सकलं धर्मः सतां दर्शितः ।
भो श्री राम ! तवाङ्घ्रिपुण्यरजसा सर्वे वयं पाविताः ॥१॥

इत्यूचुर्मुनयश्च संशितगिरः रामं परं दैवतम् ।
श्री वैश्वानररामरूपमखिलं स्तोतुं प्रवृत्ताः पुनः ।
व्योमेदं च शरीररूपमतुलं यस्यैव शोभास्पदम् ।
सप्ताच्छादनधातुभिश्चरचितं ब्रह्माण्डरूपं विभोः ॥२॥

श्रोत्रं यस्य दिशश्च शब्दविषयाः सूर्यश्चते चक्षुषी ।
घ्राणं ते पृथिवी च गन्धविषया कुक्षि च ते सागराः ।
यस्यास्थीनि च विश्वरूपरचने सर्वे च ते भूधराः ।
चन्द्रस्ते मनसश्चभोगनिलयः जातश्च दिव्यो रसः ॥३॥

देवाः यस्य विशालबाहुरचना कालोऽस्य चेष्टा परा ।
रूपं ते दिवि तारकादिभगणाः देवैर्विचित्रीकृतम् ।
हासोन्मादकरी च सर्वजगतां माया च यस्येदृशी ।
कालव्योमदिगात्मभावविषयं यस्यैव ध्रौव्यं पदं ॥४॥

कर्मद्रव्यस्वभावजीवरचितं यस्यैव विश्वं प्रभा ।
इत्थं रामस्वरूपब्रह्मचरितं वेदैः पुरा कीर्त्तितम ।
तद्रामो क्षितिपालधर्मनिरतः क्षात्रैर्गुणैः शोभितः ।
वेदाः यस्य मुखे स्वभावविदिता धर्मश्च सत्यं यतः ॥५॥

वागीशा वदने तु यस्य रमते लक्ष्मीश्च वक्षः स्थले ।
यस्यास्ते हृति दुष्टदैत्यदलनं रामाय तस्मै नमः ॥
श्रीशः शतंनोतु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मंगलभाष्यसंहिता

श्रीमद्वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिता

मेषार्के २०५२ वैक्रमाब्दे प्राप्ते मंगलभाष्यस्य भाष्यभूमिकायाश्च समारम्भः कृतः ।

तत्सामयिकम् जगद्गुरुब्रह्मर्षिगोकुलचन्द्रसूरीणां शिष्यसहितम् चित्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्री रामस्तवनं प्रारभ्यते

यदाचार्य्यप्रवरैः श्रीमद्गोकुलचन्द्रमहर्षिभिः [illegible]
पिण्डोरीधाम्नि कथितम्

श्रीविष्णुर्जगदीश्वरश्च मुनिभिर्देवैर्यदा प्रार्थितः ।
रक्षोवंशविनाशनाय जगति जातश्च रामः प्रभुः ।
हत्वा दैत्यकुलं च तेन सकलं धर्मः सतां दर्शितः ।
भो श्री राम ! तवाङ्घ्रिपुण्यरजसा सर्वे वयं पाविताः ॥१॥
इत्यूचुर्मुनयश्च संशितगिरः रामं परं दैवतम् ।
श्री वैश्वानररामरूपमखिलं स्तोतुं प्रवृत्ताः पुनः ।
व्योमेदं च शरीररूपमतुलं यस्यैव शोभास्पदम् ।
सप्ताच्छादनधातुभिश्चरचितं ब्रह्माण्डरूपं विभोः ॥२॥
श्रोत्रं यस्य दिशश्च शब्दविषयाः सूर्यश्चते चक्षुषी ।
घ्राणं ते पृथिवी च गन्धविषया कुक्षि च ते सागराः ।
यस्यास्थीनि च विश्वरूपरचने सर्वे च ते भूधराः ।
चन्द्रस्ते मनसश्चभोगनिलयः जातश्च दिव्यो रसः ॥३॥
देवाः यस्य विशालबाहुरचना कालोऽस्य चेष्टा परा ।
रूपं ते दिवि तारकादिभगणाः देवैर्विचित्रीकृतम् ।
हासोन्मादकरी च सर्वजगतां माया च यस्येदृशी ।
कालव्योमदिगात्मभावविषयं यस्यैव ध्रौव्यं पदं ॥४॥
कर्मद्रव्यस्वभावजीवरचितं यस्यैव विश्वं प्रभा ।
इत्थं रामस्वरूपब्रह्मचरितं वेदैः पुरा कीर्त्तितम् ।
तद्रामो क्षितिपालधर्मनिरतः क्षात्रैर्गुणैः शोभितः ।
वेदाः यस्य मुखे स्वभावविदिता धर्मश्च सत्यं यतः ॥५॥
वागीशा वदने तु यस्य रमते लक्ष्मीश्च वक्षः स्थले ।
यस्यास्ते हृति दुष्टदैत्यदलनं रामाय तस्मै नमः ॥
श्रीशः शतंनोतु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मंगलभाष्यसहिता

श्रीमद्वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिता

मेषार्के २०१२ वैक्रमाब्दे प्राप्ते मंगलभाष्यस्य भाष्यभूमिकायाश्च समारम्भः कृतः ।
तत्सामयिकम् जगद्गुरुब्रह्मर्षिगोकुलचन्द्रसूरीणां शिष्यसहितम् चित्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ शुक्लयजुर्वेदमंगलभाष्यभूमिका

भगवद्रूपतो जातो विश्वकर्मा प्रजापतिः। तेजः क्रियास्थितिरूपो भूतेन्द्रियात्मकः प्रभुः ॥१॥
कर्मद्रव्यस्वाभावैस्तु नाना रूपोऽभवत्पुरा। पुरुषोद्वैतमापन्नो ह्यविद्याकामकर्मभिः ॥२॥
एषा वै चापरा विद्या परा यत्रात्मदर्शनम्। ह्येतत् विद्याद्वयं यत्र दृष्टं च ब्रह्मवादिभिः ॥३॥
तद्वैब्रह्मपरं धाम वेदज्ञानमुपास्महे ॥

कस्मिन् काले प्रवृत्तोऽयं वेदो ह्येतत् ज्ञानार्थं भगवत् वाक्यं प्रमाणम्।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

प्रजापतिः विश्वकर्मा, यज्ञैः सहवर्त्तन्ते इति सहयज्ञाः प्रजाः सृष्ट्वा तासां प्रजानां पुरोवाच पुरा पूर्वं उक्तवान्--अनेन यज्ञेन यूयं प्रसविष्यध्वम् नाम वृद्धिं प्राप्नुत, एषो यज्ञो वो युष्माकमिष्टकामधुक् अस्तु, ह्येतत् यज्ञप्रवृत्त्यर्थं मनुरप्याह—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनम्।
दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुःसामलक्षणम् ॥

सः प्रजापतिः अग्नेर्ऋग् वेदज्ञानं, वायोर्यजुर्वेदज्ञानं, रवेः सामवेदज्ञानं, एतत् ऋग्यजुःसामलक्षणं त्रयं सनातन ब्रह्म ज्ञानं यज्ञसिद्ध्यर्थं प्रजापतिः सृष्टिसर्जनकाले दुदोह नाम संपादितवान् तदानीं काले केन क्रमेण वेदः प्रवृत्तो बभूव तत्र ऋचमभिधत्ते—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः,।
गुहा त्रीणि निहिता नेगयन्ति, तुरीयं वाचो मनुष्या वदन्ति ॥

वर्णज्ञानं, छन्दोज्ञानं, देवताज्ञानं, शब्दज्ञानं, चेति वाक् परिमितानि, चत्वारि पदानि ब्रह्मणो मुखात् पूर्वं निर्गतानि ये ब्राह्मणाः मनीषिणः संति, तानि सर्वाणि विदुर्नाम जानंति, वर्णज्ञानं, छन्दोज्ञानं, देवताज्ञानं चेति त्रीणि पदानि प्रत्यकं मनुष्याणां बुद्धिरूपगुहायां निहितानि नाम स्थितानि नेंगयन्ति नाम गुरुं विना न प्रादुर्भवन्ति, वाचस्तुरीयं नाम शब्दरूपं चतुर्थं पदं सर्वे मनुष्याः वदन्ति नतु पशवो वदन्ति, वर्णज्ञान चैतत् प्रोक्तम। एकविंशतिः स्वराः प्रोक्ताः पञ्चविंशति स्पर्शाः, यणश्चत्वारश्चत्वारश्चशलः, अनुस्वारोविसर्गश्च जिह्वामूलिय उपध्मानियश्च चत्वारः, यमाश्चत्वारः ह्येतद् वर्णज्ञानं, गायत्रीप्रभृतीनि छन्दांसि, दैवतं ज्ञानं च, शब्दज्ञानेन सह प्रजाः संजाताः, शब्दज्ञाने विशेषमाह—पुरा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महेन्द्रायांगिरो दिव्यं वर्षशतं शब्दानध्यापयामास स तदपि शब्दवारिधेः पारं न ययौ, ते सर्वे परमर्षयः प्रोचुः, शब्दज्ञाने किं कुर्मः, ते शंकरस्य शरणं ययुः, भो भगवन् वयं प्रजापतिप्रोक्तान् शब्दान् न जानीमः, किं कुर्याम तद्वचनमाकर्ण्य महादेवेन महाव्याकरणं छन्दःसूत्रैः सहितं विरचितं ह्येतन्मन्त्रेणापि संपादितम्—

चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥

शब्दब्रह्मरूपो महान् देवो मर्त्यान् नाम मनुष्यान् आविवेश नाम प्रविष्टवान् । कीदृशो वृषभो नाम सर्वकामवर्षकः, अस्य वृषभस्य शब्दब्रह्मणः नामाख्यातोपसर्गनिपातरूपाणि चत्वारि शृंगाणि सन्ति, अस्य शब्दब्रह्मणः भूतभविष्यत्वर्त्तमानरूपास्त्रयश्च पादाः सन्ति, द्वे शीर्षे प्रकृतिप्रत्ययरूपौ द्वौ मूर्धानौ भवतः, अस्य शब्दब्रह्मणः सप्त विभक्तयः सप्त हस्ताः सन्ति, पुनः कीदृशः वृषभो हृदि कण्ठे जिह्वायां चेति त्रिधा बद्धो रोरवीति नामातिशयेन शब्दं करोति । मन्त्रसंपादितं ह्येतद्व्याकरणं महादेवेन विरचितं । परमर्षयः महादेवादेतद्विज्ञाय येन छन्दसा, येन वाक्यविशेषण यां यां मन्त्रदेवतां ददृशुः, ते मंत्रा आसन्, केचिन् मंत्राः यज्ञविषयाः प्रजापतिना दृष्टाः, केचिन्मन्त्रा ब्रह्मपुत्रैर्महर्षिभिर्दृष्टास्तदनंतरं भूर्जपर्णेषु ताम्रपर्णेषु तालपर्णेषु च लिपिकृत्य राजन्यान् याजयामासुः । कृतयुगे सर्वे जनाः स्वाध्यायनिरताः, त्रेतायां यज्ञनिरताः द्वापरे पूजनरताः कलौ केवलं भक्तिरताः भवन्ति त्रेतायां श्रीरामस्यावतारे श्रीरामस्याश्वमेधयज्ञे सर्वे ऋषयः संमिलिताः संतः स्वकीयभूर्जपत्रादिषु लिखितान् ऋग्यजुःसामलक्षणान् मन्त्रान् श्रीरामाय समर्पितवन्तः । श्रीरामोऽपि तदानीं काले तान् मंत्रान् एकीकृत्य चैकं वेदं चकार ॥

तदनन्तरं द्वापरयुगस्यावसाने सत्यवतीपुत्रो व्यासनामा बभूव तस्य पञ्च शिष्याः आसन्—स व्यासो ह्येकं वेदं चतुर्धाविभज्य स्वशिष्येभ्योऽध्यापयामास, ऋग्संहितां पैलाय, सामसंहितां जैमनिमुनये, यजुःसंहितां वैशम्पायनाय, अथर्वसंहितां सुमंतुमुनयेऽध्यापितवान्, इतिहासादिकं पञ्चमं शिष्यं रोमहर्षणं पाठितवान् ॥

पुरा तैत्तरीयशतपथगोपथसामविधानादिब्राह्मणग्रन्थाः पशुयज्ञादिभिश्च वेदविधिवादैश्च नाना भाष्यैश्च समलंकृताः बभूवुः—पूर्वं देवाश्चासुराश्च कश्यपस्य प्रजापतेः पुत्राः आसन् । तयोर्मध्ये देवाः कनीयांसः दैत्याः ज्यायांसश्च—ते दैत्याः निर्मर्यादाः सर्वधर्मबहिष्कृताः शिश्नोदरपरायणाः सर्वासु योषित्सुरताः मांसमद्यादिनानाभोगरताश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बभूवुः। तान् नियमपतितान् असुरान् समालोक्य भृगुभिर्दैत्यपुरोहितैस्तेषां नियमनार्थं व्यवस्था कृता तां व्यवस्थामाह—अभिहितं च भागवते—

लोके व्यवायामिषमद्यसेवानित्यास्तु जन्तोर्नहि तत्र चोदना ।
व्यवस्थितिस्तासु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥

अस्मिन् लोके आसुरवृत्तिजनेषु व्यवायामिषमद्यसेवा जन्तोर्नाम् मनुष्यमात्रस्य नित्या नाम स्वभावतो भवति। हि यस्मात् तत्र कस्यचित् प्रेरणा नास्ति। तासु व्यवायामिषमद्यसेवासु विवाहयज्ञसुराग्रहैः आसुरवृत्तिजनानां नियमनार्थं भृगुभिर्दैत्यपुरोहितैः व्यवस्थाकृता, तैरुक्तम्-भो दैत्याः। युष्माकं नारीभोगेच्छा चेत् विवाहः कर्त्तव्यः मद्यमांसभोगेच्छा चेत् सौत्रामणिवाजपेयादियज्ञेषु पूर्त्तव्या अत एव मुमुक्षभिरासु व्यवायामिषमद्यसेवासु निवृत्तिः कर्त्तव्या एते पशुयज्ञाः संसारं प्रति रूपकालंकारविषयाः सद्भिः सदा हेयाः केवलमसुराणां नियमनार्थं भृगुभिर्विरचिताः। अत एव किमपि कल्याणं न साध्नुवन्ति, यज्ञस्य नाम अध्वरः, न ध्वरो हिंसा यत्र विद्यते सः अध्वरः।

न कृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्।
न च प्राणिवधः स्वर्ग्यः तस्मान्मांसं वर्जयेत् ॥

इति मनुवचनात् हिंसा सर्वत्र त्याज्या। अत्रासुरीपशुयज्ञप्रवृत्तिविषये प्राचीनबर्हिप्रभृतयः भूपतयः आसन्। तैः प्राचीनबर्हिभूपतिभिः सर्वा पृथिवी पशुयज्ञैर्मलिनीकृता। तामीदृशीं पृथिवीं विज्ञायांगिरः नारदश्च, तौ तस्य राज्ञः समीपमाजग्मतुः—श्रीनारदेनोक्तं भो राजन् यावन्तः पशव स्त्वया पशुयज्ञेषु निहिताः, ते सर्वे पशवः त्वां प्रति वैरप्रतिकारं कर्तुं व्योम्नि समुपस्थिताः, राज्ञोक्तं मया किं न दृश्यन्ते, नारदेन अक्षतान्नभिमन्त्र्य व्योम्नि पातिताः—तेन सर्वे पशवो राज्ञो दृष्टिपथमायाताः, तान् समीक्ष्य राजा भयभीतः सन् नारदस्य शरणं ययौ। नारदेनाभिहितम्—भो राजन्। शृण त्वं मे वचः—

ब्रह्मज्ञानं विना सर्वे मनुष्याः पशुतां गताः।
वैश्वानरविराडग्नौ हूयन्ते कालयोगतः ॥
पशुयज्ञः संसारोऽयमिति वेदेषु निश्चितः।
कविभिरन्यथत्प्रोक्तं, तत्सर्वं च विडम्बनम् ॥

अत एव यत्र कुत्रचित् मन्त्रस्थलेषु ह्येतद् दृश्यते। मनुष्यहोतर्घृतेनयज, अत एव पुरोडाशादिविधानं ब्राह्मणग्रन्थेषु धर्मसूत्रकारैश्च समर्थितम् तत्सर्वं च विडम्बनमात्रं हेयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च घृतहवनं च मन्त्रेणाभिहितं मंत्रमाह—कदाचित् विश्वामित्रं अग्निः स्वमहत्वं दर्शयन् सन्नाह—

अग्निरस्मि जन्मना जातवेदाः घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानः अजस्रं ज्योतिर्हविरस्मि नाम ॥

भो मुने ! अग्निरहमस्मि सर्वत्र व्यापकरूपेण । जन्मना जातवेदाः स्वप्रादुर्भावेण जातानि वेदांसि नाम ज्ञानानि यस्मात् स जातवेदाः नाम आदित्यो अहमस्मि, घृतं मे चक्षुः मम प्रकाशकं, यो मद्भक्तो मयि प्रातः सायं घृतेन यजति, तस्य अमृतं नाम कर्मफलं ममास्ये नाम मुखे वर्त्तते—कर्म फलमाह अहं त्र्यम्बकोऽस्मि, मित्रो वरुणो रुद्रश्च मम नेत्ररूपाः सन्ति, मित्रदृष्ट्या जनेभ्यो मुक्तिपदं ददामि, वरुणो नाम कर्मदृष्ट्या जनेभ्यः कर्मफलं ददामि, रुद्रदृष्ट्या जनेभ्यः पापफलं ददामि, अर्को नाम सर्वजैनः पूजनीयः समष्टिप्राणरूपः प्रजापतिरहमस्मि, कीदृशः प्रजापतिः प्राणोऽपान उदानरूपाः धातवो नाम शरीराणि यस्य स प्राणः त्रिधातुः—रजसो, रजांसि लोका उच्यन्ते इति श्रुतिः, रजसो नाम लोकस्य निर्माता, अजस्रमखण्डितं ज्योतिः ग्रहनक्षत्रतारारूपमहमस्मि, हविर्नामेति प्रसिद्धौ औषधिवनस्पतिरूपं हविरहमस्मि, इयलंविस्तरेण । अत एव सर्वयज्ञेषु घृतेन देवा यष्टव्याः नतु पुरोडाशविधिः कर्त्तव्यः ॥

पूर्वं चातुर्वर्ण्यं देवेषु बभूव तद्यथा—ब्रह्मा तस्य पुत्राः भृगुः अंगिरा प्रभृतयो ब्राह्मणाः—आसत् । इन्द्रवरुणसोमपर्यजन्यरुद्रयममृत्व्वीशान्धर्मध्रुवरूपाश्चेति राजन्या आसन् । आदित्याः, वसवः, रुद्राः, विश्वेदेवाः, मरुतश्चेति वैश्यवर्णाः बभूवुः । इयं पृथिवी शूद्रा ! भृगु अंगिर आदीनां विद्यागोत्रात् वा वंशगोत्रात् मनुष्येषु ब्राह्मणाः बभूवुः । इन्द्रवरुणप्रभृतीनां देवक्षत्रियाणां विद्यागोत्रात् वा वंशगोत्रात् मनुष्येषु राजन्याः बभूवुः । आदित्याः वसवोरुद्राः विश्वेदेवाः मरुद्गणाः, इति गणशो ख्यातानां वैश्यवर्णानां देवानां विद्यागोत्रात् वा वंशगोत्रात् मनुष्येषु वैश्याः बभूवुः । पृथिव्या शूद्रायाः संबन्धात्, औषधिवनस्पतयश्च सर्वे शूद्रवर्णा एव, ये पूर्वोक्तदेवानां विद्यागोत्रात् वा वंशगोत्रात् मनुष्या रहिता आसन् ते शूद्राः, सर्वा इमा प्रजाः काश्यपा इति वचनात् काश्यपगोत्राः बभूवुः—तच्चातुर्वर्ण्यं प्रत्युपदेशं मन्त्रेणाभिचष्टे मन्त्रमाह—

यथेमां वाचं कल्याणिमावदानि जनेभ्यः ब्रह्मराजन्याभ्याꣳ
शूद्राय चार्य्याय च स्वाय चारणाय च प्रियो देवानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुपमादो नमतु ।

मन्त्रद्रष्टा ब्रवीति, यथारयात्तथेमामृग्यजुःसामलक्षणां वाचं कल्याणीं कल्याणकारिणीं सर्वजनेभ्योऽहमावदानि सर्वतः ब्रवाणि केभ्यो जनेभ्यः, ब्रह्म नाम ब्राह्मणाय पुनः राजन्याय पुनः शूद्राय पुनश्चार्य्याय नाम वैश्याय स्वाय नाम वर्णानामन्तर्जाय,चारणाय नाम

(किरात हूणान्ध्र पुलिन्दपुलक्कसाः आभीरकंकाः यवनाः खसादयः । येऽन्ये च पापाः यदुपाश्रिताश्रयाः शुद्धन्ति तस्मै प्रभविष्णवे नमः । इति भागवते श्री यज्ञपुरुषस्य पतितपावनस्य श्री विष्णोः शरणागतानां गतिर्विहिता प्रसङ्गतः) ।

किरातहूणांध्रपुलिन्दपुलक्कसाभीरकंकयवनखसादिभ्योऽहं ब्रवाणि, तेसर्वेऽपि स्वधर्मानुसारेण स्ववाचं संस्कृतां कुर्वन्तु हविषा यज्ञपुरुषं यजन्तु स्वकल्याणं सम्पादयन्तु, मन्त्रद्रष्टा ब्रवीति, देवान् प्रति हविर्दातुः यजमानस्येह नामास्मिन् संसारयज्ञे दक्षिणायै देवानां प्रियो नाम हितकार्यहम् भूयासं, अयं मे कामः संकल्पः समृध्यतां, अस्मिं लोके सिद्धिं यातु, अदो, उपदेशफलं मामुपनमतु नाम प्राप्नोतु—किं च वर्णान् प्रति ह्यन्यदप्युक्तं तन्मन्त्रेणाह—

त्रयः कृण्वन्ति भुवनेषु रेतः तिस्रः प्रजा आर्य्या ज्योतिरग्रा त्रयो घर्मास उषसं सचन्ते सर्वाभिस्तान विदुर्वशिष्टाः ॥

अग्निर्वायुरादित्यश्चेति त्रयो देवाश्चतुर्दशभुवनेषु रेतः नाम स्वसामर्थ्यं कृण्वन्ति नाम संपादयन्ति, तेषां त्रयाणां देवानां तिस्रः प्रजाः, ब्राह्मणो वैश्यो राजन्यश्च नामतश्चार्य्याः भवन्ति । ज्योतिरग्राः नाम ज्योतिरग्निरादित्यो वाग्रं नाम मुख्यं कर्म येषां ते ज्योतिरग्राः त्रयः घर्मासः नामादित्योपासकाः विद्यासंस्कृतः शूद्रोऽपि । ते सर्वे उषसं सचन्ते नाम प्रातः कालसेविनः सन्ति, इत एव तान् सर्वान् वशिष्टाः विदुः नाम जानन्ति अलमतिविस्तरेण ॥

चातुवर्ण्यं समाप्तं चतुर्दशभुवनेषु भगवत्तत्त्वं व्याप्तं मन्त्रेण तस्य व्याप्तिमाह—

स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं कविर्मनीषी परिभूः स्वयंभूः याथातथ्यतोऽर्थान व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

तद्व्याख्यामाह—सः भगवान् पर्यगात् नाम सर्वतो व्याप्तवान् कीदृशः तच्छुक्रं नाम तेजोमयः, अतएवाकायं नाम स्थूलसूक्ष्मकारणशरीरत्रयरहितः, अत एवाव्रणं नाम शरीरघातछिद्रादिदोषरहितः, शुद्धं नाम मलविक्षेपावरणदोषत्रयरहितः, अपापविद्धं नाम कायवाङ्मनःपापरोगरहितः, कविर्नाम सर्वज्ञः, मनीषी बुद्धिमान, परिभूः नाम पारितोभव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ति, स्वयंभूः नाम कार्य्यकारणरहितः, एतद्गुणविशिष्टः सर्वव्यापकः परमेश्वरः शाश्वतीभ्यः समाभ्यः, महाकल्पेभ्यः याथतथ्यतो नाम यथापूर्वमासन् तथा स्वात्मनि लुप्तान् ब्रह्माण्डरूपान् अर्थान् व्यदधात् नाम विशेषेणाकरोत् कृतवान्. अस्मिन् मन्त्रे स इति कविर्मनीषी, परिभूः स्वयंभूरिति पुंलिङ्गनिर्देशः तदन्येषां नपुंस्कनिर्देश इति—

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥

इति श्रुतिवचनात् सर्वैः स्त्रीपुँलिङ्गनपुंस्कलिंगैर्विशेषणैः सह युज्यते नात्र कोऽपि दोष इति, अलमतिविस्तरेण ॥

स सर्वव्यापकः परमेश्वरोऽस्ति यथाग्निव्यापकः कस्यचिदपि विशेषहितं न करोति, व्यक्तः सन् प्राणिनां शीतादिदोषं सर्वं निवारयति—तथा परमेश्वरोऽपि स्वव्यक्तिं विना कस्यचिदपि प्रेमास्पदं न साधयति अत एव तस्य व्यक्तिमाह मन्त्रेण—

तद्विष्णोर्परमं पदꣳ सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् ॥

विष्णोर्नाम व्यापकशीलस्य भगवतो दिवि नामाकाशे रविमण्डले परमं पदं नाम तेजोमयं रूपं नारायणमानखाग्रतः सर्वं भारूपमस्ति, तं रविमण्डलस्थं नारायणं सूरयः नाम विद्वांसः सदा नाम सदैवोपासनाकाले पश्यन्ति, कीदृशं तेजोमण्डलस्थं पुरुषं चक्षुरिवाततं नाम सर्वतो विस्तृतं, तदपि किंचिद्विशेषतो व्यक्तिमाह—

तद्विप्रासोविपन्यवो जाग्रवाꣳ स समिन्धते विष्णोर्यत् परमं पदम् ॥

यत् विष्णोः परमं पदं रविमण्डले भाति तद्विष्णोः रूपं विप्रासः मेधाविनः नाम निन्दास्तुतिरहिताः जाग्रवांसः नाम भक्तितत्पराः तत्परमं पदं सगुणरूपं तेजोमयं नारायणं स्त्रीशूद्रादिनां कल्याणार्थं ग्रामे ग्रामे समिन्धते प्रकाशयन्ति नाम स्थापयन्ति ॥

तस्योपासनया मुक्तिमाह—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनायꣳ॥

मन्त्रद्रष्टा ब्रवीति—एतं महान्तं पुरुषं रविमण्डलस्थमहं वेद नाम जानामि, कीदृशं पुरुषमादित्यवर्णं, आदित्यो वर्णो यस्य तदादित्यवर्णं पुनः कीदृशं तमसः परस्तात् अविद्यालक्षणात् संसारलक्षणाद्वा परस्तात्, नामातिशयेनपरं तं रविमण्डलस्थं नारायणं पुरुषमेव निश्चयेन विदित्वानाम ज्ञात्वा पुरुषो मृत्युमेति नामातिक्रम्य गच्छति जन्ममरण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूपात् संसारात् मुक्तोभवति—अयनाय नाम मुक्तयेऽस्मिन् संसारेऽन्यः पन्था रविमण्डल-स्थनारायणपुरुषोपासनादृते न विद्यते इत्यलं ॥

नहि वेदात्परं ज्ञानं, नहि वेदात्परं तपः ।
नहि वेदात्परा भक्ति, र्नहि वेदात्परा स्तुतिः ॥
नहि वेदात्परं स्तुत्यं, तस्माद्वेदं मनामहै ।
कृत्तकेशनखश्मश्रुः दांतः शुक्लाम्बरः शुचिः ॥
सार्थं वेदमधीयानो ब्रह्मलोके महीयते ।
सस्वरं च पठेत् वेदं शास्त्रगर्त्तेषु न पतेत् ॥
शास्त्रगर्त्ते पतन्नेव तर्कवादी प्रजायते ।
वेदाभ्यासः परं श्रेयो वेदाभ्यासे च विश्वसेत् ॥
विश्वासे हि भवेत्सिद्धिः विश्वासो फलदायकः ।
विश्वासो हन्यते तर्कैः अविश्वस्ते कुतः सुखम् ॥
तद्विश्वासो हि कर्त्तव्यो वेदेष्वत्र मुमुक्षुभिः ।
वेदश्चैव मुमुक्षुणां परमं मुक्तिसाधनम् ॥
विश्वासेनैव याताः हि मुनयः परमं पदम् ।
विना वेदं हि लोकेऽस्मिन् श्रेयः कथं भवेदिह ॥
सूर्य्यं विना जगत्सर्वं नश्यत्येव न संशयः ॥॥

वेदज्ञानादृतेऽविद्यासंवृताः, अत एव विविधजल्पनायुक्ताः नानामतावलम्बिनः स्वबुद्धिकल्पितमार्गेषु जनान् भ्रामयन्तः सन्तः परस्परं विवादेन वैमनस्यं विधाय विरोधं जनयन्तः स्वधर्मस्वरूपं न जानन्ति । अत एवान्धतमः प्रविशन्तीत्याह—

अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितं मन्यमानाः दंद्रम्यमाणाः परियन्ति मूढाः अन्धेन नीयमानाः यथान्धाः ॥

सर्वे जनाः संसारिणः अविद्यास्मत्रागद्वेषाभिनिवेशरूपायां पञ्चपर्वाऽऽविद्या-मन्तरे नाम मध्येवर्त्तमानाः जनाः स्वयं धीराः नाम स्वयं वयं बुद्धिमन्त अत एव स्वात्मानं पण्डितं मन्यमानाः, अस्मत्तोऽन्यः कः पण्डित इत्यभिमानरताः स्वयमपि अविद्याग्रस्ताः इत-रान्नपि अविद्याग्रस्तान् जनान् इतस्ततः कुत्सितमार्गेषु भ्रामयन्तः सन्तः, स्वात्मानमपि सांसारिकजनानपि संसारकूपे पातयन्ति यथाऽऽन्धेन पुरुषेण कुमार्गे नीयमानाः अन्धाः पुरुषाः, एवं ते सर्वे गर्त्ते पतन्ति—इत्यलं अतएवाविद्यावृताः जनाः स्वहृदि वर्त्तमानमपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमात्मनं न जानान्ति इत्याह—

न तं विदाथ य इमाः जजान अन्यत् युष्माकमंतरं बभूव
निहारेण प्रावृताः जल्प्याः चासुतृपः उक्थशासश्चरंति ॥

यः परमात्मा साक्षितया सर्वप्राणिनां हृदि वर्त्तमानः सन् इमाः पुत्रादिरूपाः प्रजाः जजान नाम जनयामास, तद्ब्रह्म युष्माकमंतरं नाम हृदिवर्त्तमानमन्यत् नाम भिन्नं बभूव, तं परमात्मानं यूयं न विदाथ नाम न जानीत, कथं न जानीमः, यूयं निहारेणाऽऽविद्यालक्षणेन प्रावृताः, अत एव जल्प्याः नाम जल्पनायुक्ताः नानावादरताश्च पुनः असुतृपः शिश्नोदरपरायणास्तथोक्तशासः सकामकर्मप्रशंसकाः सन्तः चरन्ति, इतस्ततः गच्छन्ति अत एव वेदेषु परापरज्ञानं विना भगवत्तत्वं पुम्भिर्नावगम्यते ॥

अथ शुक्लयजुर्वेदसंहितायां स्वरप्रक्रिया निरूप्यते—

हृदि दक्षिणे अधश्चानुदात्तः, मूर्ध्नि वामे चोपर्य्युदात्तः, श्रुतिमूलात्पतितः स्वरितः । अनुदात्तात्स्वरिते परेऽनुदात्तः दक्षिणे नीचैर्गमिष्यति, उदात्तस्तु वामे उपरि गमिष्यति, स्वरितस्तु परितः मध्ये पतिष्यति । अनुदात्तादुदात्ते परे ह्युदात्तो वामभागे गच्छति, अनुदात्तस्तु दक्षिणे भागे । ६ वा ७ यत्रैवं चिह्नं तत्र हस्तन्युब्जीकरणं कर्त्तव्यं । ४ वा ८ यत्रैवं चिह्नं तत्र स्वरो हृदि गत्वा बहिरागमिष्यति । दीर्घेग्गुंकारे रंगे हां इत्यत्र तर्जन्याः प्रसारः परिकीर्त्तितः । ह्रस्वग्गुंकारे अङ्गुष्ठाकुंचनं ७ इति । यकारस्य पदादिस्थस्य संयुक्तस्य ऋकारेण युक्तस्य आदिमध्यावसानस्थस्य द्वित्वस्य च चवर्गतृतीय जकारोच्चारणं । वकारस्य संयुक्तस्यासंयुक्तस्य च द्वित्वोच्चारणं । ऋकारस्य रकारस्य लकारस्य च एकार सहितोच्चारणम् । षकारस्यासंयुक्तस्य संयुक्तस्य च टवर्गं विहाय कवर्गद्वितीयखकारोच्चारणं । अनुस्वारस्य उकारविशिष्टद्वित्वगकारोच्चारणं श ष स ह रेफेषु परतः, ह्रस्वात्परे दीर्घः ग्गुं इति दीर्घात्परे संयोगे परे च ह्रस्वः ग्गुं इति । ह्रस्वात्परे च क्रमेण विसर्गस्य स्थाने पूर्व स्वरसहितस्य हकारस्य प्रतीतिः । वर्गपञ्चमाक्षरात् परस्य विसर्गस्य सानुनासिकं हकारोच्चारणम् । विसर्गेषु ईषद्विरामः । विसर्गेतु यत्रैवं ऽः चिह्नं भवति तत्राधो मध्ये दक्षिणे वा हस्तो गमिष्यति केवला कनिष्ठैकैव प्रक्षेतव्या तर्जनीमध्यमानामिकानां च नामनं । यत्रैवं चिह्नं ० तत्र मध्ये हस्तो याति कनिष्ठिकातर्जन्यौ प्रक्षेपणीये मध्यमानामिकयोर्नामनं । तथैव यत्रैवं चिह्नं ०ः भवति तत्र वामभागे उपरि च हस्तो गमिष्यति केवलैव तर्जनी प्रक्षेपणीया शेषाङ्गुलीनां तिसृणां नामनम् । ऋचोऽर्धे ऋगन्ते च स्वरस्य दीर्घोच्चारणं, हलः द्वित्वोच्चारणं सस्वरोच्चारणम् च । मकारे मुष्टिबंधनम् । नकारे अंगुष्ठतर्जनीनखस्पर्शनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क् ट् ङ् ण् कारे तर्जनीनामनं । तकार अङ्गुष्टतर्जनीभ्यां कुण्डलाकृतिः करणीया । मंत्रहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह, स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् । त्रयाणां स्वराणामविभागेनोच्चारणमेकश्रुतिः ॥ अत एव धर्मार्थकाममोक्षकामुकैः पुरुषैः संसारभयभीरुभिरर्थतो स्वरतो वै श्रीवेदस्य स्वाध्यायः कर्त्तव्यः सदा बुधैः ॥

श्री वेदाध्यायनस्य साधनानि ब्रुवन्त्याचार्य्याः यथा—

शिक्षा कल्पं व्याकरणं निरुक्तं ज्योतिषां गतिः,
छन्दो विचितिरित्येषो षडङ्गो वेद उच्यते ॥

शिक्षाशास्त्रं च कल्पशास्त्रं च याज्ञवल्क्यादिमुनिभिः प्रणीतम् ।
व्याकरणं महादेवेन प्रणीतम् । निरुक्तं यास्कादिमुनिभिः प्रणीतम् ।
पिंगलं छन्दोशास्त्रं, ग्रहनक्षत्रतारादिनां गतिज्ञानं ज्योतिः शास्त्रम् ।
एतानि षट् अंगानि श्रीवेदस्य ज्ञाने साधनानि ॥

सार्थं स्वरसहितं वै वेदं योऽत्र पठेत् द्विजः ।
सायं प्रातः जपेन्नित्यं सावित्रीं पापनाशिनीम् ॥
रविमण्डलमध्यस्थं तेजोमयं सनातनम् ।
सृष्ट्युत्पत्त्यादिकर्त्तारं ध्यायेत् सदा यतेन्द्रियः ॥
सायं प्रातः जुहुयाद्वै घृतेन हविषां पतिम् ।
चेत्थं नित्यं हि कुर्वाणो ब्रह्मलोकं समश्नुते ॥

दिवस्परिपूर्वं पुरुषरूपोऽग्निः जातः । द्वितीयोऽग्निः परिजातवेदा,परितो जातानि वेदांसि नाम ज्ञानानि यस्मात् सः परिजातवेदा आदित्यः । तस्मान्मेघरूपेण परिणताः आपः सर्वतोव्योम्निव्याप्ताः सैवमेघरूपस्तृतीयोऽग्निः । वैश्वानराग्निपुरुषः प्राणरूपेण व्याप्तः सन् तदुपरि तदुपरि रविरूपेणाभ्यन्तरे च प्राणरूपेण व्याप्त आसीत्, मेघरूपजलसंघातहिमवत् कठिना पृथिवी बभूव,सा पृथिवी चतुर्थरूपोऽग्निः । तस्यां ब्रह्मादयः सर्वाः प्रजाः पंचमाग्निरूपाः जाताः ॥ पञ्चाग्निज्ञानेन मुक्तिभाक् नरः । अत एवोक्तम्—

जाग्रत्स्वप्नसुषुप्त्यारव्यं सर्वं विश्वं प्रबोधयन् । भूतेन्द्रियात्मकं सर्गं सृजति स्वानुरूपकः ॥
तस्मै वैश्वानरायैव विश्वात्मने च सर्वदा । नमस्कुर्मो वयं सर्वे हूयतेऽत्र चराचरम् ॥
मया गोकुलचन्द्रेण पिण्डोरीधामवासिना । शुक्लस्य यजुर्वेदस्य कृतेयं भाष्यभूमिका ॥

शुभे संवत्सरेऽस्मिन् वीर विक्रमादित्य राज्यतः वर्षे खलु द्विसहस्रोत्तरत्रयोदशे वर्षे २०१३ प्राप्तेवैशाखे दर्शयां संरचिता । लिपिकर्त्तामेषामेवाचार्य्यवराणां शिष्यो हरिकृष्णः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओं

सन्ध्यास्तुतिमन्त्राः

टीकाकारमङ्गलम्

धात्वा हृदि परं ब्रह्मलोककल्याणहेतवे मया गोकुलचन्द्रेण क्रियते मंत्रदीपिका

ओं गणानात्वेत्यस्य प्रजापतिर्ऋषिरार्षीबृहती छन्दः लिङ्गोक्ता देवता वसो ममेत्यस्य साम्नी पंक्तिश्छन्दः प्रजापतिर्ऋषिः लिङ्गोक्ता देवता अश्वमेधादियज्ञे स्तुतिकरणे विनियोगः ॥ १ ॥ ओं गणानांत्वा गणपति ँ हवामहे प्रियाणांत्वा प्रियपति ँ हवामहे निधीनांत्वा निधिपति ँ हवामहे वसो मम ॥ आहम जानिगर्भधमात्वमजासिगर्भधम ॥१॥

अथ पदयछेदः—गणानाम्—त्वा—गणपतिम् -हवामहे -प्रियाणाम् —त्वा—प्रियपतिम्—हवामहे—निधीनाम्—त्वा—निधिपतिम्—हवामहे - । वसो—मम — आ—अहम्—अजानि—गर्भधम्—आ—त्वम्—अजासि—गर्भधम् । इति पदच्छेदः । अथ मंत्रव्याख्या—वसति जङ्गमाजङ्गमात्मकं सर्वं विश्वं यस्मिन् स वसुस्तस्य संबुद्धौ हे वसो । विश्वात्मन् वयं गणनां गणनीयानां पदार्थसमूहानां गणपतिम् स्वामिनम् त्वा नाम त्वाम् हवामहे—अस्मिन् संसारयज्ञे आह्वयामः । प्रियाणां सुहृन्मित्रादीनां प्रियपतिम् स्वामिनं त्वा नाम त्वाम् वयम् हवामहे अस्मिन् संसारयज्ञे आह्वयामः । निधीनां पद्मरागादिमण्याकराणां निधिपतिं स्वामिनं त्वा नाम त्वाम् वयम् हवामहे अस्मिन् संसारयज्ञे आह्वयामः । अर्को वै अश्वः, संसारो यज्ञः, एतदश्वमेधस्याश्वमेधत्वम् । सर्वोपद्रवशमनार्थम् प्रियभार्यादिलाभार्थं च त्वां सदैव वयं स्तुमः प्रार्थयामः इत्यलम्—हे वसो ! विश्वात्मन् ! विश्वाधार ! त्वम् मम मदात्मकानां सर्वेषामस्माकम् पालको भव । हे प्रजापते गर्भं दधतीति गर्भधम् गर्भधारकम् प्रजनसामर्थ्यं रेतो लक्षणम् । धर्मप्रणीतायाम् स्वभार्यायाम् गर्भाधानसंस्कारवेदविधिना स्वहृदयादाकृष्य तस्यामहमजानि क्षिपामि, यस्यां भवत्कृपादृष्ट्या धर्मरूपाः प्रजाः प्रजायेरन्—हे प्रजापते ! भगवन् त्वमपि सत्वरजस्तमोरूपायां जंगमाजंगमात्मकायां स्वपत्नीरूपमायायां गर्भधम् गर्भधारकम् स्वचैतन्यलक्षणम् रेतो रूपं तेजः सामर्थ्यम् स्वरूपादाकृष्य तस्यामजासि नाम क्षिपसि । स्वधर्मपत्नीरूपायां यस्यां प्रकृत्यां ब्रह्मादिस्थावरान्ताः सर्वाः प्रजाः प्रजायन्ते । अत एव भगवता श्री कृष्णेन गीतायामुक्तम् ।

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥

अत एव त्वया सृष्टाः वयं यथा ते बलिम् समर्पयेम तथा नः कुरु इत्यलम् ॥१॥

ओं गायत्रीत्यस्य प्रजापतिर्ऋषिरुष्णिक्छन्दः अश्वो देवता अश्वमेधयज्ञे विनियोगः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओं गायत्री त्रिष्टुबजगत्यनुष्टुपंक्तया सहावृहत्युष्णिहाककुप्सूचिभिः शम्यन्तु त्वा ॥२॥

अथ पदच्छेदः — गायत्री — त्रिष्टुप्—जगती—अनुष्टुप्—पंक्तया—सह—बृहती—उष्णिहा—ककुप्—सूचिभिः—शम्यन्तु—त्वा । इति पदछेदः । अथ मन्त्रव्याख्या—विश्वात्मन् ! भगवन् ! चतुर्विंशत्यक्षरा गायत्री छन्दः, चतुश्चत्वारिंशदक्षरात्रिष्टुप् छन्दो जातिः, अष्टाचत्वारिंशदक्षरा जगती छन्दो जातिः, द्वात्रिंशदक्षराऽऽनुष्टुप्छन्दो जातिः, षट्त्रिंशदक्षरा बृहती छन्दो जातिः, अष्टाविंशत्यक्षरा उष्णिक् छन्दो जातिः, चत्वारिंशदक्षरा पंक्तिश्छन्दो जातिः, एतानि वेदमंत्रात्मकानि छन्दांसि सूचिभिर्नाम शोभनाभिरुक्तिभिः सह सार्धं त्वा नाम त्वां शम्यन्तु प्रसादयन्तु, अत एव भवत्कृपादृष्ट्या वयमपि यावज्जीवं वेदमन्त्रैः त्वामेव स्तोतुमुपतिष्ठेम । इत्यलम् ॥२॥

ओं द्विपदेत्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द अश्वो देवताश्वमेधयज्ञे स्तुतिकरणे-विनियोगः ।

ओं द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः विच्छन्दायाश्च सच्छन्दाः सूचिभिः शम्यन्तु त्वा ॥३॥

अथ पदच्छेदः—द्विपदा—याः—चतुष्पदाः —त्रिपदाः—याः —च—षट्पदाः—विच्छन्दाः—याः—च—सच्छन्दाः—सूचिभिः—शम्यन्तु—त्वा— । इनि पदच्छेदः ॥३॥

अथ मन्त्रव्याख्या—द्विपदाः द्वे पदे यासां ताः द्विपदाः, चत्वारि पदानि यासां ताः चतुष्पदाः, त्रीणि पदानि यासां ताः त्रिपदा याः, षट् पदानि यासां ताः षट्पदाः, याः, विगतं छन्दो याभ्यः ताः विछन्दाः छन्दो लक्षणहीनाः याः, सच्छन्दाः, छन्दोलक्षणयुताः, ताः सर्वाः ऋचो मन्त्राश्च सूचिभिर्नाम शोभनाभिरुक्तिभिः त्वा नाम त्वां शम्यन्तु प्रीणयन्तु, अत एव कृपादृष्ट्या वयमपि त्वां स्तोतुमुपतिष्ठेम इत्यलम् ॥३॥

ओं सहस्तोमाः इत्यस्य याज्ञवल्क्य ऋषिस्त्रिष्टुप्छन्दः पयोदेवता पाठे विनियोगः ।

ओं सहस्तोमा सहच्छन्दस आवृतः सहप्रमा ऋषयः सप्तदैव्याः । पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन् ॥४॥

अथ पदच्छेदः—सहस्तोमाः—सहच्छन्दसः—आवृतः—सहप्रमाः — ऋषयः — सप्तदैव्याः—पूर्वेषां=पन्थां—अनुदृश्य—धीराः—अन्वालेभिरे—रथ्यः—न—रश्मीन् — इति पदच्छेदः ॥ अथमन्त्रव्याख्या—त्रिवृतपञ्चदशादिभिः स्तोमैः सह वर्त्तमानाः सहस्तोमाः, गायत्र्यादिभिः छन्दोभिः सह वर्त्तमानाः सहच्छन्दसः आवृतः नाम कल्पे कल्पे आवर्त्तनशीलाः, प्रमाः नाम यथार्थज्ञानेन सह वर्त्तमानाः सहप्रमाः, देवस्य प्रजापतेस्तेजसा प्रादुर्भूताः दैव्याः, इमे भरद्वाजकश्यपगोतमात्रिविशिष्टविश्वामित्रजमदग्निसंज्ञा; ऋषयः मन्त्रद्रष्टारः, धीराः अप्रतिहतज्ञानाः सप्त सप्तसंख्याकाः कल्पे कल्पे प्रादुर्भवन्ति, इमे शीर्षण्याः शिरसि भवाः शीर्षण्याः श्रोत्रादयः सप्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्चिषोऽपितद्गुणसाम्यात् इमे ऽपि सप्तर्षयो भवन्ति, अयमेव दक्षिणः कर्णो गोतमः. अयमेवोत्तरः कर्णोभरद्वाजः, अयमेव दक्षिणं चक्षुर्विश्वामित्रः, अयमेवोत्तरं चक्षुः जमदग्निः, अयमेव दक्षिणपुटो वशिष्टः, अयमेवोत्तरपुटः कश्यपो वागेवात्रिः सप्तमः, एतदपि ब्राह्मणं भवति एते हि मनो रूप-प्रजापतेरपत्यभूताः सन्तः मनोऽन्तरेण स्वव्यापारे ह्यसमर्थाः भवन्ति। पूर्वकल्पोत्पन्नानां महर्षी-णां पन्थां वैदिकज्ञानमार्गं वर्त्तमानकाल्पिकमहर्षयः अनुदृश्य अनु क्रमेण ज्ञात्वा अनुपश्चात् तद्वैदिकज्ञानं लेभिरे लब्धवन्तः—यथारथ्यः रथेन युक्तः रथनेता सूतः अश्वरश्मीन् प्रग्रहान्, न, इव, हस्तैः गृहीत्वा अग्रे वर्त्तमानं मार्गं प्राप्नोति, तद्वत् वयमपि प्राचीनवेदमार्गेण त्वां स्तोतुमुप-तिष्टेम। इत्यलं ॥४॥

ओं यदित्यस्य याज्ञवल्क्य ऋषिस्त्रिष्टुप्छन्दो मनोदेवता पाठे विनियोगः ॥५॥

ओं यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥५॥

अथपदच्छेदः—यत्—जाग्रतः—दूरम्—उदैति—दैवं—तत्—उ—सुप्तस्य—तथा—एव—एति—दूरङ्गमम्—ज्योतिषाम्—ज्योतिः—एकम्—तत्—मे—मनः—शिवसङ्कल्पम्—अस्तु—इति पदच्छेदः ॥५॥

अथ मन्त्रव्याख्या—यत् दैवं मनः दीव्यति प्रकाशयति सर्वत्रेति देवो विज्ञानात्मा तस्ये-दमिति दैवं मनः इन्द्रियापेक्षया जाग्रतः पुरुषस्य दूरमुदैति दूरगामि भवति—तद्, उ, इति यच्छ-ब्दस्थाने तच्छब्दः, उ, इति चार्थः, यच्च मनः सुप्तस्य पुरुषस्य तथैवैति, सुषुप्तौ यथा गतं भवति तथैवायाति। यन्मनो दूरङ्गमम् भूतभविष्यतवर्त्तमानकालिकपरापरवस्तुसंग्राहकं, यावती द्यौः तावन्मनः, एतन्महिमयुक्तं यच्च मनः ज्योतिषां श्रोत्रादीन्द्रियाणां प्रवर्त्तकं, एकं ज्योतिस्तेषां प्रका-शकमित्यर्थः, विज्ञानात्मा जीवो मनसा युज्यते मनः इन्द्रियै, इन्द्रियाणि चार्थैः सहेति सिद्धान्तात् मनः सम्बन्धमन्तरेण तेषामप्रवृत्तिः, तत् नाम तादृशसामर्थ्ययुक्तं मे मम मनः भो विश्वात्मन्! त्वयि सर्वप्राणात्मनि शिवसंकल्पम् शुद्धसङ्कल्पम् भवतु अत एतदर्थम् वयम् त्वाम् स्तोतुमुपति-ष्टेम इत्यलम् ॥५॥

ओं येनेत्यस्य याज्ञवल्क्य ऋषिस्त्रिष्टुप्छन्दो मनोदेवता पाठे विनियोगः ॥६॥

ओं येन कर्माण्य सो मनीषिणो यज्ञे कृण्वन्तिविदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मेमनः शिवसंकल्पस्तु ॥६॥

तथ पदच्छेदः—येन—कर्माणि—अपसः—मनीषिणः—यज्ञे—कृण्वन्ति—विदथेषु—धीराः—यत्—अपूर्वम्—यक्षम्—अन्तः—प्रजानाम्—तत्—मे—मनः—शिवसङ्कल्पम्—अस्तु—॥६॥

अथमन्त्रव्याख्या—अपसो नाम कर्मनिष्टाः, धीराः नाम सदसद्विवेकवन्तः, मनीषिणो नाम वेदशास्त्रज्ञानसम्पन्नाः यज्ञे यज्ञकर्मणि विदथेषु यज्ञसम्बन्धिहविरादिपदार्थज्ञानेषु सत्सु येन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनसा यज्ञकर्माणि कृण्वन्ति नाम कुर्वन्ति, यच्च मनः अपूर्वम् नाम किमपि हीन्द्रियं यतः पूर्वम् न भवति, तस्यैव मनसः सर्वेन्द्रियप्रवर्त्तकत्वात्, यच्च मनः यक्षं सर्वैः जनैः पूज्यं तस्यैव हर्षोत्पादकत्वात्, यच्च मनः प्रजानां प्राणिनां, अन्तः शरीरमध्ये वर्त्तते । सर्वेन्द्रियाणि बहिष्ठानि सन्ति मनस्तु प्राणिनामभ्यन्तरे वर्त्तते, तादृशगुणविशिष्टं मे मनः हे भगवन् ! जंगमाजंगमप्राणभूते त्वयि भगवति शिवसङ्कल्पम् भवतु; एतदर्थम् त्वाम् वयम् नित्यम् स्तोतुमुपतिष्ठेम । इत्यलम् ॥६॥

ओं यत्प्रज्ञानमित्यस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो मनो देवता पाठे विनियोगः ॥७॥

ओं यत् प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम् प्रजासु । यस्मान्न ऋते किं च न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥७॥

अथ पदच्छेदः—यत्—प्रज्ञानम्—उत्—चेतः—धृतिः—च—यत्—ज्योतिः—अन्तः—अमृतम्—प्रजासु—यस्मात्—न—ऋते—किं—च—न—कर्म—क्रियते—तत्—मे—मनः—शिवसङ्कल्पम्—अस्तु—॥७॥ अथमन्त्रव्याख्या—यन्मनः प्रज्ञानं नाम सदसत्विचारजनकं, उदपि यन्मनः चेतः सामान्यविशेषज्ञानजनकम् यच्च मनः धृत्याश्रयम्, यन्मनः अमृतम् नाम मृत्युरहितम् यन्मनः प्रजासु अन्तः अन्तर्वर्त्तमानं यच्च मनः ज्योतिः रूपम् सर्वेन्द्रियप्रवृत्तिदर्शनात्, यस्मान्मनसः ऋते विना किंचन किमपि कर्म कार्यम् न क्रियते न कृतं भवति, तदीदृशगुणविशिष्टं मे मनो भो स्वामिन् सर्वप्राणात्मनि त्वयि शिवसङ्कल्पमस्तु, ह्येतदर्थम् त्वाम् वयम् स्तोतुमुपतिष्ठेम इत्यलं ॥७॥

ओं येनेदमित्यस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो मनो देवता पाठे विनियोगः ॥८॥

ओं येनेदम् भूतम् भुवनम् भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥८॥

अथ पदच्छेदः—येन—इदम्—भूतम्—भुवनम्—भविष्यत्—परिगृहीतम्—अमृतेन—सर्वम्—येन—यज्ञः—तायते—सप्तहोता—तत्—मे—मनः—शिवसंकल्पम्—अस्तु ॥८॥ अथमन्त्रव्याख्या—येन अमृतेन नाम मृत्युरहितेन मनसेदम् सर्वम् सम्पूर्णम् भूतम् भूतकालसम्बन्धिवस्तुसमूहम्, भुवनम् वर्त्तमानकालसम्बन्धिवस्तुसमूहम्,भविष्यत् भविष्यत्कालसम्बन्धिवस्तुसमूहम परिगृहीतम् नाम सर्वतोज्ञातं भवति, यावती द्यौस्तावन्मनः, त्रैकालिकं ज्ञानं मनसिवर्त्तते, सप्तहोता सप्तहोतारः, होतृमैत्रावरुणादयो यस्मिन् संति स सप्तहोता, यज्ञः अग्निष्टोमादिरूपः, अध्यात्मपक्षेतु द्वौकर्णौ, द्वे चक्षुषी, द्वेनासिके, मुखम् चैते सप्तर्त्विजः सप्तहोतारः यस्मिन् सन्ति स सप्तहोता, संसाररूपी यज्ञोवा, येन मनसा तायते नाम विस्तार्य्यते । ईदृशगुणविशिष्टं मे मनः हे भगवन् ! प्राणात्मनित्वयि शिवसङ्कल्पमस्तु, एतदर्थम् त्वाम् वयम् स्तोतुमुपतिष्ठेम इत्यलम् ॥८॥

ओं यस्मिन्नित्यस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो मनोदेवता पाठे विनियोगः ॥९॥

ओं यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः । यस्मिंश्चितꣳ सर्वमोतम् प्रजानाम् तन्मे मनः शिवसङ्कल्पमस्तु ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः—यस्मिन्—ऋचः—साम—यजूंषि—यस्मिन्—प्रतिष्ठिताः—रथनाभौ—इव—अराः—यस्मिन्—चित्तं—सर्वं - ओतं—प्रजानाम्—तत्—मे — मनः — शिवसङ्कल्पम्—अस्तु ॥९॥ अथ मन्त्रव्याख्या—यस्मिन् मनसि ऋचः प्रतिष्ठिताः यस्मिन् मनसि साम नाम सामानि प्रतिष्ठितानि, यस्मिन् मनसि यजूंषि यजुर्मन्त्राः प्रतिष्ठिताः, यत्र मनसि नामाख्यातोपसर्गनिपाताः प्रतिष्ठिताः सन्ति, दृष्टान्तं दर्शयति, इव यथा रथनाभौ रथचक्रे, अराः नाम तिर्यक्काष्ठविशेषाः प्रतिष्ठन्ते, तद्वत् सर्वमर्थविशिष्टम् शब्दजालम् यत्किंचित् चराचरात्मकम् विश्वम् तत्सर्वम् मनसि प्रतिष्ठितम्, किं च यत्र मनसि प्रजानाम् मनुष्यप्रभृतीनां सर्वम् चित्तम् सर्वपदार्थविषयीज्ञानम् तन्तुसन्ततिः पट इव पुरोतं भवति, तदीदृशगुणविशिष्टं मे मनः शिवसङ्कल्पम् सर्वप्राणात्मनि भगवति त्वयि सदैवास्तु, चैतदर्थम् त्वाम् वयम् स्तोतुमुपतिष्टेम इत्यलम् ॥९॥

ओं सुषारथिरित्यस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो मनो देवता पाठे विनियोगः ॥१०॥

ओं सुषारथिरश्वानिव यन्मनुष्यान् नेनीयतेऽभीशुभिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरम् जविष्ठम् तन्मे मनः शिवसंकल्पमस्तु ॥१०॥

अथपदच्छेदः—सुषारथिः—अश्वान्—इव—यत्—मनुष्यान्—नेनीयते—अभीशुभिः—वाजिनः—इव—हृत्प्रतिष्ठं—यत्—अजिरं—जविष्ठं—तत्—मे—मनः — शिवसंकल्पम् — अस्तु ॥१०॥ अथ मन्त्रव्याख्या—यत् मनः मनुष्यान् प्राणिमात्रोपलक्षितान् सर्वजन्तून् नेनीयते अत्यर्थम् कर्मसु चालयति, दृष्टान्तम् दर्शयति—यथा सुषारथिः शोभनः सारथिः, अभीशुभिः,प्रग्रहैः, वाजिनः नाम वेगयुक्तान् अश्वान् नेनीते पुरोमार्गमत्यर्थं धावयति, तद्वत् यत् मनो हृत्प्रतिष्ठं, प्राणिनां हृदि प्रतिष्ठितं, यन्मनो अजिरं बाल्ययौवनस्थविरादिषु अवस्थासु सतीष्वपि मनो जरादिरहितं भवति, यन्मनः जविष्ठं, अतिशयेन वेगवत्तरम् व्योमवत् व्यापकत्वात्—तदीदृशगुणविशिष्टं सर्वस्वामिनि भगवति त्वयि शिवसङ्कल्पम् शुद्धसङ्कल्पमस्तु—एतदर्थं त्वां वयम् सर्वदा स्तोतुमुपतिष्टेम इत्यलम् ॥१०॥

अथसन्ध्याप्रयोगाः—

ऐशान्याभिमुखः प्रातः मध्याह्ने पूर्वसंगतः ।
पश्चिमाभिमुखः सायं ह्येवं संध्या विधिर्भवेत् ॥

योवाऽऽविदितार्षो यच्छन्दो दैवतविनियोग ब्रह्मणेन मन्त्रेण वा यजते याजयति अध्यापयति वा स्थाणं श्वभ्रं वर्षति प्रमीयते पापीयान् भवति यातयामानि यस्य छन्दांसि भवन्तीति ब्राह्मणवचनात् विधिना याज्यं यष्टव्यम् ॥

स्मृत्योंङ्कारं च गायत्रीं निवध्नीयात् शिखांततः ।
पुनराचम्य हृदेशं नाभिं स्कन्धौ च संस्पृशेत् ॥
प्रातः सन्ध्या सनक्षत्रा मध्याह्ने मध्यभास्करा ।
ससूर्या पश्चिमा सन्ध्या तिस्रः सन्ध्याः उपासत ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्ने ह्येवं सन्ध्या त्रिधा मता ॥
यत्र कुत्रैव जातोऽपि द्विजत्वं प्राप्य मानवः ।
भगवद्भक्तियुक्तश्चेत् सन्ध्योपासनमर्हति ॥

अथसङ्कल्पः.....तत्र.....

ओमद्यममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातः सन्ध्योपासनमहम् करिष्ये—इति सङ्कल्पः—

गायत्र्याशिखां बद्ध्वा रक्षां कुर्यात् ।

ओं शन्नोदेवीरिति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिः गायत्री छन्दः आपो देवताः शान्तिकरणे विनियोगः ॥१॥

ओं शन्नोदेवीरभिष्टये आपोभवन्तु पीतये शंयोरभिस्रवन्तुनः ॥१॥

अथ पदच्छेदः—शं—नः—देवीः—अभिष्टये—आपः—भवन्तु—पीतये—शंयोः—अभिस्रवन्तु—नः ॥ अथ मन्त्रव्याख्या—ताः व्याप्तिशीलाः आपो देवीः नाम देव्यः दीप्यमानाः स्तुतिक्रीडादियोग्याः ब्रह्मसत्तायां वर्त्तमानाः ईशकृपादृष्ट्या नो अस्माकमुपरि ह्यभिष्टयेऽभिषेकायाभीष्टफलप्राप्तये वा पीतये पानाय वाङ्मनःकायपापशमनं यथा भवति शं सुखरूपाः सन्तु । किं च शंयोः रोगाणां शमनं सर्वेषां भयानां योः नाम पृथक्करणं कुर्वन्त्यः आपः नोऽस्माकमुपरि शोभनां वृष्टिमभिस्रवन्तु अन्नसंपत्त्यर्थं काले वर्षां कुर्वन्तु इत्यलम् ॥१॥

ओमद्यमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तं दैवतमश्वमेधावृथे विनियोगः ॥२॥

ओं ऋतं च सत्यं चाभिद्धात् तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्रादर्णवादधिसंवत्सरो अजायत अहोरात्राणिविदधतविश्वस्यमिषतो वशी सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥२॥

अथ पदच्छेदः—ऋतं—च—सत्यं—च—अभिद्धात्—तपसः—अधि—अजायत्—ततः—रात्री—अजायत—ततः—समुद्रः—अर्णवः—समुद्रात्—अर्णवात्—अधिसंवत्सरः—अजायत—अहोरात्राणि—विदधत—विश्वस्य—मिषतः—वशी—सूर्याचन्द्रमसौ—धाता—यथापूर्वं—अकल्पयत्—दिवं—च—पृथिवीं—च अन्तरिक्ष—अथो—स्वः ॥२॥ अथमन्त्रव्याख्या —सर्वविकृतिहेतुभूतप्रकृत्या सह संगतस्य व्योमवदसंगोऽयं पुरुषः" एंव सत्यपि तया सह संगत इव प्रतीयमानस्य परब्रह्मणः चेतनरूपप्रकाशादभितः सर्वतः इद्धात् नाम दीप्यमानात् विचारात्मकज्ञानरूपात् तपसः ऋतं नाम तेजोमयः सर्वभुवनपतिः विश्वमायिको नारायणः पुरुष अध्यजायत प्रादुर्भूतः । तस्य सर्वविकृतिहेतुभूतप्रकृत्या सह संक्रीडमानस्य श्रीनारायणस्य सामर्थ्यात् सत्यं नाम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समष्टिजीवात्मकः प्राणात्मा हिरण्यगर्भो नाम अजायत प्रादुर्भूतः। तत्सामर्थ्यात् रात्री नाम सर्वसंसारहेतुभूता सुषुप्तिसंज्ञा ह्यविद्या प्रादुर्भूता, तत्सामर्थ्यात् अर्णवः समुद्रो नाम व्योम्नि सूक्ष्मरूपेण व्याप्तोऽम्भः समुद्रः प्रादुर्भूतः। अम्भो मरीचिर्मर आपः इति अपां ह्येताः संज्ञाःभवन्ति, आपो वै ह्यम्भोरूपेण व्योम्नि व्याप्ताः, मरीचिरूपेणादित्ये, मररूपेण मेघेषु, ह्यपरूपेण पृथिव्यां। कालकर्मस्वभावतो विकुर्वाणात् सूत्रात्मनो दैवात् त्रिविधोऽहंकारः समुत्पन्नः, सात्त्विको राजस्तामसश्चेति, सात्विकात् देवताः मनुश्च प्रादुर्भूताः, राजसादिन्द्रियाणि, तामसात् कारणकार्य्यक्रमेण पञ्चभूतानि जज्ञिरे। चैवं भूतेन्द्रियदेवतासर्गो दर्शितो भवति। ततो अर्णवादम्भः समुद्रात् ब्रह्माण्डदेहाभिमानी संवत्सरात्मको वैश्वानरो विराडात्मा पुरुषोऽध्यजायत प्रादुर्भूतः इति स धाता ब्रह्माण्डदेहाभिमानी पुरुषो मिषतो नाम प्रलयकाले स्वप्रकृतौ प्रलुप्तस्य विश्वस्य जंगमाजंगमात्मकस्य निर्माणे वशीनाम समर्थः पुरुषः अहोरात्राणि विदधत, अहोरात्राणां विभागं कर्त्तुं यथा पूर्वं पूर्वसृष्ट्यनुसारेण सूर्याचन्द्रमसौ अकल्पयत् निर्मितवान्। अथोऽनन्तरं स प्रजापतिः द्युशब्देन महर्लोकादिलोकचतुष्टयम् सृष्टवान् च पुनः व्योम्नि सो वाष्पमयोऽम्भः समुद्रः प्रादुर्भूतः, उपरि सूर्यविद्युदग्निना सर्वतः संतप्तः सन् मेघरूपेणपरिणतः संघातमयः काठिन्यं प्राप्तः पृथिवी संबभूव, तस्यां प्रजापतिरेव ब्रह्मा भूत्वा मन्वादिक्रमेण सर्वं सृष्टवान्। च पुनः स प्रजापतिः नक्षत्रग्रहतारादिविचित्रं अन्तरिक्षलोकं पुनः नक्षत्रलोकोपरि विराजमानं महेन्द्रलोकम् ह्यन्यदपि नारकादिपापकर्मफलरूपं सर्वं सृष्टवान्। इत्यलम् ॥२॥

ततः सप्रणवगायत्र्या रक्षां कुर्यात्।

ओंकारस्य ब्रह्माऋषिर्गायत्री छन्दोऽग्निर्देवता शुक्लोवर्णः सर्वकर्मारम्भे। विनियोगः ॥१॥

ओं सप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगोतमात्रिवशिष्ठकश्यपाः ऋषयो गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः छन्दांसि अग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवाः देवताः अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः ॥२॥

ओं गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता अग्निमुखमुपनयने प्राणायामे विनियोगः ॥३॥

ओं शिरसः प्रजापतिर्ऋषिस्त्रिपदागायत्री छन्दो ब्रह्माग्निवायुसूर्याः देवताः प्राणायामे विनियोगः ॥३॥

अथ प्राणायामविधिः—

प्रत्येकमोंकारादिसप्तव्याहृतयः, ओंकारा गायत्री। ओंकारद्वयं मध्यस्थं शिरश्चेति। अथासनविधिश्च ऋष्यादिकं स्मृत्वा बद्धासनः सम्मीलितनयनो मौनी प्राणायामत्रयं कुर्यात्। तत्र वायोरादानकाले पूरकनामा प्राणायामः तत्र नीलोत्पलदलश्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत्। धारणकाले कुम्भकस्तत्र कमलासनं रक्तवर्णं चतुर्मुखं ब्रह्माणं हृदिध्यायेत्। त्यागकाले रेचकस्तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्वेतवर्णं त्रिनेत्रं शिवं ललाट देशे ध्यायेत् त्रिष्वपि एतेषु प्रत्येकं त्रिर्मन्त्राभ्यासः प्रमाणमाह—
बद्ध्वासनं नियम्यासून् स्मृत्वाचार्यादिकं ततः। सन्निमीलितदृङ्मौनी प्राणायामान् समभ्यसेत ॥१॥
स्वस्तिकासनमासीनो जपसिद्धिमवाप्नुयात्। जानूर्वोरन्तरे कृत्वा सम्यग्पादतले शुभे ॥२॥
ऋजुकायसमासीनः, स्वस्तिकासन मुच्यते। पद्मासनं समासीनः सम्यग् सिद्धि मवाप्नुयात् ॥३॥
उत्तानौ चरणौ कृत्वा उरु संस्थौ प्रयत्नतः। उर्वो मध्ये तथानाभौ पाणी कृत्वा च तादृशौ ॥४॥
नासाग्रे विनिसेदृ दृष्टिं पद्मासनमिदं भवेत्। पूरकादीनां लक्षणमाह—
नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते। कुम्भको निश्चलश्वासो रुच्यमानस्तु रेचकः ॥५॥
नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितम्। चतुर्भुजं महाविष्णुं पूरकेनैव चिन्तयेत् ॥६॥
कुम्भकेन हृदिस्थाने ध्यायेच्च कमलासनम्। ब्रह्माणं रक्तगौराङ्गं चतुर्वक्त्रं पितामहम् ॥७॥
रेचकेनेश्वरं ध्यायेत् ललाटस्थं महेश्वरम्। शुद्धं स्फटिकसंकाशं निर्मलं पापनाशकम् ॥८॥

अथ प्राणायाममन्त्रः—

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ओं आपो ज्योतिरसोऽमृतम् ब्रह्म भूर्भुवः स्वरोम् ॥३॥

अथ पदच्छेदः—ओं—भूः—ओं—भुवः—ओं—स्वः—ओं—महः—ओं—जनः, —ओं—तपः—ओं—सत्यम्—ओं—तत्—सवितुः—वरेण्यं-भर्गः—देवस्य—धीमहि—धियः—यः—नः—प्रचोदयात्—ओं—आपः—ज्योतिः—रसः—अमृतम्—ब्रह्म—भूः—भुवः—स्वः—ओं ॥३॥

अथमन्त्रव्याख्या—वरेण्यं वरणीयं च संसारभयभीरुभिरादित्यन्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः ॥१॥ जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च, ध्यानेन पुरुषो यस्तु द्रष्टव्यः सूर्यमण्डले ॥२॥ इति याज्ञवल्क्यवचनात् ह्यादित्यमण्डले संसारचक्रप्रवर्त्तको भक्तानां चतुर्वर्गफलप्रदः पुरुष एव सदा ध्येयः, य परमात्मा सर्वान्तर्यामी देशकालवस्तुपरिछेदेशून्यस्तेजोमयः पुरुषः सन् भूरिति भूमिलोकं भुव इत्यन्तरिक्षलोकं स्वरिति स्वर्गलोकं महरिति महर्लोकं जन इति जनलोकं तप इति तपोलोकं सत्यमिति सत्यलोकमेवोपर्युपरिक्रमेणावस्थितान् मायानिर्मितान् सप्तलोकान् अभिव्याप्य प्रदीपवत् यः प्रकाशयति-आपः ज्योतिः रसः अमृतम्-इत्यप्सु यो रससत्ताप्रवर्त्तकः, ज्योतिर्नाम मणिधातुपाषाणप्रभृतिषु व्योमादिसर्वभावेषु च तेजोमयः विद्युत्प्रवर्त्तको भवति-यः सर्ववृक्षौषधितृणप्रभृतिषु रसात्मकः सोमो भूत्वा रसप्रवर्त्तको भवति। यः सर्वप्राणिषु अमृतं नाम जीवनप्रवर्त्तको पुरुषोऽस्ति यः स्वयं चेतात्मा मोक्षस्वरूपः, मोक्षस्वरूपः चेतात्मा कथं जीवनप्रवर्त्तको भवतीत्यत्र युक्तिमाह-प्राणिनां हृदि सूर्यमण्डलमस्ति तन्मध्ये सोममण्डलं तन्मध्ये च तेजः, तेजोमध्ये सत्यं, सत्यमध्ये चेतात्मा भर्गाख्यः तेजोमयः पुरुषोऽस्ति, यो दिवसाभिमानिमित्रदेवतायाः शुक्लवर्णेनोत्तरायणमार्गरूपेण चक्षुषा विदुषः पुरुषान् देशकालवस्तुपरिछेदशून्ये महाब्रह्मभावे गमयति, यस्तेजोमयः पुरुषो रात्र्यभिमानिवरुणदेवतायाः दक्षिणायनमार्गरूपेणः कृष्णवर्णेन चक्षुषा सुकृतिनो यज्ञकर्त्तृन् स्वर्गतिं गमयति। यस्तेजोमयः पुरुषो ह्यग्नेर्लोहितवर्णे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नातिरौद्रेण चक्षुषा पापिनः पुरुषान् नार्कीं गतिं गमयति । य ईदृशगुणविशिष्टः पुरुषः भूर्भुवः स्वरिति व्याहृतिरूपां त्रिलोकीं स्वयं ब्रह्मस्वरूपः, सन् सत्त्वरजस्तमोभिः विष्णुब्रह्मरुद्रात्मभिः—प्रकाशयति, ओमिति स्वयं ओंकारस्वरूपः, तदितिलिङ्गव्यत्ययो, य ईदृशगुणविशिष्टः सर्वव्यवहारनियामकः, तत् तं देशकालवस्तु परिछेदशून्यं सवितुर्नाम सर्वकर्मप्रवर्त्तकस्य देवस्य द्योतमानस्यादित्यस्यान्तर्गतं वरेण्यं सर्वैः प्रार्थनीयं भर्गोरव्यं तेजोमयं पुरुषं वयं धीमहि ध्यायेम स परमात्मा नोऽस्माकं धियः नाम अन्तः करणवासनाः धर्मार्थकाममोक्षभावेषु प्रचोदयात् प्रेरयेत, कदापि वयं पापकर्म नो कुर्याम इत्यलम ॥३॥

ओं सूर्यश्चमेत्यस्य ब्रह्माऋषिः प्रकृतिः छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः ॥४॥

ओं सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्याम् पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किंचिद्दुरितं मयि इदमहमापोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥४॥

इत्यनेन प्रातराचमेत—अथपदच्छेदः सूर्यः—च मा—मन्युः —च —मन्युपतयः —च—मन्युकृतेभ्यः—पापेभ्यः—रक्षन्तां—यत्—रात्र्या—पापं—अकार्षं —मनसा—वाचा—हस्ताभ्यां—पद्भ्यां—उदरेण—शिश्ना—रात्रिः—तत—अवलुम्पतु—यत्—किंचित—दुरितं—मयि—इदं—अह—आपः—अमृतयोनौ—सूर्ये—ज्योतिषि—जुहोमि—स्वाहा ॥४॥

अथमन्त्रव्याख्या—सूर्यश्चेति, दिवि प्रकाशात्मनि सूर्ये वर्त्तमानं ब्रह्म, मन्युश्च मन्युर्यज्ञस्तत्र फलप्रदं ब्रह्म, मन्युः क्रोधो वा क्रोधे रुद्ररूपेण वर्त्तमानं ब्रह्म, मन्युपतयः यज्ञपतयश्चेन्द्रादिदेवताः, अथवा क्रोधपतयो वेन्द्रियाणि तत्र चेतनप्रकाशेन सर्वत्र वर्त्तमान ब्रह्मऽऽस्ति । ताः सर्वाः पूर्वोक्ताः देवताः ब्रह्मणि वर्त्तमानाः मन्युकृतभ्यः क्रोधकृतेभ्यः पापेभ्यो वा शास्त्रविधिरहितं यज्ञादिकृतभ्यः पापेभ्यो मा नाम माम रक्षन्ताम् । ममेनादृशो क्रोधो वा मम वेदविधिरहितयज्ञादिनास्तिकसंस्कारभावो वा मा भवेत, येनाह हिंसादोषदूषितानि क्रूरकर्माणि कुर्याम, यत्पापम् रात्र्यां मनसा वाचा हस्ताभ्याम पद्भ्यामुदरेण शिश्ना कृतम्, अर्थात् रात्रिकाले मनोवाक्पाणिपादोदरशिश्नकेनाहम यत्पापमकार्षम् रात्रौसत्ताप्रदं ब्रह्म तत्सर्वं पापमवलुम्पतु नाशयतु, यत्किंचिन्मयि दुरितं मदाश्रितं पापमस्ति यच्चाभक्ष्यभक्षणादिपापं मया कृतम् हे आपः ! ब्रह्मणिवर्त्तमानाः ! तदिदं सर्वं पापं मनोवाक्कायकृतं, अमृतयोनौ मोक्षधाम्नि ज्योतिषि जङ्गमाजङ्गमप्राणात्मके सूर्यमण्डलस्थे ब्रह्मणि अहम् जुहोमि हवनं करोमि स्वाहा मम सुहुतमस्तु—श्री भगवत्प्रसादतो मे सर्वपापनिवृत्तिरस्तु ॥४॥

अथमध्याह्ने आचमनमन्त्रः—

ओमापः पुनन्त्वित्यस्य विष्णुर्ऋषिरनुष्टुप्छन्द आपो देवता अपामुपस्पर्शने विनियोगः ॥५॥

ओमापः पुनन्तु पृथिवीं पृथिवी पूता पुनातु मां पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रह ँ स्वाहा ॥५॥

अथपदच्छेदः—आपः—पुनन्तु—पृथिवीं—पृथिवी—पूता—पुनातु — माम् — पुनन्तु ब्रह्मणस्पतिः—ब्रह्मपूताः - पुनातु—माम्—यत्—उच्छिष्टम्—अभोज्यम्—च—यत्—वा—दुश्चरितम्—मम—सर्वं—पुनन्तु—मां—आपः—असतां—च—प्रतिग्रहम्—स्वाहा ॥५॥ अथमन्त्रव्याख्या—आप इति आप्नुवन्ति निम्नस्थानम्—वाम्भोरूपेण सर्वत्र व्याप्नुवन्ति इत्यापो मन्त्रे कर्तृपदम्—भगवत्सत्तायां वर्त्तमानाः आपः पृथिवीं पुनन्तु, वृष्ट्या चतुर्विधान्नसंपादनकर्मणा प्रीणयन्तु तर्पयन्तु, पृथिवी पूता सती मां मदभिन्नं सर्वं जङ्गमाजगमात्मकं विश्वम् कर्मफलप्रदानेन पुनातु प्रीणयतु, ब्रह्मपूताः ब्रह्मणा पूताः ताः आपः मां मदभिन्नं सर्वम् विश्वं रोगभयपोडादिशमनपूर्वकं शोभनवृष्ट्या प्रीणयन्तु । मया यदुच्छिष्टान्नादिः भुक्तं यच्चाभोज्यमभक्ष्यभक्षणादिकं कृतम् यद्वा शरीरेन्द्रियमनोभिः मम मयि दुश्चरितं पापमस्ति च पुनः असतां हिंसात्मकानां म्लेच्छादीनां यत् किंचित् प्रतिग्रहादिकं वस्तु मया गृहीतं तत्सर्वं मे पापं भगवत्सद्भावभाविताः आपः पुनन्तु शमयन्तु, आचमनकाले स्वाहा सुष्ठु हुताः आपः मां मदीयान्तःकरणं पुनन्तु, दोषेभ्यः शोधयन्तु, इत्यलम् ॥५॥ निर्णयमाह मनुःस्मृतिशास्त्रात् विपरीता या स्मृतिः सा न मन्तव्येति मनुवचनमाश्रित्य मध्याह्ने सन्ध्या न कर्त्तव्येति केचिद्वदन्ति मनुनाऽनुक्तत्वात् ह्येतन्न प्रमाणं यत उक्तम्—

प्रातः सूर्यश्चमेत्युक्ता सायमग्निश्चमेत्यपि । आपः पुनन्तु मध्याह्ने कुर्यादाचमनं ततः ॥१॥
गायत्री नाम पूर्वाह्णे सावित्री मध्यमेदिने । सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा मता ॥१॥

अथ सायं सन्ध्याचमनमन्त्रः—

ओमग्निश्चमेति रुद्र ऋषिः प्रकृतिश्छन्दोऽग्निर्देवतापामुपस्पर्शने विनियोगः ॥६॥

ओमग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यापद्भ्यामुदरेण शिश्नाऽऽहस्तदवलुम्पतु यत् किंचिद्दुरितं मयि इदमहमाममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥६॥

अथपदच्छेदः—अग्निः—च—मा—मन्युः—च—मन्युपतयः—च—मन्युकृतेभ्यः—पापेभ्यः—रक्षन्तां—यत्—अह्ना - पापम्—अकार्षम्—मनसा—वाचा—हस्ताभ्यां — पद्भ्यां—उदरेण—शिश्ना—अहः—तत्—अवलुम्पतु—यत्—किंचित् — दुरितं — मयि — इदम्— अहम्—माम्—अमृतयोनौ—सत्ये—ज्योतिषि—जुहोमि—स्वाहा ॥६॥ अथमन्त्रव्याख्या — अग्निश्चेति,

ऊर्धगतिश्च भोक्तृत्वं हविर्वहनमेव च । देवतावाहनं चात्र जीवानां व्यक्तिकारणम् ॥१॥
दृष्टिदर्शनशक्तिश्च यज्ञसंपादनं तथा । ह्यग्नि कर्मैव तत्सर्वं चतुर्वर्गफलप्रदः ॥२॥

ईदृशगुणविशेष्टोऽग्निः सर्वदेवतात्मा ब्रह्मणि वर्त्तमानो मन्युश्चमन्युर्यज्ञस्तत्रफसप्रदं ब्रह्मवर्त्तते, मन्युः क्रोधो या तत्र रुद्ररूपेण वर्त्तमानं ब्रह्म मन्युपतयश्च यज्ञपतयः इन्द्रादिदेवनाः क्रोधपतयः इन्द्रियाणि वा तेषु पूर्वोक्तेषु सर्वत्र प्रकाशकम् ब्रह्म वर्त्तते, तत्सर्वदेवताः ब्रह्मप्रति ष्ठिताः भगवत्कृपादृष्ट्या मन्युकृतेभ्यः क्रोधकृतेभ्यः पापेभ्यो वा वेदविधिविहीनयज्ञभावो वा माऽभूत्—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

येनदुष्टभावेनाहं हिंसादिक्रूरकर्म कुर्याम, यत्पापमहाकार्षं कृतवानस्मि, तत्पापं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना शिश्नेन्द्रियेण कृतवानस्मि तत्पापमहो नाम दिवा प्रकाशकर्त्ता विश्वात्मा अवलुम्पतु नाशयतु—यत् किंचित् दुर्वासनाजनितपापम् मयि मम हृदि वर्त्तते तत्सर्वं पूर्वोक्तं पापजातं, तेनेदं मम मदीयान्तःकरणमलविक्षेपावरणदोषत्रयेण च मलीमसमहमसृतयोनौ मुक्तिपदस्वामिनि भगवति सत्ये सत्यात्मकेज्योतिषि सर्वजगत्प्रकाशके जुहोमि हवनरूपेण शमयाग्नि स्वाहा मम शुभाशुभकृतं कर्म सुष्टु हुतमस्तु। अलमतिविस्तरेण ॥६॥

ओमापोहिष्ठेत्यादिऋचस्य सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता मार्जने विनियोगः ॥७॥

ओमापोहिष्ठामयो भुवः। ओं तान ऊर्जे दधातन। ओं महेरणाय चक्षसे। ओं यो वः शिवतमो रसः। ओं तस्य भाजयते हि नः। ओमुशतीरिव मातरः। ओं तस्मा अरङ्गमामवः। ओं यस्य क्षयाय जिन्वथ। ओमापो जनयथा च नः ॥७॥

अथ पदच्छेदः—आपः—हि—स्था—मयोभुवः। ताः—नः—ऊर्जे—दधातन। महे—रणाय—चक्षसे। यः—वः—शिवतमः—रसः। तस्य—भाजयत—इह—नः। उशतीः—इव—मातरः। तस्मै—अरं—गमाम—वः। यस्य—क्षयाय—जिन्वथ। आपः—जनयथ—च—नः ॥७॥

अथ मन्त्रव्याख्याविधिश्च—आपो हिष्ठेत्यादि ऋचस्य सप्तभिः पादैः शिरसि, अष्टमेन भूमौ, नवमेन पुनः शिरसि कुशत्रयेण जलं क्षिपेत। यतोहि—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमा। तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥१॥

इति वचनात् सर्वं जङ्गमाजङ्गमात्मकं विश्वं ह्यचलब्रह्मसत्तायां वर्त्तते। आप इति मन्त्रे सम्बोधनम्—हे आपो हि यस्मादचलब्रह्मप्रतिष्ठायां वर्त्तमानाः यूयं मयोभुवः मया सुखं भावयन्ति प्रापयन्ति, इति मयोभुवः, सुख संपादकाः स्थ भवथ, उपासकाय मे सुखरूपाः सन्तु। ता नः ऊर्जे दधातन, ता इति तस्मादित्यर्थे बहुलं छन्दसि, इति सूत्रेण तादेशस्तस्माद्धेतोः हे आपः। ब्रह्मसत्तायां वर्त्तमानाः यूयं नोऽस्माकं ऊर्जे अन्नाय ह्यन्नसंपादनाय वृष्टिं दधात नकारोऽत्र उपजनः काले वृष्टिं कुरुत इत्यर्थः—यथा वयं सर्वे परमेशकृपादृष्ट्या सुखिनः स्याम तथा कुरुत। हे आपो यूयं ब्रह्मप्रतिष्ठिताः नोऽस्माकं महे नाम महते रणाय रमणीयाय चक्षसे चक्षुषे दर्शनाय महद्रमणीयाय दर्शनाय सर्वत्र ब्रह्मदृष्टिविचारयोग्याय आदधात आस्मन्तात् कुरुत इति हे आपो भगवत्प्रसादतः वो युष्माकं यः शिवतमो रसः शान्ततमः धर्मसम्पत्तिसुखहेतुरसोऽस्ति तं रसं इहास्मिन् लोके कर्माधिकारे स्थितान् नोऽस्मान् यूयं भाजयत तद्रसभागिनः कुरुत। अत्र दृष्टान्तं दर्शयति, उशतीरिव मातरः—इव यथा उशतीः नाम उशत्यः प्रीतियुक्ताः मातरः स्वस्तन्येन पुत्रान् पालयन्ति—तद्वत् यूयमपि भगवत्प्रसादतः पालयत नः। हे आपो यूयं यस्य क्षयाय जिन्वथ क्षयायेति षष्ठ्यर्थे चतुर्थी—क्षयो निवासो, यस्य निवासस्य सर्वाश्रयस्य रसस्य ह्येकांशेन सर्वं चराचरात्मकं विश्वं जिन्वथ यूयं तर्पयत। तस्मै रसाय तस्य प्राप्तये वयं वो युष्मान् अरं अत्यर्थं गमाम गच्छेम। यूयं नो अस्मान् धर्मं प्रजोत्पादनसमर्थान् जनयथ कुरुत इत्यलम् ॥७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओं द्रुपदादिवेत्यस्य कोकिलो राजपुत्र ऋषिरनुष्टुप्छन्द आपो देवता सौत्रामण्यवृत्थे विनियोगः ॥८॥ ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव, पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥८॥

अथपदच्छेदः—द्रुपदात्—इव—मुमुचानः—स्विन्नः — स्नातः —मलात्—इव—पूतं—पवित्रेण—इव—आज्यं—आपः—शुन्धन्तु—मा—एनसः ॥८॥ अथ कृत्यम्—ततः करेण जलमादाय वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत।

आपः पुण्याः समादाय त्रिः पठेन द्रुपदामृचम। तत्तोयं मूर्ध्नि विन्यस्य सर्वपापैः प्रमुच्यते ॥

अथ मन्त्रव्याख्या—द्रुपदादिव मुमुचानः इति यथातपेन स्विन्नः पुरुषः स्वेदं प्राप्तः घर्मार्त्तो मनुष्यो वृक्षमूलं प्राप्य मुमुचानः स्वेदात् मुक्तो भवति, स्वेदरहितो भवति, शान्त—इति यावत् यथा जले स्नातः पुरुषो मलात् मुक्तो भवति—यथा पवित्रेण आज्यं पवित्रं भवति, हे प्रजापते! विश्वात्मन् युष्मत्सत्तायां प्रतिष्ठिताः आपः एव मा मां एनसः कायवाङ्मानसपापात् शोधयन्तु, मुञ्जादिषीकका इव सर्वपापात् पृथक् कुर्वन्तु, इत्यलम् ॥८॥

ओमघमर्षण सूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तं दैवतमश्वमेधावृत्थे विनियोगः ॥८॥ ओं ऋतं च सत्यं चाभिद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रोऽर्णवः समुद्रादर्णवादधिसंवत्सरोऽजायत अहोरात्राणि विदधद् विश्वस्य मिषतोवशी सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥९॥

अथ विधिः—तथा करस्थं जलं नासिकायां संयोज्य अयतासुरनायतासुः वा त्रिः सकृद्वा पूर्वोक्तमृतमित्यादिमन्त्रेणाघमर्षणं जपेत—

करेणोद्धृत्य तोयं वै घ्राणमासज्य तत्पुनः। अयतप्राणश्च यतप्राणः त्रिः सकृद्वाघमर्षणम् ॥१॥

अयं मन्त्रः पूर्वं व्याख्यातः ॥९॥

ओमन्तश्चरसीतिं मन्त्रस्य तिरश्चीन ऋषिरनुष्टुप्छन्द आपो देवता अपामुपस्पर्शने विनियोगः ॥१०॥ ओमन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः, त्वं यज्ञस्त्वं वषट्कार आपो ज्योति रसोऽमृतम ॥१०॥

अथपदच्छेदः—अन्तः—चरसि —भूतेषु —गुहायां—विश्वतोमुखः—त्वं—यज्ञः—त्वं—वषट्कारः—आपः—ज्योतिः—रसः—अमृतम ॥१०॥ अथ विधिः—अघमर्षणमेवात्र कर्त्तव्यं पापशोधनम्। अन्तश्चरसि मन्त्रेण पुनराचमनं भवेत॥ अथमन्त्रव्याख्या—आप इति मन्त्रे सम्बोधनम्—त्वं चेति मन्त्रे जातौ चैकवचनं पदं—हे आपः ब्रह्मणि वर्त्तमानाः ब्रह्मसद्भावभाविताः प्राणरूपेण त्वं भूतेषु सर्वप्राणिष्वन्तः मध्ये चरसि, ब्रह्माण्डरूपगुहायां समष्टिप्राणरूपेण त्वं सूत्रात्माऽऽसि—अतः त्वं विश्वतोमुखोऽसि सर्वतो व्यापकोऽसि, ह्यग्निष्टोमादियज्ञेषु वर्त्तमानस्त्वं यज्ञरूपोसि, देवानां हविः प्रदानेन वषट्कारनाम्ना त्वं समर्थोऽसि, ज्योतिरादित्यरूपेण त्वं सर्वजगत्प्रकाशकोऽसि, आदित्यो हि विश्वोत्पत्तिस्थितिप्रलयकर्त्ता भासते, सोमरूपेण सर्वौषधिषु रसात्मकः सन् त्वं व्यापकोऽसि—यत्—उक्तम्—सोमो हि दर्शायां रसरूपेण नानौषधिषु प्रविशति—षोडशकला-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्मकः सोमो दर्शायां सूर्यसंगतः सन्, तस्य सोमस्य पंचदशकलाः स्वकारणभूतासु देवतासु प्रतिगच्छन्ति, तस्य ह्येकाध्रुवाकला ह्यादित्ये तिष्ठति, पुनः शुक्लपक्षे प्रतिपदि जायते ह्येवमादित्यात्पुनः पुनः जन्म भवति, चेत्थं जीवोऽपिषोडशकलासम्पन्नो भवति, तस्य प्राणवियोगकाले पंचदशकलाः स्वकारणभूतासु देवतासु गच्छन्ति, एका ह्यहंकृतिरूपा कला कर्मसंस्कारसंस्कृता सूत्रात्मनि जीवानां समस्तशरीरात्मनि तिष्ठति, तेन प्रेर्य्यमाणो जीवः कर्मसंस्कारनिमित्तेन संसारेऽत्र जन्म प्राप्य कलापूर्त्या वृद्धिं प्राप्नोति, कलाह्रासेनापक्षीयते, ह्येवं चन्द्रवृद्धिह्रासवत् सृष्टीचक्रेऽत्र जीवानां पुनः पुनः जन्ममृत्यू भवतः, एषा जीवावस्था प्रसंगतो मयाऽऽभिहिता॥ दर्शायां रसरूपेण जङ्गमाजङ्गमात्मकमूर्त्तिभावेषु सोमः प्रविष्टोभवति, तत्पूजार्थं ह्यमावस्यायां कस्यचिदपि प्राणिनः प्राणान् न विच्छिन्द्यात्, इति शिष्टाचारो दर्शितः, हे आपस्त्वममृतमसि, अम्भो मरीचिर्मर आपः एताः संज्ञाः प्राप्तोऽपि स्वयं मृत्युरहितोऽसि, इत्यलम् ॥१०॥

अथोपस्थानविधिः

ततोभूम्यलग्नगुल्फतलभागो वा भूमिलग्नैकचरणो वा भूमिलग्नार्धचरणो वा प्रातः सायं कृताञ्जलिर्मध्याह्ने ऊर्ध्वबाहुः सूर्यमुपनिष्ठेदेभिर्मन्त्रैः प्रमाणमाह—

तत्संसक्तपार्ष्णिर्वा चैकपापादार्धपादपि—प्रातः कृताञ्जलिः सायमूर्ध्वबाहुस्तदन्तरा ॥१॥

जलाञ्जलिं गृहीत्वा तु तर्जन्यङ्गुष्टवर्जितम्। वीक्ष्य भानुं क्षिपेद्वारि गायत्र्या चाभिमन्त्रितम् ॥२॥

ह्यनेन विधिना ध्यायन् सूर्यस्थं पुरुषं परम्। ह्यौपस्थानिकमन्त्रैश्च ध्याता याति परं पदम॥३॥इत्यलम्—

ओं उद्वयमित्यस्य प्रस्कण्व ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः ॥११॥

ओमुद्वयं तमसस्परिस्वः पश्यन्त उत्तरं। देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥११॥

अथपदच्छेदः—उद्—वयं—तमसः—परिस्वः—पश्यन्तः — उत्तरं — देवं—देवत्रा—सूर्य्यं—अगन्म—ज्योतिः—उत्तमम् ॥११॥ अथमन्त्रव्याख्या—तमसः तमो बाहुल्यात् अविद्यालक्षणात् मृत्युलोकात् स्वरिति स्वर्गे लोके देवत्रा नाम देवेषु उत्तरं उत्कृष्टतरं उत्तमं ब्रह्मज्योतिः सूर्य्यमण्डलस्थं आनखाग्रातः सर्वनस्तेजोमयं परमं पुरुषं परिपश्यन्तो सूर्य्यं देवं द्योतनात्मकं स्तोतुं वयं उदगन्म छन्दसिकालस्यानियमात् उद्गच्छेम स नोऽविद्यापारं नयतु इत्यलं ॥११॥

ओमुदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्य्योदेवता सूर्योपस्थाने विनियोगः ॥१२॥

ओमुदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम् ॥१२॥

अथपदच्छेदः—उत—उ—त्यम् — जातवेदसम् — देवम्—वहन्ति—केतवः—दृशे—विश्वाय—सूर्य्यम् ॥१२॥ अथमन्त्रव्याख्या—केतवः सूर्य्यरश्मयः उ वितर्के इति त्यं नाम तं जातवेदसम् जातानि वेदांसि सर्वज्ञानानि यस्मात् स जातवेदः सर्वविश्वप्रकाशकः सूर्य्यमण्डलस्थः पुरुषोऽस्ति जातवेदस्तं जातवेदसं देवं द्योतनात्मकं सूर्य्यमण्डलस्थं तेजोमयं पुरुषं विश्वाय विश्वस्य चराचरस्य दृशे दर्शनाय प्रकाशनाय ते सूर्य्यरश्मयः उद्वहन्ति धारयन्ति, तमादित्यस्थं पुरुषं वयं स्तोतुमुपतिष्ठेम। स नो दोषान् व्यपोहतु ॥१२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओं चित्र मित्यस्य कौत्स ऋषि स्त्रिष्टुप्छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः ॥१३॥ ओं चित्रं देवानामुद्गादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने राप्रा द्यावा पृथिवी अन्तरिक्ष ँ सूर्य्य आत्मा जगतस्तस्थुषश्च ॥१३॥

अथपदच्छेदः—चित्रम्—देवानाम्—उद्गात्—अनीकम्—चक्षुः—मित्रस्य—वरुणस्य—अग्नेः—आप्राः—द्यावा—पृथिवी—अन्तरिक्षम्—सूर्य्यः—आत्मा—जगतः—तस्थुषः—च ॥१३॥

अय मन्त्रव्याख्या—चित्रमेतत्—यदन्येषां नक्षत्रादीनां ज्योतींषि स्वस्मिन् गृह्णन् सन् यो देवानां सूर्य्यरश्मीनां अनीकं मुखं नाम आश्रयः स सूर्य्यमण्डलस्थस्तेजोमयः पुरुषः उद्गात् लङर्थे लुङ्—उद्गच्छति दर्शनपथमागच्छति—यो दिवाधिपतेः मित्रदेवतायाः यदुत्तरायणरूपमार्गरूपं शुक्लवर्णं चक्षुरस्ति तस्य प्रकाशकः शुक्लवर्णेनैव चक्षुषा प्राणोपासकान् विद्वद्वरान् उत्तरायणमार्गेण सूर्य्यमण्डलद्वारा तेजोमयं ब्रह्मलोकं गमयति, राज्यधिपतेः वरुणदेवतायाः यद्दक्षिणयनमार्गरूपं कृष्णवर्णं चक्षुरस्ति तस्य प्रकाशकः तेन कृष्णरूपेणैव चक्षुषा यज्ञादिकर्म कुर्वतो यजमानपुरुषान् सोममण्डलद्वारा स्वर्गादिकर्मफलभूतान् लोकान् गमयति । अग्नेर्यत् लोहितं रूपं चक्षुरास्ति तस्य प्रकाशकः तेनातिरौद्रेण लोहितरूपेण चक्षुषा दुराचारान् पुरुषान् जन्ममृत्युजरादिरूपे संसारवर्त्मनि पुनः पुनः भ्रामयति घोरतरां च नार्कीं गतिं गमयति । यः सूर्य्यमण्डलस्थस्तेजोमयः पुरुषो द्यावा पृथिवी दिवं भूमिं चान्तरिक्षलोकान् स्वकीयतेजसा आप्राः आसमन्तात् आपूरितवान् जगतो जंगमस्य तस्थुषः स्थावरस्य च सूर्य्यमण्डलस्थः पुरुष एवात्मा तं सूर्य्यमण्डलस्थं सर्वनियन्तारं पुरुषं वयं स्तोतु मुपतिष्ठेम । स न पापानि व्यपोहतु इत्यलम् ॥१३॥

ओमद्भ्य इत्यस्य नारायण ऋषि र्भूरिणार्षिस्त्रिष्टुप्छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः ॥१४॥ ओमद्भ्यः संभृतः पृथिव्यैरसाच्च विश्वकर्मणः समवर्त्तताग्रे । तस्य त्वष्टा विदधद् रूपमेति तन्मर्त्यस्य देवत्वमाजा३नमग्रे ॥१४॥

अथपदच्छेदः—अद्भ्यः—संभृतः—पृथिव्यै—रसात्—च—विश्वकर्मणः—समवर्त्तत—अग्रे—तस्य—त्वष्टा—विदधत्—रूपम्—एति—तत्—मर्त्यस्य—देवत्वम्—आजानम्—अग्रे ॥१४॥

अथमन्त्रव्याख्या—अद्भ्यः पृथिव्यै नाम पृथिव्याः पृथिवी अद्भ्यश्चोपलक्षितपंचभूतेभ्योऽग्रे पूर्वं विश्वं कर्म यस्य स विश्वकर्मा कालः पुनः तस्य कालस्य रसात् नाम गतिविशेषात् अग्रे पूर्वं नारायणस्तेजोमयः पुरुषः सगुणमूर्त्तिः समवर्त्तत नाम प्रादुर्भूतः । तस्य नारायणस्य यद्रूपं त्वष्टा सूर्य्यो विदधत् विशेषेण धारयन् सन् एति नाम उदयं प्राप्नोति, दृष्टिपथमागच्छति श्रीनारायणस्य तद्रूपं मर्त्यस्य नाम चराचरात्मकसृष्टितोऽपि अग्रे पूर्वं आजानं देवत्वं देवानां रूपं संबभूव । द्विविधाः देवताः सन्ति । ये कर्मभिः स्वर्गं साधयन्ति ते कर्मदेवाः भवन्ति । ये प्रजपतेरपत्यभूताः सृष्ट्यादौ ब्रह्मेन्द्रवरुणसोमसूर्य्यपर्जन्यरुद्रयमपृथिवीशानादयः प्रादुर्भूताः, ते आजानदेवाः—इत्थं जीवाः अपि द्विविधाः—कर्मजीवाः मनुष्याः पशवः । स्थावराश्च प्राकृताः संति, यदा ब्रह्मज्ञानं विना शिश्नोदरपरायणाः मनुष्याः कुत्सितमाचरन्ति, तैः कुत्सितकर्मभिः पशुतां यान्ति। तैः सकामभेदेन वर्त्तन्ते, क्षीणे चाशुभकर्मफले मनुष्येषु जन्म प्राप्य जायन्ते मनुष्याः एवं कर्मभिर्बद्धाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मज्ञानेन मुक्ताः भवन्ति नान्ये, इति प्रसङ्गत उक्तम् । ईदृशगुणविशिष्टं सूर्यमण्डलस्थं तेजोमयं पुरुषं वयं समुपतिष्ठेम, स नो दोषान् व्यपोहतु इत्यलम् ॥१४॥

ओं तच्चक्षुरिति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिरक्षरातीत पुर उष्णिक् छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः ॥१५॥

ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शत ꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥१५॥

अथपदच्छेदः—तत्—चक्षुः—देवहितं—पुरस्तात्—शुक्रं—उच्चरत्—पश्येम—शरदः—शतं—जीवेम—शरदः—शतं—शृणुयाम—शरदः—शतम्—प्रब्रवाम—शरदः—शतम्—अदीनाः—स्याम—शरदः—शतम्—भूयः—च—शरदः—शतात् ॥१५॥

अथमन्त्रव्याख्या—यत्देवहितं देवानां हितं प्रियंकारणं शुक्रं निर्मलं तेजः तत् चक्षुर्नाम जगतां प्रकाशक्रियास्थितिकारणं सूर्य्यमण्डलस्थं पुरुषलक्षणं विश्वतमो निवारकं पुरस्तात् नाम पूर्वस्यां दिशि उच्चरत उदयं प्राप्नोति तस्य प्रसादात् शरदः शतं वर्षाणि वयं पश्येम—अस्माकं दृष्ट्युपघातो माऽऽभूत । शरदः शतं वर्षाणि वयं जीवेम अस्माकं प्राणवियोगो माऽऽभूत । शरदः शतं वर्षाणि वयं शृणुयाम अस्माकं वाधर्य्यमाऽऽभूत् । शरदः शतं वर्षाणि वयं अदीनाः स्याम अस्माकं दैन्यं माऽऽभूत्। पुनः पुनः शरदः शतात् शतवर्षेभ्यो अग्रेऽपि भगवत्प्रसादात् अव्याहतेन्द्रियवृत्तयः सन्तः सदैव शुभकर्माणि कुर्वन्तो वयं जीवेम । वस्तुतया अस्माकं प्राणेन्द्रियव्यवहारः सूर्याहते न सिध्यति, सर्वं विश्वं मृतप्रायं भवति अत एव सूर्य्यस्थं दिव्यं पुरुषं स्तोतुं वयमुपमिष्ठेम स नो दोषान् व्यपोहतु ॥१५॥

अथाङ्गन्यासः—ओं हृदयाय नमः—ओं भूः शिरसे स्वाहा—ओं भुवः शिखायै वषट्—ओं स्वः कवचाय हुं—ओं भूर्भुवः नेत्रत्रयाय वौषट्—ओं भूर्भुवः स्वः अस्त्राय फट् ॥१६॥

अथ व्याख्या—

ब्रह्मणे हृदयं प्रोक्तं विष्णवे शिर ईरितम् । शिखा रुद्राय कवचमीश्वराय समीरितम् ॥१॥
नेत्रं सदाशिवायोक्तं ह्यस्त्रसर्वात्मने स्मृतम् । प्रणवो भूर्भुवः स्वश्चस्वाङ्गानि हृदयादयः ॥२॥
त्रिरावर्त्त्य तथापश्चादार्षं छन्दश्च दैवतम् । विनियोगास्तथा रूपं ध्यातव्यं क्रमशस्तु वै ॥३॥

ओं हृदयाय ब्रह्मणे नमः, ओं भूः शिरसे विष्णवे स्वाहा, ओं भुवः शिखायै रुद्रायवषट्, ओं स्वः कवचाय ईश्वराय हुं, ओं भूर्भुवः नेत्रत्रयाय सदाशिवाय वौषट्, ओं भूर्भुवः स्वः अस्त्राय सर्वात्मने फट् ॥१६॥

ओं वाग् वाग् ओं प्राणः प्राणः, ओं चक्षुः चक्षुः ओं श्रोत्रं श्रोत्रं, ओं नाभिः, ओं हृदयम्, ओं कण्ठः, ओं मुखम्, ओं शिरः, ओं शिखा, ओं बाहुभ्याम् यशोबलम्, करतलकरपृष्ठाभ्याम् ॥ इतीन्द्रियस्पर्शः ॥१७॥

अथ व्याख्या—स परमात्मा वाचि वाक् शक्तिं कुर्वन् प्राणे प्राणशक्तिं कुर्वन् चक्षुषि चक्षुशक्तिं कुर्वन् श्रोत्रे नः श्रोत्रशक्तिं कुर्वन् नाभौ समानशक्तिं कुर्वन् हृदि हुं शक्तिं कुर्वन् कण्ठे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चोदानशक्तिं कुर्वन् मुखे चापाने भोक्तृत्वशक्तिं कुर्वन्, शिरसि विज्ञानशक्तिं कुर्वन् शिखायां तैजसीं शक्तिं कुर्वन्, बाहुभ्यां बाह्वोः यशोबलं कुर्वन् सर्वेन्द्रिययशःशक्तिप्रदानेन स परमात्मा धर्ममार्गे प्रवर्त्तयतु इत्यलं ॥१७॥

ओं कारस्य ब्रह्मा ऋषिर्गायत्री छन्दोऽग्निर्देवता शुक्लो वर्णः। जपे विनियोगः॥१॥ ओं त्रिव्याहृतिनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभः छन्दांसि अग्निवाय्वादित्याः देवताः जपे विनियोगः ॥२॥ ओं गायत्र्याः विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः ॥३॥

अथावाहनमन्त्रः—

ओं तेजोऽसीति देवाः ऋषयः शुक्रं देवतं गायत्री छन्दो गायत्र्यावाहने विनियोगः ॥१८॥

ओं तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥१८॥

अथपदच्छेदः—तेजः—असि—शुक्रं—असि—अमृतं—असि—धाम—नाम—असि—प्रियं—देवानाम्—अनाधृष्टं—देवयजनं—असि ॥१८॥ अथमन्त्रव्याख्या—गायन्तं त्रातवतीति गायत्री तस्याः सम्बुद्धौ हे गायत्री। त्वं सूर्यमण्डलस्था सती तेजोमयपुरुषरूपेण सर्वप्रकाशिकाऽऽसि, त्वममृतमसि नाम द्योतनात्मके दिवि ब्रह्मलोके निष्कामोपासकानाममृतधामासि, त्वं स्वयमपि धामनामासि नामेति प्रसिद्धौ तेजो रूपासि, जाग्रतस्थाने त्वमिन्द्रियज्योतिर्दाऽऽसि, स्वप्नस्थाने त्वं मनोज्योतिर्दासि, सुषुप्तिस्थाने ह्यज्ञानवृत्त्या त्वमात्मज्योतिरानन्दानुभवात्मासि, प्रियं देवानां तेजोरूपेण सर्वदेवात्माऽऽसि, ह्येवं सती त्वं देवयजनमसि सूर्यमण्डलस्थतेजोमयपुरुषरूपेण श्रीभगवदुपासनस्थानमसि, हे ब्रह्मस्वरूपे गायत्रि! त्वदुपासकाः सर्वपापराशितो मुच्यन्ते, अत एव कायवाङ्मनः पापनिवृत्त्यर्थं जपयज्ञं विधातुं त्वां वयं ह्याह्वयामः इत्यलम् ॥१८॥

अथ ध्यानमन्त्रः

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परो रजसेऽसावदो मा प्रापत् ॥१९॥

सूर्य मित्युपस्थानेन मन्त्रेण ध्यानपूर्वकं नमस्कुर्यात्—

अथ पदच्छेदः—गायत्री—एकपदी—द्विपदी—त्रिपदी—चतुष्पदी—अपद्—असि—न—हि—पद्यसे—नमः—ते—तुरीयाय—दर्शताय—पदाय—परः—रजसे—असौ—अदः—मा—प्रापत्—॥१९॥

अथमन्त्रव्याख्या—हे गायत्री। ब्रह्मरूपे। जाग्रतावस्थाभिमानिविश्वात्मना त्वमेकपदी असि। स्वप्नावस्थाभिमानिहिरण्यगर्भसमष्टिप्राणात्मना त्वं द्विपदी असि, सुषुप्त्यवस्थाभिमानि महेश्वरेण पुरुषेण त्वं त्रिपदी असि। साक्षितया वर्त्तमानेन तुरीयपदरूपेण सूर्य्यमण्डलस्थभगवता तेजोमयपुरुषेण त्वं चतुष्पदी असि, अत एव चतुर्भिः पादैः त्वदुपासकाः त्वामुपासते, अतः परं सर्वव्यापकरूपेण त्वमपदसि केनापि नहि पद्यसे न ज्ञायसे, ध्याताध्यानध्येयात्मकैः त्रिभिर्भेदैरविषयत्वात्, चतुर्थपादं प्राधान्यतया नमस्करोति, नमः तुरीयाय ते विराड् हिरण्यगर्भश्चकारणं चेत्युपाधयः ईशस्य, यत् त्रिभिर्हीनं तुरीयं धाम ते विदुरिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वचनात्, उपाधित्रयहीनाय तुरीयाय दर्शताय पदाय नमः, आदित्यान्तर्गतपुरुषो वै दर्शतं पदं वर्ण्यते, रजांसि वै लोकः, इति यास्कोक्तेः, रजेभ्यो नाम लोकेभ्यः परः स परोरजस्तस्मै परोरजसे, परोक्षशब्द वच्छब्दप्रयोगः, चैतद्विशेषणविशिष्टाय तुभ्यं नमोऽस्तु, असौ यो नास्तिकः त्वत्प्राप्ति-विघ्नकर्त्ता अदः त्वत्प्राप्तिविघ्नकर्त्ता अदः त्वत्प्राप्तिविघ्नकर्त्तृत्वं मम मा प्रापत्—मा प्राप्नोतु इत्यलम्॥१९

अथ गुरुमन्त्रः—

ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ओं ॥२०॥

गायत्री मन्त्रार्थः प्राणायाममन्त्राख्याने दर्शितः ॥२०॥

अथ जपविधिः—ओंकारं पूर्वमुच्चार्य भूर्भुवस्वस्तथैव च ।
गायत्री प्रणवं चान्ते जपयज्ञः प्रकीर्त्तितः ॥१॥
गायत्र्यष्टोत्तरशतसंख्याकं जपं कुर्यात् ॥

ओं देवा इति मनसस्पति ऋषि विराट् छन्दो वायुर्देवता गायत्री विसर्जने विनियोगः ॥२१॥

अथ विसर्जनयन्त्रः

ओं देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत इमं देवयज्ञ ँ स्वाहा वातेधाः ॥२१॥

अथपदच्छेदः—देवाः—गातुविदः—गातुं—वित्त्वा—गातुं—इत—मनसस्पते— इमं—देवयज्ञं—स्वाहा—वाते—धाः ॥२१॥

अथमन्त्रव्याख्या—

ध्यानं त्वावाहनं चैव जपयज्ञप्रवर्त्तनम् । क्षमापनं च देवस्य प्रणिपत्य विसर्जनम् ॥१॥

देवाः इति दीव्यन्ति सृष्टिचक्रं प्रकाशयन्तीति देवाः मन्त्रे सम्बोधनं हे देवाः गीयते प्रतिपाद्यते मन्त्रैरिति गातुर्नाम जपयज्ञः, तं गातुं विदन्तीति गातुविदः देवाः भोगातुविदो देवाः । यूयं गातुं जपयज्ञं वित्त्वा जपयज्ञं समाप्तं विदित्वेत्यर्थः तस्य फलं च ब्रह्मणि समर्पयितुं यूयं इत नाम गच्छत इत्यर्थः हेमनसस्पते । मनो रक्षक देव । इमं हि मदनुष्ठितं देवस्य तव जपयज्ञं त्वयि समर्पयामि । स च जपयज्ञस्त्वयि समर्पितः सन् स्वाहा, सुष्ठु हुतो भवेत् । तव प्रीत्यर्थं स्यात्, हे विश्वात्मन् त्वं मे यज्ञफलं वातेधाः, वायुरूपे सूत्रात्मनि सर्वप्राणिसमष्टिप्राणात्मके देवेऽस्मत्समर्पितं जपयज्ञं धाः, नाम धेहि स्थापय । स सूत्रात्मा देवः तेषु कर्मफलरूपेषु शरीरेषु मां नयतु । यत्र यत्र शरीरेषु त्वज्ज्ञानसंपन्नाः वयं त्वदाराधनं कुर्वन्तः भोगान् भुञ्जामहि । यत्र यत्र तनुषु भोगार्थं वयं गच्छेम । तत्र तत्र कर्मफलप्रदानेन सूत्रात्मा देवो मां भगवत्स्मरणलक्षणाराधनं कारयतु । इत्यलम् ॥२१॥

अग्नि सहस्र नेत्राब्दे संवत्सरे हि वैक्रमे । पिण्डोरीपुण्यतीर्थेऽस्मिन् गोकुलचन्द्र सूरिणा ॥१॥
सन्ध्या भाष्य कृतिः पुण्या हरौ ह्येषा समर्पिता । तुनोतु मंगलं नित्यं सत्यं मनसि भाविता ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हरि ओं तत्सत् ब्रह्मणे नमः

शुक्लयजुर्वेदसंहिता

श्रीमदाचार्य श्रीगोकुलचन्द्रप्रणीतमंगलभाष्यसहिता

तत्र प्रथमाध्यायः

प्रथमा—हरिः ॐ ॥ इषे त्वोर्जे त्वा वायवे स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥

मयागोकुलचन्द्रेण पिण्डोरीधामवासिना
यजुर्वेदस्य शुक्लस्य कृता मन्त्रार्थदीपिका ॥

अथ प्रथमाध्याये दर्शपूर्णमासेष्टिविषयाः मन्त्राः—तत्रेषेत्वेति द्विपदस्त्र्यक्षरोमन्त्रः तस्य दैव्यनुष्टुप्छन्दः शाखा देवता पलाशशाखा छेदने विनियोगः ॥ ऊर्जे त्वेति द्विपदस्त्र्यक्षरो मन्त्रः दैव्यनुष्टुप्छन्दः शाखासन्नमने विनियोगः ॥ अयं यजुर्मन्त्रः शमीशाखा वा पलाशशाखा वा विकल्पः । अस्य मन्त्रस्य परमेष्ठी ऋषिः अथ मन्त्रस्य पदच्छेदः । इषे —त्वा —ऊर्जे —त्वा —वायवः —स्थ—देवः — वः —सविता—प्रार्पयतु—श्रेष्ठतमाय —कर्मणे —आप्यायध्वं—अघ्न्याः—इन्द्राय—भागं—प्रजावतीः —अनमीवा—अयक्ष्माः—मा —वः —स्तेनः —ईशत—मा—अघशंसः —ध्रुवा—अस्मिन् —गोपतौ —स्यात—बह्वीः—यजमानस्य —पशून् —पाहि ॥ अयं मंत्रोगोरक्षणमभिधत्ते — इष्यते कांक्ष्यते प्राणिभिर्धान्यनिष्पत्त्यर्थं सा इट् कर्मणि क्विप् श्रुत्या वृष्टि व्याख्याता, तस्मात् चतुर्थ्येकवचनं, इषशब्दगत इकारो धातुस्वरेण प्रातिपदिकस्वरेण चोदात्तः, स्वरविधौ व्यंजनस्याविद्यमानत्वात् चतुर्थ्येकवचनस्य प्रत्ययत्वादाद्युदात्तत्वे प्राप्ते अनुदात्तौ सुप्पितौ, इत्यनेनानुदात्तत्वे प्राप्ते सावेकाचस्तृतीयादिर्विभक्तिः पा० ६।१।१६८॥ इत्युदात्तत्वं तस्मिन् सति, अनुदात्तं पदमेकवर्जं । पा० सू० ६।१।१५८॥ इति इषेः इकारोऽनुदात्तः । विभक्तिगतैकार उदात्तः, तथा सति अनुदात्तादिकं उदात्तांतं, इदं, इषे चेति पदं सिद्धं । त्वेति शब्दोऽनुदात्तः । ऊर्जबलप्राणनयोः, अस्मात् क्विप् ऊर्जति प्राणवन्तं करोति इति ऊर्क् अन्नं तच्चतुर्थ्येकवचनं, स्वरः इषे वत् । संहिता तु, उदात्तस्य स्वरितः पा० सू० ८।४।६६। इति त्वा शब्दस्य स्वरितत्वं । मंत्रद्वयस्य संहितायां, ऊर्ज इति ऊकारस्य स्वरितात्संहितायामनुदात्तानां पा० सू० १।२।३९ इत्येकश्रुतौ प्राप्तायां उदात्तस्वरितपरस्य सन्नतरः पा० सू० १।२।४० इत्यंतनीचोऽनुदात्तो भवति । अग्निमस्य त्वा शब्दस्य स्वरितत्वं । एवमुत्तरपदेषु संहितायां स्वराः ऊहनीयाः । वायवः वातेर्गत्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्थात् "कृवा पाजिभिस्वदि साध्यशूभ्य उण्। उ० सू० १।१। इत्युणि सति शिष्टप्रत्यय स्वरेणांतोदात्तो वायुशब्दः जसः सुप्तात्, अनुदात्तत्वं' जसि चेति गुणेऽवादेशे कृते, स्थानेऽन्तरतमः, इति परिभाषया, उदात्ते जाते वायव इति मध्योदात्तं पदं अस्तेर्लटि शपो लुकि, श्नसोरल्लोपः, पा० ८।१।२८। इति निघातः, स्वरितात्संहितायामनुदात्तानां स्थ, इति इति एकश्रुतिः एवमग्रेऽपि स्वरा ऊहनीयाः। देव इति अनुदात्ताद्युदात्तांतः, वः इति स्वरितः, सविता इति मध्यानुदात्तः, प्रार्पयतु, प्रा इति उदात्तः प इनि स्वरितः, यतु इति अन्तानुदात्तश्च, श्रेष्ठतमाय इति ञ्नित्यादिर्नित्यमिति आदि उदात्तत्वं ततः पुनः तमप् तस्य पित्वात् अनुदात्तत्वं। स्वरितप्रचयः पूर्ववत्। कर्मणे इति आदि उदात्तो मध्यस्वरितो अन्ताऽनुदात्तश्च, आप्यायध्वम् इति आदि उदात्तत्वं स्वरितप्रचयाः पूववत्। अघ्न्या इति अन्तानुदात्तः, इन्द्राय इति मध्यस्वरितः, भागं इति अन्तोदात्तः, प्रजा इति उदात्तांतः, तस्य स्वरित प्रचयाः पूर्ववत्। अनमीवा नञ्सूभ्यां इत्यंतोदात्तः, अयक्ष्माः इति तद्वत् स्वरः, मा, इति उदात्तः वः इति स्वरितः, स्तेनः इति अंतोदात्तः, ईशत इति निघातः, मा इति उदात्त अघशंस इति पूर्वपदप्रकृतिस्वरत्वं, ध्रुवा इति अंतोदात्तः. अस्मिन् इति उदात्तत्वं। गोपतौ इति मध्यस्वरितः, स्यात् इति तिङ्ङतिङः, निघातः, बह्वीः इति अन्दोदात्तः, यजमानस्य इति आद्युदात्तः, पशून् इति अंतोदात्तः पाहि इति तिङ्ङतिङः इति निघातः, एवमग्रेऽपि ऊहनीयाः स्वराः विस्तारभयान्नोक्तम्।

अथ मन्त्रार्थः क्रियापदाध्याहारेण इति—हे पलाशशाखे! इषे नाम वृष्टयर्थं त्वा नाम त्वां छिनद्मि। हे पलाशशाखे! ऊर्जे नाम वृष्टिगतो जलात्मको रसः ऊर्जशब्देनोच्यते तदर्थं त्वा नाम त्वां संनमयामि ऋजूकरोमि। गोपालनार्थं च वत्सान् प्रत्याह—हे वत्साः! यूयं वायवः स्थ मातृभ्यः सकाशात् अन्यत्र वायुगतयो भवत मातृभिः सह गमने सति सायं दोहो न लभ्यते। तासां गवां मध्यत एकां गां पृथक् कृत्य देवो व इति मंत्रेण शाखयोपस्पृशेत्। हे गावः। देवः सविता परमेश्वरः वो युष्मान् प्रभूततृणोपेतं वनं प्रार्पयतु नाम संगमयतु। तत्र तृणं चरित्वा पुष्टा भवत, किमर्थं श्रेष्ठतमाय कर्मणे श्रेष्ठतमं कर्म यज्ञोऽस्ति, यज्ञसिद्ध्यर्थं हे अघ्न्याः! गावः! हन्तुमयोग्याः! यूयमिन्द्राय भागमिन्द्रमुद्दिश्य पयोरूपं भागं आप्यायध्वम् नाम समंतात् वर्धयध्वम् नाम प्रभूतक्षीरं कुरुत, हे गावः! वो युष्माञ्जपहर्तुं स्तेनो नाम चौरो मा ईशत समर्थो मा भूत् अघशंसोव्याघ्रादिगोमांसभक्षकोऽपि समर्थो मा भूत्। किं भूताः यूयं यजमानस्य गृहे प्रजावतीः बह्वपत्याः, अनमीवाः कृमिदष्टादिस्वल्परोगरहिताः, अयक्ष्माः नामरोगराजादिप्रबलरोगरहिताः, किं च यूयं गोपतौ अस्मिन् यजमाने, युष्माकं पत्यौ ध्रुवा नाम स्थिराः शाश्वतिकीः बह्वीः बहुविधाः स्यात् नाम भवत। हे पलाशशाखे! त्वमुन्नतप्रदेशे स्थित्वा यजमानस्यारण्ये संचरतः पशून् चौरव्याघ्रादिभयात् पाहि नाम रक्ष। अलमतिविस्तरेण (गावो वै शरणं समस्तजगतां कुर्वन्तु नो मंगलम्) ॥१॥

(द्वितीया)

ओं वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा असि। परमेण धाम्ना दृꣳहस्व मा ह्वार्माते यज्ञपतिर्ह्वार्षीत् ॥२॥

अथपदच्छेदः—वसोः—पवित्रं—असि—द्यौः—असि—पृथिवी—असि—मातरिश्वनः—घर्मः—असि—विश्वधा—असि—परमेण—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धाम्ना—दंहस्व—मा—ह्वाः—मा—ते—यज्ञपतिः—ह्वार्षीत् । अथशब्दनिरुक्तिः — वसन्ति भूता'—नि यस्मिन् सः वसुस्तस्य,पुनातिविश्वमिति पवित्रं, दीव्यतीति द्यौः, मातरि नामांतरिक्षे श्वयति गच्छतीति मातरिश्वा तस्य, घृक्षरणदीप्तयोः इति घर्मः, विश्वं दधातीति विश्वधा । अथ मन्त्रार्थः—हे वायो ! वसोः नाम यज्ञपुरुषस्य संबंधिविश्वरूपस्य हविषस्त्वं पवित्रमसि,हे गौः ! यथा द्यौः वृष्टिद्वारा पृथिवीं पूरयति तथा त्वमपि दुग्धेन स्थालीं पूरयसि, अत एव त्वं द्यौरसि हे स्थालि ! मृज्जलाभ्यां निष्पन्ना त्वं पृथिवीरूपाऽऽसि, यथा वृष्टिद्वारा पृथिवी पूर्णा भवति, तथा त्वमपि पयसा पूर्णा भवसि । हे उखे त्वं मातरिश्वनो नाम वायोः घर्मो नाम दीपकोऽन्तरिक्षलोकरूपाऽऽसि, तस्मात् त्रयणां लोकानां धारणात् त्वं विश्वधाऽऽसि, पृथिवीरूपेण विश्वधारणसमर्थाऽऽसि, किं च परमेण धाम्ना उत्कृष्टेन तेजसा हे पृथिवीरूपस्थालि ! त्वं मा ह्वाः कुटिला मा भव, किं च नो यज्ञपतिः त्वत्संबंधियजमानः मा ह्वार्षीत कुटिलो मा भूत्, अत एव त्वदीयेन दार्ढ्येन ह्येतद्विश्वं कुटिलं न भविष्यति, इत्यलं विस्तरेण ।

स्थाली वै पृथिवी सुदेवयजने गावश्च दुग्धायनाः॥ यज्ञो वै शरणं समस्त यजुषांकुर्यात् सदा मंगलम् ॥२॥

(अथ तृतीया)

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥३॥

अथपदच्छेदः—वसोः—पवित्रं—असि—शतधारं—वसोः — पवित्रं — असि — सहस्रधारं—देवः—त्वा—सविता—पुनातु—वसोः—पवित्रेण—शतधारेण—सुप्वा—कां—अधुक्षः ॥ अथमन्त्रार्थः—हे पवित्र रूप वायो ! वासयति विश्वमिति वसुस्तस्य वसोः नाम यज्ञपुरुषस्य संबंधिपयसः पवित्रं नाम पावनमसि । शतधारं शतसंख्याकाः धाराः यस्मिन्, वसोरिति पुनरुक्तिरादरार्थः, हे वायुरूप पवित्र ! वसोर्नाम यज्ञपुरुषस्य गोसंबंधिपयसः त्वं पावनमसि, सहस्रसंख्याकाः धाराः यस्मिन्, एव भूत हे गोक्षीर ! वसोः यज्ञपुरुषस्य संबंधिनंत्वां सविता देवः त्वा नाम त्वां पुनातु, केन स्वरश्मिरूपेण पवित्रेण पुनः शतसंख्याधारयुक्तेन, सुप्वा नाम साधु पावनेन, गवि दुग्धायां सत्यां, अध्वर्युः दोग्धारं प्रति पृच्छेत् हे दोग्धः गवां मध्ये कां गां अधुक्षः नाम दुग्धवानसि ॥३॥

गौर्वै नाम पयः सुविश्वयजने दद्यात्सदा पालिता ।

(अथ चतुर्थी)

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः । इन्द्रस्य त्वा भाग ᳕ सोमेनातनक्मि विष्णो हव्य ᳕ रक्ष ॥४॥

अथपदच्छेदः—सा—विश्वायुः—सा — विश्वकर्मा — सा — विश्वधायाः— इन्द्रस्य—त्वा—भागं—सोमेन—आतनक्मि — विष्णो—हव्यं—रक्ष ॥ अथ मंत्रार्थः — या गौः त्वया दुग्धा मया च पृष्टा, सा विश्वायुः, बाल्ययौवनस्थविररूपाणि विश्वानि नाम सर्वाणि, आयूंषि यस्याः संति सा विश्वायुः यजमानस्य संपूर्णमायुः प्रयच्छतीत्यर्थः या द्वितीया गौस्त्वया पृष्टा सा विश्वकर्मा विश्वानि सर्वाणि कर्माणि सफलानि यस्याः संति सा विश्वकर्मा, या तृतीया गौ स्त्वया पृष्टा सा विश्वधायाः विश्वान् नाम सर्वान् देवासुरमनुष्यराक्षसान् क्षीरदधिनवनीतघृतहविदानेन दधाति नाम पुष्णातीति विश्वधायाः दधाते असुन् प्रत्ययोणिच्च, आतो युक्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिण्कृतोः। हे दुग्ध! इन्द्रस्य भागं त्वां सोमेन नाम सोमवल्लीरसेन आतनच्मि दध्यर्थं कठिनीकरोमि! हे विष्णो! यज्ञ पुरुष! अस्मदीयं हव्यं रक्ष असुरेभ्यः। श्री विष्णुर्हविषां सुदेव यजने कुर्यात्सदा रक्षणम् ॥४॥

(अथ पञ्चमी)

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि ।५।

अथ पदच्छेद—अग्ने—व्रतपते—व्रतं—चरिष्यामि—तत्—शकेयम्—तत्—मे—राध्यतां—इदं—अहं—अनृतात्—सत्यं—उपैमि। अथमंत्रार्थः—हे अग्निरूप परमेश्वर हे व्रतपते! विश्वयज्ञस्य सर्वनियमपालक अप उपस्पृश्य—त्वत् प्रसादात् यज्ञस्य व्रतं नाम नियममहं चरिष्यामि हे अग्ने तत् यज्ञकर्मकर्तुमहं शकेयं शक्तोभूयासम् तत् यज्ञकर्म मे मम फलपर्य्यंतं राध्यतां सिध्यतु अहं यजमान अस्मादनृतात् मनुष्यजन्मनः उद्गत्य सत्यं देवताशरीरं उपैमि प्राप्नोमि, अनृतं मनुष्यजन्म शीघ्रं विनाशित्वात्,सत्यं वै देवजन्म-बहुकालस्थायित्वात् इत्यलम्। अग्निर्वै शरणं समस्त यजुषां कुर्यात्सनो मंगलम् ॥५॥

(अथ षष्ठी)

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति । कर्मणे वां वेषाय वाम् ॥६॥

अथ पदच्छेदः—कः—त्वा—युनक्ति—सः—त्वा—युनक्ति—कस्मै—त्वा—युनक्ति—तस्मै—त्वा—युनक्ति—कर्मणे—वां—वेषाय—वां ॥ अथ मंत्रार्थः—अत्र मन्त्रं—प्रयुञ्जानोऽध्वर्युर्यज्ञारम्भकर्मणि स्वकर्तृत्वमपहाय प्रजापतेः कर्तृत्वं यज्ञे प्रतिपादयति, हे यज्ञ त्वां कः पुरुषोऽत्र युनक्तीति प्रश्नः—सर्ववेदप्रकाशको यः प्रजापतिः परमेश्वरोऽस्ति स एव परमेश्वरः हे यज्ञ त्वां युनक्ति, पुनरपि कस्मै प्रयोजनाय त्वां युनक्ति तस्मै प्रजापतये परमेश्वरप्रीत्यर्थं त्वां युनक्तीत्युत्तरम्, सर्वकर्माणि परमेश्वरप्रीत्यर्थमनुष्ठेयानीति सिद्धांतः, हे यज्ञकर्म हे यज्ञपात्र, वां नाम युवां यज्ञकार्यार्थमहमाददे, इति शेषः, किमर्थं वेषाय नाम यज्ञप्रेरितकर्मसु व्याप्त्यर्थं युवामहमाददे, इत्यलं। यज्ञो वै शरणं समस्तयजुषां कुर्यात्स नो मंगलम् ॥६॥

(अथ सप्तमी)

प्रत्युष्ट ꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्त ꣳ रक्षो निष्टप्ता अरातयः। उर्वन्तरिक्ष मन्वेमि।७

अथ पदच्छेदः—प्रत्युष्टं—रक्षः—प्रत्युष्टाः—अरातयः—निष्टप्तं—रक्षः—निष्टप्ताः—अरातयः—उरु—अंतरिक्षं—अन्वेमि ॥ अथ—मन्त्रार्थः—हे व्रतपतेऽनेनाग्निहोत्रयज्ञेन रक्षो नाम विघ्नरूपारक्षो जातिः प्रत्युष्टं प्रत्येकं दग्धं, अरातयो नाम यज्ञदानरहिताः नास्तिकाः—अपि प्रत्युष्टाः प्रत्येकं दग्धाः, यज्ञपात्रेषु निगूढं नितरां गूढं गुप्तं विघ्नरूपं रक्षः निष्टप्तं निः शेषेण तप्तं संतप्तं, यज्ञदानरहिताः अरातयः नास्तिकाः अपि निष्टप्ताः निः शेषेण तप्ताः संतप्ताः, ईदृशो यज्ञप्रभावः, अनेनाग्निहोत्रयज्ञप्रभावेण उरु विस्तीर्णं अन्तरिक्षमार्गं अहं अन्वेमि अनुसृत्य स्वर्लोकं गच्छामि, अनेन मंत्रेण रक्षो निराक्रियते इत्यलम् ॥ तद्रक्षो हननं सुदेवयजने मन्त्रैः कृतं सूरिभिः। विष्णुर्यज्ञपतिः समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥७॥

(अथाष्टमी)

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः। देवानामसि वह्नितम ꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः—धूः — असि —धूर्व—धूर्वन्तं—धूर्व—तं—यः — अस्मान् —धूर्वति—तं—धूर्व—यं—वयं—धूर्वामः—देवानां—असि—वह्नितमं—सस्नितमं—पप्रितमं—जुष्टतमं —देवहूतमम् ॥ अथ मंत्रार्थः—हे वह्ने । त्वं धूरसि रक्षसां हिंसकोऽसि, तुर्वी, थुर्वी, दुर्वी, धुर्वी, हिंसार्थाः धातवः, धूर्वतेः क्विप्, यतः धूरसि, अतः धूर्वन्तं हिंसतं पाप्मानं त्वं धूर्व विनाशय, किं च यः राक्षसादिर्यागविघ्ननास्मान् धूर्वति नाम हिंसितुमुद्युक्तः तमपि धूर्वामो हिंसितुमुद्यताः तमपि धूर्व विनाशय, हे हविर्धान पात्र, त्वं देवानां संबंधि असि कथं—वह्नितमं वहति देवान् इति वह्निः अतिशयेन शुद्धं, पप्रितमं नामातिशयेन पूरितं. जुष्टतमं देवानामतिशयेन प्रियं, देवाः आहूताः शीघ्रमागच्छन्ति येन तद्देवहूतमिति देवहूतमम् ॥८॥ वह्निर्वै जगतां समस्तयजने कुर्यात्सदा मंगलम् ॥९॥

(अथ नवमी)

अहुंतमसि हविर्धानं दृꣳहस्वं मा ह्वर्मा-
तें यज्ञपतिर्ह्वार्षीत् । विष्णुस्त्वा क्रमतामुरु
वातायापहतꣳरक्षो यच्छन्तां पञ्च ॥९॥

अथ पदच्छेदः—अहुतं — असि —हविर्धानं—दृंहस्व—मा—ह्वः—मा—ते—यज्ञपतिः;—ह्वार्षीत्—विष्णुः—त्वा—क्रमतां—उरु—वाताय—अपहतं—रक्षः—यच्छन्तां—पञ्च । अथ मन्त्रार्थः—हे हविर्धान यज्ञपात्र त्वमहुतं नाम अकुटिलमसि, अत्र यज्ञे तव भंगभीतिर्नास्ति, हविषां धारकं पोषकं च भवसि अतः स्वात्मानं दृंहस्व दृढं कुरु, मा ह्वः कुटिलं मा भव, मा ते तव यज्ञपतिः यजमानः ह्वार्षीत्, अत्र यज्ञे कुटिलो मा भवतु, हे संसार यज्ञ संचारक ! आदित्यरथविष्णुः व्यापको यज्ञपुरुषस्त्वा क्रमनां पादेनाक्रम्यारोहतु नाहं समर्थ इति भावः, यज्ञाय वाताय उरु विस्तीर्णो भव, रक्षो यज्ञविघातकं मयाऽऽपहृतं निराकृतं पञ्च नाम पञ्चांगुलयो हविर्यच्छंतां निगृह्णन्तु इत्यलम् । सूर्यो वै जगतां पतिः स्वकिरणैः पुष्णातु लोकान् सदा ॥९॥

(अथ दशमी)

देवस्य त्वा सवितु प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां। अग्नये जुष्टं गृह्णाम्यग्नीषोमा-
भ्यां जुष्टं गृह्णामि ॥१०॥

अथ पदच्छेदः—देवस्य—त्वा — सवितुः प्रसवे—अश्विनोः—बाहुभ्यां — पूष्णः — हस्ताभ्यां—अग्नये—जुष्टं—गृह्णामि—अग्निषोमाभ्यां—जुष्टं—गृह्णामि । अथ मंत्रार्थः—हे हविः सवितुर्देवस्य प्रसवे प्रेरणे सति, तेन प्रेरितोऽहं अग्नये जुष्टं नाम प्रियं त्वां गृह्णामि नामं स्वीकरोमि, अग्निषोमाभ्यां व्यासक्तदेवताभ्यां जुष्टं प्रियं त्वां गृह्णामि नाम स्वीकरोमि काभ्यां साधनाभ्यां-अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां, अश्विनौ हि देवानामध्वर्यू, पूषा हि देवानां भागधुक् सर्वात्मकस्याग्नेर्हविः मनुष्येण गृहीतुमशक्यं किं च सत्यं देवाः, अनृतं मनुष्याः, अतो देवभावनया हविः सत्यं भवति, स्वाभिमानेन मनुष्यैः कृतमनुष्ठानं निष्फलं भवति, देवप्रसादार्थं अग्नये जुष्टं अग्निसोमाभ्यां जुष्टं हविः ग्रहणं कर्त्तव्यमित्यलम् । देवा हि शुभहव्यकर्मकरणे दीव्यन्ति शक्ति सदाः । बाहू वै हविषां पतेश्च पूषा कुर्वन्तु नो मंगलम् ॥१०॥

(अथैकादशी)

भूतायं त्वा नारातये स्वरभिविख्येषं
दृꣳहन्तां दुर्याः पृथिव्यां उर्वन्तरिक्षमन्वे-
मि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या
उपस्थेऽग्ने हव्यꣳरक्ष ॥११॥

अथ पदच्छेदः — भूताय —त्वा —न—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अरातये—स्वः—अभिविख्येषं-हंहन्तां—दुर्याः—पृथिव्यां—उरु—अन्तरिक्षं—अनु—एमि—पृथिव्याः—त्वा—नाभौ—सादयामि — अदित्याः—उपस्थे—अग्ने—हव्यं—रक्ष । अथ मन्त्रार्थः—हे यज्ञहविःशेष । यागांतराणां ब्राह्मणभोजनस्य च सद्भावाय त्वां संपरिशेषयामि; इति शेषः न अरातये अदानाय नास्तिकायाहं त्वां न शेषयामि स्वरादित्यं स्वर्गं वा यज्ञपुरुषं वाभिविख्येषं, अभितो विशेषेण ख्यापयेयं नाम पश्येयमनेन मन्त्रेण प्राङ्मुखो भूत्वा यज्ञभूमिं वीक्षते, पृथिव्यां वर्त्तमानाः दुर्याः ग्रहाः हंहन्तां दृढाः भवन्तु, सोऽहं यज्ञकर्मणा उरु विस्तीर्णं अन्तरिक्षमार्गमनुसृत्य स्वर्गं एमि नाम गच्छामि, हे हविः शेष पृथिव्याः नाभौ मध्ये त्वां सादयामि स्थापयामि, तस्यैव पुनः व्याख्यानं, यथा सुप्तं बालपुत्रं माता स्वांके स्थापयति, एवमिदं हव्यं त्वं रक्ष सुप्तं पुत्रमिव बाधकेभ्यः पालयेत्यलम् । विष्णुर्वै हविषां पतिश्च यजने कुर्याच्छुभं सर्वदा ॥११॥

(अथ द्वादशी)

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्र यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम् ॥१२॥

अथ पदच्छेदः — पवित्रे—स्थः—वैष्णव्यौ—सवितुः — वः — प्रसवे —उत्पुनामि—अच्छिद्रेण—पवित्रेण — सूर्यस्य—रश्मिभिः—देवीः-आपः-अग्रेगुवः-अग्रेपुवः-अग्रे—इमं—अद्य यज्ञं—नयत—अग्रे—यज्ञपतिं — सुधातुं — यज्ञपतिं — देवयुवम् । अथ मन्त्रार्थः—यज्ञे पवित्रे छिनत्ति पवित्रे स्थः इति वैष्णवे प्राप्ते व्यत्ययो बहुलमिति स्त्रीत्वं मन्त्रार्थ—हे वायो हे सूर्यरश्मयः युवां विश्वयज्ञस्य पवित्रे स्थो भवथः कथं भूतौ युवां, विष्णुर्वै यज्ञपुरुषः तस्य यज्ञे स हे आपः सवितुर्देवस्य प्रसवे नाम आज्ञायां प्र र्त्तमानोऽहं वो युष्मान् अच्छिद्रेण पवित्रेण अच्छिद्रो वै वायुः, तेन पवित्रेण पुनः सूर्य रश्मिभिः उत्पुनामि, उत्कर्षेण पुनामि, हे देवं आपः द्योतनात्मिकाः आपः यूयमद्यास्मिन् दि इमं इदानीं प्रवर्त्तमानं यज्ञं अग्रे नयत पुरतः प्र र्त्तयत निर्विघ्नं प्रापयत—किं भूताः यूयं आ गुवः अग्रे गच्छन्तीति अग्रेगुवः, पुरतो निम्नदे प्रति गमनशीलाः तथा अग्रेपुवः अग्रे पुनन्तीति अग्रेपुवः आप्यायनशोधनशीलाः किं च यज्ञ पतिं यजमानं अग्रे नयत यूयं फलभोगाय प्रेरयत कीदृशं सुधातुं सुष्ठु दक्षिणादिभिः यज्ञं दधा नाम पुष्णाति इति सुधातुस्तं यज्ञस्य पतिं पाल यितारं तथा देवयुवं देवान् कामयति इति देव युस्तं देवयुवं—इदं युरिदं कामयमानः निरुक्त इत्यलम् । आपो वै शरणं समस्तजगतां कुर्वन्तु नो मंगलम् ॥१२॥

(अथ त्रयोदशी)

युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिताः स्थ । अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि । दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥१३॥

अथ पदच्छेदः—युष्माः—इन्द्रः — अवृणीत—वृत्रतूर्ये—यूयं —इन्द्रं —अवृणीध्वम् — वृत्रतूर्ये—प्रोक्षिताः— स्थ—अग्नये—त्वा—जुष्टं—प्रोक्षामि—अग्नीषोमाभ्यां —त्वा — प्रोक्षामि—दैव्याय—कर्मणे—शुन्धध्वम्—देवयज्यायै—यद् - वः—अशुद्धाः—पराजघ्नुः—इदं —वः—तत्—शुन्धामि । अथ मन्त्रार्थः—हे आपः इन्द्रो देवः वृत्रतूर्ये नाम वृत्रवधे निमित्तभूते स

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युष्माः नाम युष्मान् "अकारः छान्दसः" अवृणीत नाम प्रार्थितवान्, यूयमपि इन्द्रं अवृणीध्वम् वृत्रवधे निमित्तभूते वृतवत्यः सहकारित्वेन स्वीकृतवत्यः, तस्मिन् वृत्रवधावसरे प्रोक्षिताः स्थ हे आपः यूयं वृष्टिरूपेण प्रोक्षिताः भवथ, हे हविः अस्मिन् संसारयज्ञे अग्नये त्वां जुष्टं अभिरुचितं त्वां प्रोक्षामि, अग्नीषोमाभ्यां त्वां जुष्टं अभिरुचितं प्रोक्षामि, जलेन शोधयामि,हे विश्वयज्ञपात्राणि यूयं शुन्धध्वम् शुद्धानि भवत, किमर्थं दैव्याय कर्मणे, अग्न्यादिदेवतासंबंधिने कर्मणे, तदेव कर्म दर्शयति, देवयज्यायै यागक्रियायै,अशुद्धाः नीच जातयः राक्षसादयः वःयुष्माकं संबंधि यदंगं पराजघ्नः नाम हस्तेन पस्पृशुः अशुद्धं चक्रुः तद्युष्माकं अंगं शुन्धामि शोधयामि इत्यलम्। इन्द्रो वै सदने च विश्वयजने कुर्यात् सुवृष्टिं सदा ॥१६॥

(अथ चतुर्दशी)

शर्मास्यवधूत ꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रतित्वादितिर्वेत्तु। अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥१४॥

अथ पदच्छेदः—शर्मा - असि — अवधूतं—रक्षः—अवधूताः—अरातयः — अदित्याः — त्वग्—असि—प्रति —त्वा —अदितिः — वेत्तु— अद्रिः—असि – वानस्पत्यः —ग्रावा —असि — पृथुबुध्नः—प्रति—त्वा—अदित्याः—त्वग्—वेत्तु। अथ मन्त्रार्थः—हे कृष्णाजिन रूप भूमित्वक् त्वं उलूखलस्य यज्ञसाधनस्य धारणार्थं शर्मा असि सुखहेतुरसि, भूमित्वग्रूपे कृष्णाजिने गुप्तं विघ्नरूपं रक्षः अवधूतं नाम कृष्णजिनकम्पनेन भूमौ पातितम्, एवम् अरातयोऽपि पातिताः, हे यज्ञासन त्वं अदित्याः भूमिदेवतायाः त्वगसि ततोऽदितिः भूमिस्त्वां प्रतिवेत्तु प्रतिगृह्य मदीयेयं त्वगिति वेत्तु जानातु,हे उलूखल त्वं यद्यपि वानस्पत्यो दारुमयोऽसि तथाऽऽपि अद्रिरसि, पाषाणसदृशोऽसि, किं भूतः पृथुबुध्नः स्थूलमूलोऽसि, हे उलूखल ग्रावासि दार्ढ्येन पाषाणसदृशोऽसि, अदित्याः त्वग् असि सा त्वां प्रति वेत्तु स्वकीयत्वेन जानातु इत्यलम्। यज्ञो वै करणैः समस्तयजने कुर्यात्स नो मंगलम् ॥१४॥

(अथ पञ्चदशी)

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ॥१५॥

अथ पदच्छेदः—अग्नेः—तनूः—असि—वाचः—विसर्जनम्—देववीतये—त्वा—गृह्णामि—बृहत्—ग्रावा—असि—वानस्पत्यः—सः—इदं-देवेभ्यः-हविः—शमीष्व-सुशमि-शमीष्व—हविष्कृत्—एहि। हविष्कृत्-एहि। अथ मन्त्रार्थः-हे हविः आहवनीयस्याग्नेः त्वं तनूः नाम शरीरमसि, यतस्त्वाग्नौ सर्वं जंगमाजंगमात्मकं विश्वं प्रक्षिप्तं सदग्नी भवति,अतो हविरग्नेस्तनूः,यस्मिन् हविषि प्रक्षिप्तेसति अध्वर्युणा वाक् विसृज्यते तदिदं वाक् विसर्जनं, हे हविः अध्वर्युणा वाचो विसर्जनं त्वमसि, अतो देववीतये नाम देवानां तर्पणाय त्वां गृह्णामि आवपामीत्यर्थः, मुसलमादत्ते हे मुसल त्वं यद्यपि वानस्पत्यः दारुमयोऽसि ग्रावा नाम दार्ढ्येन पाषाणसदृशोऽसि, तथा दीर्घत्वेन बृहत् नाम महान् असि, हे मुसुल सः त्वं देवेभ्यः अग्न्यादिदेवोपकारार्थं इदं हविः व्रीहिरूपं शमीष्व नाम शमय तुषापनयनेन शांतं कुरु, सुशमि नाम शान्तं यथा स्यात्तथा शमीष्व शमय, शमु उपशमे व्यत्ययेन शपो लुक् हे हविष्कृत् एहि हविः करोतीति हविष्कृत् एहि नाम अत्रागच्छ, त्रिवारमुक्तमर्थं देवाः मन्यन्ते इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिरावाहनम्। यज्ञो वै हविषां सुसिद्धहवनै कुर्यात्सनो मङ्गलम् ॥१५॥

(अथ षोडशी)

कुक्कुटोऽसि मधुजिह्व इषमूर्जं मा वद त्वया वयꣳ संघात ꣳ संघातं जेष्म वर्ष वृद्धमसि प्रति त्वा वर्ष वृद्धं वेत्तु परापूत ꣳ रक्षः परापूता अरातयः । अपहत ꣳ रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥१६॥

अथ पदच्छेदः—कुक्कुटः—असि — मधुजिह्वः—इषं—ऊर्जं—आवद — त्वया— वयं—संघातं—संघात—जेष्म — वर्षवृद्धं —असि — प्रति—त्वा—वर्षवृद्धं—वेत्तु—परापूतं—रक्षः—परापूताः—अरातयः—अपहतं—रक्षः—वायुः—वः—विविनक्तु—देवः—वः — सविता — हिरण्यपाणिः—प्रतिगृभ्णातु—अच्छिद्रेण—पाणिना—अथ मन्त्रार्थः—हे यज्ञायुध त्वं कुक्कुटोऽसि, कुक्कुटः पक्षिविशेषः तद्वत् यज्ञपुरुषार्चनकालस्य प्रबोधकोऽसि, यथा कुक्कुटः पक्षिविशेषः उषा काले सर्वान् जनान् प्रबोधयति, उत्तिष्ठत यूयं भगवानादित्यः, उदेति भगवान् तदानीं सुप्तान् जनान् शपति, तथा त्वमपि सर्वान् जनान् प्रबोधयसि, उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधतक्षुरस्य धारा निशिता दुरत्यया दुर्गं पथः तत्कवयो वदंति—हे यज्ञायुध मधुजिह्वोऽसि दैवी वाक् मधुरभाषिणी जिह्वा यस्य सः त्वं मधुजिह्वोऽसि अत एवास्मन् वृद्धचर्थं इषं वृष्टिं ऊर्जं अन्नं च, आवद धातूनां नानार्थत्वात् अभिमुख्येनावह सहायभूतेन त्वया वयं संघातेन संग्रामः समुदायो वा लक्ष्यते, वीप्सार्थं द्विर्वचनं असुरैः सह क्रियमाणं संग्रामं वयं जेष्म नाम जयेम त्वत्प्रसादादस्माकं पराजयो मा भवतु, हे यज्ञायुध त्वं वर्षवृद्धमसि वर्षेण नाम वृष्ट्या वृद्धं नाम वृद्धिहेतुरसि,हे हविः वर्षवृद्धं नाम यज्ञः त्वां प्रति वेत्तु नाम जानातु—हे यज्ञायुध रक्षः परापूतं निराकृतं, अरातयोऽपि यज्ञात् परापूताः निराकृताःबहिष्कृताः,रक्षोऽपहतं दूरेऽपनीय मारितं हे हविरूपाः तण्डुलाः वायुर्वो युष्मान् विविनक्तु तुषकणेभ्यः पृथक्करोतु, हे तण्डुलाः हविः विशेषाः सविता देवः वः युष्मान् अच्छिद्रेण पाणिना हस्तेन प्रतिगृभ्णातु स्वीकरोतु, किं भूतः सविता हिरण्यपाणिः इत्यलम् विस्तरेण हिरण्यवत् पाणी यस्य स हिरण्यपाणिः। यज्ञो वै सविता सुदेव यजने दद्यात् हविषां फलम् ॥१६॥

(अथ सप्तदशी)

धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादं ꣳ सेधा देवयजं वह। ध्रुवमसि पृथिवीं दृꣳ ह ब्रह्मवनिं त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥१७॥

अथ पदच्छेदः—धृष्टिः—असि —अप—अग्ने—अग्निं—आमादं—निर्—क्रव्यादं—सेध—आ—देवयजं-वह-ध्रुवं-असि-पृथिवीं-दृंह-ब्रह्मवनि-त्वा-क्षत्रवनि-सजातवनि —उपदधामि—भ्रातृव्यस्य —वधाय। अथ मन्त्रार्थः—पलाशशाखायाः मूलदेशे छिन्नः काष्टभागः, उपवेश उच्यते हे उपवेश !तीव्रांगाराणां इतस्ततश्चालने त्वं धृष्टिरसि प्रगल्भोऽसि समर्थोऽसि, अत्र त्रयोऽग्नयः संति, आमादः क्रव्यादः, गार्हपत्यश्चेति, एकः आमाद्, आमं नामान्नमत्तीति आमात् लौकिकोऽग्निः,सर्वप्राणिनां हृदयं ज्योतिः,शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निर्द्वितीयः,तृतीयः यागयोग्यो गार्हपत्यःअत उच्यते हेगार्हपत्याग्ने आमादमग्निमपजहि त्यज, क्रियोपसर्गयोर्व्यवधानं तथा हे अग्ने क्रव्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दमग्निं निःषेधनिः शेषं दूरे गमय दूरे परित्यज, हे गार्हपत्याग्ने देवहोतः देवयजं देवानां याग-योग्यं तृतीयमंगारं यज्ञवेद्यामावह अस्मत्समीप-मानय, देवाः इज्यन्ते यत्रासौ देवयट् तद्देवयजं, हे देवयडग्ने त्वमस्मिन् संसारे ध्रुवमिति लिंगव्य-त्ययो ध्रुवोऽसि, अत एव विश्वधारिणीं पृथिवीं सर्वप्राणीनां कल्याणार्थं दंह दृढीकुरु, किंचाग्ने त्वामस्यां यज्ञवेद्यां उपदधामि स्थापयामि, किमर्थं भ्रातृव्यस्य शत्रोरसुरस्य नास्तिकस्य वा वधाय हिंसार्थं, व्यन् सपत्ने इति आद्युदात्तत्वात् भ्रातृ-व्यः शब्दः शत्रुवाची किं भूतं त्वां ब्रह्मवनि वन षण संभक्तौ ब्रह्मणा नाम ब्राह्मणेन वन्यते नाम कल्याणार्थं स्वीक्रियते इति ब्रह्मवनि, क्षत्रजाति पुरुषेण स्वकल्याणार्थं स्वीक्रियते इति क्षत्रवनि, समानकुले जातेन वैश्यजातिपुरुषेण स्वकल्या-णार्थं स्वीक्रियते इति सजातवनि, एतादृगुण-विशिष्टं त्वामहमुपदधामि यज्ञवेद्यां स्थापयामि इत्यलं विस्तरेण। अग्निर्यज्ञपतिः सुदेवयजने कुर्या-त्स नो मङ्गलम् ॥१७॥

(अथाष्टादशी)

अग्ने ब्रह्मगृभ्णीष्व धरुणमस्यन्तरिक्षं दृ-ꣳह ब्रह्मवनिं त्वा क्षत्रवनिं सजातवन्युपद-धामि भ्रातृव्यस्य वधाय धर्त्रमसि दिवं दृ ꣳ ह ब्रह्मवनिं त्वा क्षत्रवनिं स जातवन्युपदधा - मि भ्रातृव्यस्य वधायं। विश्वाभ्यस्त्वाशाभ्य उपदधामि चितः स्थोर्ध्वचितो भृगूणामङ्गि रसां तपसा तप्यध्वम ॥१८॥

अथ पदच्छेदः—अग्ने—ब्रह्म—गृभ्णीष्व—धरुणम्—असि — अन्तरिक्षम् — दृंह —ब्रह्मवनि—त्वा—क्षत्रवनि—सजातवनि—उपदधामि—भ्रातृव्यस्य—वधाय—धर्त्रम्—असि—दिवम्—दृंह —ब्रह्मवनि — त्वा — क्षत्रवनि — सजातवनि — उपदधामि — भ्रातृव्यस्य — वधाय—विश्वाभ्यः — त्वा—आशाभ्यः — उपदधामि—चितः — स्थः — ऊर्ध्वचितः — भृगूणाम् :— अङ्गिरसाम् — तपसा — तप्यध्वम् ॥ अथ मन्त्रार्थः—हे भगवन्नग्ने ब्रह्म नाम ब्राह्मणम् मां नाशकरक्षोबधेनानुगृह्णीष्व, हे भगवन्नग्ने धरुणं नाम विश्वस्य धारकोऽसि, अतएवान्तरिक्षलो-कम् दृंह, दृढीकुरु, हे अग्ने ब्रह्मवनि ब्राह्मणपुरुषेण स्वीकृतम् क्षत्रवनि क्षत्रपुरुषेण स्वीकृतम् सजात-वनि वैश्यपुरुषेण स्वीकृतम् त्वां यज्ञवेद्यामुपदधा-मि किमर्थम् भ्रातृव्यस्य वधाय शत्रुवधाय, हे भगवन्नग्ने धर्त्रम् नाम विश्वधारकोऽसि अत एव दिवम् द्युलोकम् त्वां यज्ञवेद्यामुपदधामि नाम स्थापयामि, भ्रातृव्यस्य नाम वेदनिन्दकस्य वधाय, हे अग्ने विश्वाभ्यः सर्वाभ्यः आशाभ्यः नाम दिग्-भ्यस्त्वामुपदधामि नाम वेद्यां स्थापयामि हे इष्टकाः यूयम् चितः स्थः चेतनाः भवथ, चिञ् चयने, धातोः क्विबन्तं रूपम् बहुवचनम्—भृगू-णामङ्गिरसाम् देवर्षीणाम् तपसा तपोरूपेणाग्नि-ना स्वात्मानम् तप्यध्वमित्यलम् विस्तरेण। अग्नि र्देव ऋषिः सुदेवयजने विदधातु नो मङ्गलम्॥१८॥

(अथैकोनविंशी)

शर्मा स्यवधूत ꣳ रक्षोऽवधूताऽरातयो दित्यास्त्वगसि प्रति त्वादितिर्वेत्तु। धिषणा-सि पर्वती प्रति त्वादित्यास्त्वगवेत्तु दिवः स्कम्भनीरसि धिषणासि पार्वतेयी प्रतित्वा पर्वती वेत्तु ॥१९॥

अथ पदच्छेदः—शर्मा — असि—अवधू तं—रक्षः—अवधूताः—अरातयः — अदित्याः—त्वग्—असि—प्रति —त्वा — अदितिः—वेत्तु—धिषणा—असि—पर्वती — प्रति — त्वा—अदि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्याः—त्वग्—वेत्तु—दिवः—स्कम्भनीः—असि—पार्वतेयी — प्रति — त्वा —पर्वती —वेत्तु। अथ मन्त्रार्थः—शर्मासीत्यादीनि त्रीणि यजूंषि व्याख्यातान्यपि व्याख्यायन्ते, हे पृथिवी पृष्टरूपमृगासन यज्ञसाधनस्य धारणार्थं शर्मासि सुखहेतुरसि, त्वयि संलग्नं रक्षोऽवधूतम् नामाधः पातितम् अरातयो नाम अदान शीलाः नास्तिकाः अवधूताः, नामाधः पतिताः, हे यज्ञासन त्वमदित्याः नाम पृथिव्यास्त्वगसि, अदितिः भूमिस्त्वां प्रति वेत्तु मदीयेयं त्वगिति जानातु, तस्मिन् यज्ञासने शिलां स्थापयेत्, हे शिलेऽज्ञादिपेषणाधारभूते त्वं पर्वती पर्वतोत्पन्ना धिषणासि यज्ञबुद्धिकर्मप्रदासि, अदित्याः नाम पृथिव्यास्त्वक् त्वां प्रतिवेत्तु जानातु, शम्यां स्थापयेत् तां प्रत्युच्यते हे शम्ये दिवो द्युलोकस्य स्कम्भनीः इति व्यत्ययेन द्वितीयाबहुवचनं स्तम्भनकारिणी त्वमसि, हे उपरितनशिले त्वं धिषणासि पेषणव्यापारधारिकासि किं भूता पार्वतेयी पर्वत्याः पुत्री बालस्वरूपासि, अत एव पर्वती मातृसमा त्वां प्रति वेत्तु मदीयेयं पुत्रीति जानातु, इत्यलम् विस्तरेण। यज्ञो वै शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥१९॥

(अथ विंशी)

धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥२०॥

अथ पदच्छेदः—धान्यम् —असि —धिनुहि—देवान्—प्राणाय—त्वा—उदानाय—त्वा—व्यानाय—त्वा—दीर्घाम्—अनु — प्रसितिम्—आयुषे—धाम्—देवः—वः—सविता — हिरण्यपाणिः—प्रतिगृभ्णातु—अच्छिद्रेण—पाणिना—चक्षुषे—त्वा—महीनां—पयः — असि ॥ अथ मन्त्रार्थः—हे अन्नरूपहविः त्वं धान्यमसि धिनोति नाम प्रणाति सर्वान्, इति धान्यमत एवाग्न्यादिदेवान् धिनुहि नाम प्रीणय प्रकर्षेण अनिति सदैव मुखे चेष्टते इति प्राणः श्वासवायुः, उद् ऊर्ध्वं चेष्टते इत्युदानः, उत्क्रान्तिवायुः, व्याप्य शरीरे चेष्टते इति व्यानो व्यापको बलहेतुर्वायुः, हे तण्डुलरूपहविस्त्वां प्राणाय प्राणदानार्थं पिनष्मीति शेषः, एवमुदनाय त्वा व्यानाय त्वात्रापि योज्यं, दीर्घां अविच्छिन्नां प्रसितिं नाम कर्मसन्ततिमनुलक्ष्य यजमानस्यायुर्वृद्धयर्थं हे तण्डुलरूपहविस्त्वां यज्ञेऽस्मिन् धां नाम दधामि यजमानस्यायुर्वृद्धौ सत्यां यथा कर्मसन्ततिः प्रवर्त्तेत, हिरण्यपाणिः सविता देवः हे तण्डुलरूपाः हविर्विशेषाः वो युष्मान् अच्छिद्रेण पाणिना वायुरूपेण पाणिना प्रतिगृह्णातु, हे हविः चक्षुषे नाम यजमानस्य चक्षुरिन्द्रियपाटवाय त्वां पश्यमिति शेषः, पिष्यमानेषु हविःषु आज्यं संगमयति, हे आज्य त्वं महीनां गवां पयोऽसि क्षीरोत्पन्नत्वात् घृतं पयः शब्देनोच्यते,इत्यलम्। आज्यं देवहितं सुदेवयजने कुर्यात्सदा मंगलम् ॥२०॥

(एकविंशी)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। संवपामि समाप ओषधीभिः समोषधयो रसेन स ꣳ रेवतीर्जगतीभिः पृच्यन्ता ꣳ संमधुमतीर्मधुमतीभिः पृच्यन्ताम् ॥२१॥

अथ पदच्छेदः—देवस्य—त्वा—सवितुः—प्रसवे—अश्विनः—बाहुभ्याम्— पूष्णः—हस्ताभ्याम्—संवपामि —समापः — ओषधीभिः — सं—ओषधयः—रसेन—सम—रेवती — जगती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिः—पृच्यन्ताम्—सम्—मधुमतीः —मधुमतीभिः—पृच्यन्ताम् । अथ मन्त्रार्थः—हे पिष्टौषधीरूपहविः सवितुर्देवस्य प्रसवे नामाज्ञायां प्रवर्त्तमानोऽहं, अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वां यज्ञपात्र्यां संवपामि सम्यक् क्षिपामि, आपः औषधीभिः पिष्टरूपाभिः सह संपृच्यन्ताम्, पृची सम्पर्के, सम्यक् एकीभवन्तु, तथौषधयो रसेन नाम रसरूपेणोदकेन सह संपृच्यन्तां, आपो हि ओषधीनां रस स्तथा रेवतीः रेवत्यः आपः जगतीभिः ओषधीभिः सह संपृच्यन्यां, रेवत्यः आपो जगत्यः ओषधयश्चेति मधुमतीः माधुर्योपेताः आपः मधुमतीभिः पिष्टरूपौषधीभिः सह संपृच्यन्ताम्, अपामोषधीनां परस्परं प्रीतिहेतुत्वात् संपर्को भवत्वित्यलम् । आपो वै रसतां व्रजंति यज्ञने पुष्णन्तु नश्चौषधीः ॥२१॥

(द्वाविंशी)

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामग्निष्टे त्वचं मा हिꣳ सीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥२२॥

अथ पदच्छेदः—जनयत्यै—त्वा — संयौमि—इदम् — अग्नेः—इदम्—अग्नीषोमयोः—इषे —त्वा—घर्मः—असि— विश्वायुः — उरुप्रथा—उरु—प्रथस्व— उरु — ते — यज्ञपतिः—प्रथताम्—अग्निः—ते—त्वचम्—मा—हिंसीद्—देवः—त्वा—सविता—श्रपयतु—वर्षिष्ठे — अधि नाके ॥ अथ मन्त्रार्थ :— हे जलपिष्टरूपहविर्विशेष त्वां संयौमि सम्यक्मिश्रीकरोमि किमर्थं जनयत्यै यजमानस्य प्रजोत्पादनार्थं, जलपिष्टयोर्यथा मिश्रयणं तथा शुक्रशोणितमिश्रेण यजमानस्य प्रजोत्पत्तिर्भवतु । तदर्थं त्वां संयौमि, पुनः मिश्रीकृतस्य पिष्टरूपस्य हविषः पिण्डद्वयं कृत्वेदं पिण्डमग्नेरग्निसंबंधि भवतु, इदं पिण्डमग्नीषोमयोर्भवत्विति द्वितीयं पिण्डं स्पृशेत्—हे आज्य त्वं घर्मोऽसि दीप्मानप्रवर्ग्योऽसि, तथा विश्वायुः विश्वं कृत्स्नमायुर्यस्मात्स विश्वायुः, हे आज्य इषे नाम वृष्ट्यर्थं त्वामधिश्रयामीतिशेषः हे आज्य त्वं स्वभावतः, उरुप्रथा विस्तीर्णप्रथा प्रसिद्धिः यस्याः सोरुप्रथा अत इदानीमपि त्वमुरुप्रथस्व उरु विस्तीर्णं पुत्रपश्वादिभिः सह प्रख्यातो भवतु । हे जलपिष्टरूपहविर्विशेष अग्निः श्रपणाय प्रवृत्तस्ते तव त्वचं त्वक्सदृशमुपरितनभागं माहिंसीत् मा विनाशयतु । हे पिष्टरूपहविर्विशेष सविता देवः वर्षिष्ठे अत्यन्त प्रवृद्धे नाके द्युलोकवर्त्तिनि नाक नाम्नि ह्यग्नौ त्वामधिश्रित्य श्रपयतु पक्वं करोतु, मनुष्यः श्रपणं कर्त्तुमसमर्थः, अतः सविता देव इत्युक्तम्, दिवि नाको नामाग्नी रक्षोहा स्वर्गस्थोऽग्निरित्यलम् । अग्निर्यज्ञपतिः सुदेवयजने कुर्यात्सदा मङ्गलम् ॥२२॥

(त्रयोविंशी)

मा भे र्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजाभूयात् । त्रिताय त्वा द्वितीय त्वैकताय त्वा ॥२३॥

अथ पदच्छेदः—मा—भेः—मा— संविक्थाः—अतमेरुः—यज्ञः—अतमेरुः—यजमानस्य—प्रजा —भूयात्—त्रिताय—त्वा—द्वितीय— त्वा—एकताय—त्वा ॥ अथ मन्त्रार्थः—हे आज्य हविर्विशेष त्वं मा भेः, अस्मिन् यज्ञ कर्मणि भयं मा कृथाः, मा संविक्थाः अस्मात् विश्वरूपात् यज्ञात् तव संचलनं मा भवतु, "भिभि भये,, "ओविजि भय संचलनयोः,, इत्यनयोः प्रयोगौ, अयं यज्ञोऽतमेरुः स्यात् ग्लानिरहितो भवतु "तमु ग्लानौ,, इत्यस्य रूपं, यजमानस्य प्रजा पुत्रपौत्रादिरूपा अतमेरुः नाम ग्लानि रहिता भवतु—हे होतव्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हविर्विशेषांश त्रिताय त्रितनाम्नेदेवाय त्वां निनयामीति शेषः, तथा द्विताय देवाय त्वां निनयामि, तथैकताय देवाय त्वां निनयामि; पूर्वमग्निना स्वकीर्य्ये अप्सु मुक्तम्, तत आप्त्या देवाः उत्पन्नाः त्रित, द्वित, एकत, संज्ञाः तेऽपि यज्ञे भागं लेभिरे इत्यलम् । यज्ञेशः कुरुतां सुदेवयजनं पुष्णातु देवान् सदा ॥२३॥

(अथ चतुर्विंशी)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददेऽध्वरकृतं देवेभ्य इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ॥२४॥

अथ पदच्छेदः—देवस्य—त्वा—सवितुः—प्रसवे—अश्विनोः—बाहुभ्यां — पूष्णः — हस्ताभ्यां—आददे—अध्वरकृतम्—देवेभ्यः—इन्द्रस्य—बाहुः—असि—दक्षिणः—सहस्रभृष्टिः — शतते जा—वायुः —असि —तिग्मतेजा — द्विषतः—वधः । अथ मन्त्रार्थः—सवितु र्देवस्य प्रसवे नामाज्ञायां प्रवर्त्तमानोऽहं हे स्फ्य, अश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां त्वामाददे नाम गृह्णामि, स्वयं गृहीतुमसमर्थोऽहमतः पूष्णो हस्ताभ्यामुक्तं, किमर्थं देवोपकारार्थं, कीदृशं त्वामध्वरकृतं वेदिखननादिद्वारेणाध्वरं करोतीति अध्वरकृत् तं अध्वरकृतं हे स्फ्य ! त्वमिन्द्रस्य दक्षिणो बाहुरसि, कीदृशो दक्षिणो बाहुरिन्द्रस्य सहस्रभृष्टिः सहस्रसंख्याकानां शत्रूणां भृष्टिः भर्जनं यस्मात् सः सहस्रभृष्टिः तथा शततेजाः शतं तेजांसि यस्य स शततेजाः, हे स्फ्य ! वायुसदृशोऽसि, अत एव तिग्मतेजाः तीक्ष्णतेजाः यथा वायुर्वह्निं संदीपयन् सन् तीव्रतेजो भवति. एवं स्फ्योऽपि वेदिं कर्म कुर्वन् सन् तीव्र तेजाः जायते द्विषतोवधः, द्वेषिणामसुराणां हन्तेत्यलम् । यज्ञो वै हननं करोतु सततं वेदस्य वै नास्तिकान् ॥२४॥

(अथ पञ्चविंशी)

पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳ सिषं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्या ꣳ शतेन पाशै र्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥२५॥

अथ पदच्छेदः—पृथिवि—देवयजनि—ओषध्याः—ते—मूलम्—मा—हिंसिषं—व्रजं—गच्छ—गोष्ठानं—वर्षतु—ते—द्यौः—बधान—देव—सवितः—परं—अस्यां—पृथिव्यां—शतेन—पाशैः—यः—अस्मान्—द्वेष्टि—यं—च—वयं—द्विष्मः—तं—अतः—मा—मौक्—अथ मन्त्रार्थः—हे पृथिवि हे यजनि ! देवाः ईज्यन्ते यत्र सा देवयजनी तस्याः संबुद्धौ देवयजनि ते तव संबन्धवत्याः तृणरूपायाः ओषध्याः मूलमहं मा हिंसिषं मा विनाशयामि, अत्र प्रचुरं तृणं स्यात्, हे पृथिवीरूप पुरीष हे पशो त्वं व्रज गच्छ व्रजन्ति गावो यत्र स व्रजः किं भूतं पुनः गोष्ठानं गवां स्थानं, हे पृथिवीरूपवेदे ! ते नाम त्वदर्थं द्यौः नाम द्युलोकाभिमानीदेवो वर्षतु वृष्टिं करोतु, हे देव सवितः योऽस्मान् द्वेष्टि द्वेषं करोति, वयं च यं शत्रं द्विष्मः तमुभयविधं शत्रुं परमस्यां पृथिव्यां "परं अन्धतामिस्रं नरकं" तत्र बधान नाम बन्धनं कुरु; किं बन्धनं तत्र, शतेन पाशैः, शतसंख्याकाभिः बन्धनरज्जूभिः किं चास्मादन्धतामिस्रात् नरकात् तं पापिनं मा मौक् कदापि मा मूञ्चेत्यलम् ॥ अंधं वै नरकं समस्तजगतां नेता यमः पापिनम् ॥२५॥

(अथ षड्विंशी)

अपाररुं पृथिव्यै देवयजनाद्वध्यासं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमस्यां पृथिव्या ꣳ शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् व्रजं० मौक् ॥२६॥

अथ पदच्छेदः—अप—अररुं—पृथिव्यै—देवयजनात्—वध्यासं—व्रजं —गच्छ — गोष्ठानं—वर्षतु—ते —द्यौः—वधान—देव —सवितः—परं—अस्यां—पृथिव्यां—शतेन—पाशैः—यः — अस्मान् —द्वेष्टि—यं—च—वयं—द्विष्मः—तं—अतः—मा—मौक्—अररो—दिवं—मा—पप्तः—द्रप्सः—ते —द्यां —मा — स्कन्-व्रजं०मौक् ॥ अथ मन्त्रार्थः। पृथिवीरूपदेवयजनात् अररुं नाम विघ्नकर्त्तारमसुरमपनीय चाहं वध्यासं हे पुरीष पशो गवां स्थानं व्रजं गच्छ, द्युलोकाभिमानी देवो वर्षतु ते तवोपरि वृष्टिं करोतु, हे देव सवितः योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमुभयविधं पाप्मानं, अस्यां पृथिव्यां परं यत अन्धतामिस्रं नामनरकस्थानं तत्र वधान नाम बन्धनं कुरु कैर्बन्धनं कर्त्तव्यं शतेन पाशैः शतसंख्याकाभिः बन्धनशृखलाभिः, अतो नरकात्तं पापिनं मा मौक् मा मुञ्च, हे अररोऽसुर दिवं द्युलोकं त्वं मा पप्तः मागमः स्वर्गे त्वया न गन्तव्यं हे वेदि देवते ते तव पृथिवीरूपायाः यो द्रप्सः उपजीव्यो रसः द्यां नाम द्युलोकं मा स्कन् मा गच्छतु व्रजं गच्छेति मन्त्र प्रयोगो व्याख्यातः इत्यलम्। वेदिर्वै पृथिवी समस्तयजुषां धत्ते प्रजामङ्गलम् ॥२६॥

(अथ सप्तविंशी)

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि। सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥२७॥

अथ पदच्छेदः—गायत्रेण—त्वा —छन्दसा—परिगृह्णामि—त्रैष्टुभेन—त्वा —छन्दसा—परिगृह्णामि—जागतेन—त्वा—छन्दसा —परिगृह्णामि—सुक्ष्मा—च—असि— शिवा —च—असि—स्योना —च — असि —सुषदा —च—असि—ऊर्जस्वती—च—असि—पयस्वती—च—अथ मन्त्रार्थः-मन्त्रत्रयस्य विष्णुर्देवता, हे विष्णो यज्ञपुरुष त्वा त्वां गायत्रेण छन्दसात्र यज्ञे परिगृह्णामि, हे विष्णो त्वा त्वां त्रैष्टुभेन छन्दसास्मिन् यज्ञे परिगृह्णामि हे विष्णो त्वा त्वां जागतेन छन्दसा यज्ञेऽत्र परिगृह्णामि, हे यज्ञपुरुष रेखात्रयसंस्कृतवेद्यां छन्दो देवताः विघ्नकर्त्तृभ्योऽसुरेभ्यस्त्वां रक्षन्तु, प्रजापतिपुत्राः देवाश्चासुराः पूर्वं स्पर्धां चक्रुस्तत्र पराजितान् देवान् विज्ञाय भूमिमसुराः विभेजुस्तदा देवाः वामनरूपं विष्णुमग्रे कृत्वाऽसुरानागत्यास्मभ्यमपि भूम्यंशो दात्तव्य इत्यूचुरसूयन्तोऽसुराः अयं वामनो विष्णुः यावत् भूभागे शेते तावत् भवदीयो भूभागोऽस्तु, तद्वचनं स्वीकृत्योचुः ततो देवाः वद्धेतदूभागोऽस्मदीयोऽस्ति गायत्रेणेत्यादिमन्त्रत्रयेण यज्ञभूमिं जगृहुः, यज्ञो विष्णुः स यत्र तिष्ठति सैव यज्ञ भूमिरिति तैर्देवैर्विदित्वात् वेदिरिति तद्भूमेर्नाम व्याख्यातम् ।१।२। ५।१—७ इति श्रुतिकथा मनुसंधाय वेदिग्रहणं विधेयं, हे भूमिरूपवेदे त्वं सुक्ष्मा शोभना क्ष्मा चासि, उग्रस्यासुरस्य निष्कासनेन त्वं शिवा नाम शान्ता चासि, स्योना सुखरूपा चासि, एकोऽयं मन्त्रः, सुष्ठु सीदन्ति देवताः यस्यां सा सुषदा चासि द्वितीयोऽयं मन्त्रः, हे भूमिरूपवेदे ऊर्जस्वती पयस्वती च त्वमसि, ऊर्जः शब्दोऽन्नवाची पयः शब्दस्तद्विकारः दध्यादिवाची, तदुभयवती चासि ॥ इत्यलम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुर्वै यजने समस्तयजुषां धत्ते च वेदिमि, माम् ॥२७॥

(अथाष्टाविंशी

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादायं पृथिवीं जीवदानुम् । यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते । प्रोक्षणीरासादय द्विषतो वधोऽसि ॥२८॥

अथ पदच्छेदः—पुरा—क्रूरस्य— विसृपः—विरप्शिन्—उदादाय—पृथिवीं— जीवदानुं—यां—ऐरयन्—चन्द्रमसि—स्वधाभिः—तां—उ—धीरासः—अनुदिश्य—यजन्ते—प्रोक्षणीः—आसादय—द्विषतः—वधः—असि ॥ अथ मन्त्रार्थः—अत्र मन्त्रेऽभिप्रेतेयमाख्यायिका—कदाचिद्देवैः सहासुराणां संग्रामो बभूव । तदा देवैः मिथो मन्त्रितं यदस्याः भूमेरुत्कृष्टं देवयजनस्थलं, तच्चन्द्रमसि संस्थाप्य युद्धं कुर्मस्तत्रयद्यप्यस्माकं पराजयः स्यात् तदा देवयजने यागं विधाय पुनर्दैत्यपराजयं करिष्यामः, इति संमन्त्र्य तस्य भूमेः सारं भागं देवयजनं चन्द्रमसि स्थापयामासुः स्तत् कृष्णवर्णमिदानीमपि दृश्यते इत्याख्यानमयं मन्त्रो ब्रूते १।१।५।१८ ॥ पुरा क्रूरस्येति त्रिष्टुप् चन्द्र देवत्या, विरप्शीति महन्नाम, विविधं रपति वेदत्रयरूपेण शब्दं करोतीति विरप्शी, यज्ञो वेदिं प्राप्तो विष्णुः नाम सम्बोध्यते, हे विरप्शिन् विष्णो ! त्वमस्मद्वचनं शृणु, श्रुत्वा चानुगृहाण, क्रूरशब्दोऽत्र संग्रामवाची, विविधं सर्पन्ति योधाः यत्रेति विसृप् तस्येति क्रूरविशेषणं, पञ्चम्यर्थे षष्ठी, विसृपः नाम नानावीर्युतात् क्रूरात् नाम संग्रामात् पुरार्थाद्देवाः जीवदानुं, जीवं ददातीति जीवदानुः तां जीवानां धात्रीं यां पृथिवीं उदादाय ऊर्ध्वं गृहीत्वा स्वधाभिः सह चन्द्रमसि सर्वे देवाः एरयन् प्राक्षिपन् स्थापयामासुः धीरासः धीराः मेधाविनः तामु उ एवार्थे तामेव चन्द्रस्थां पृथिवीमनुदिश्य दर्शनेन सम्पाद्य सैव भूमिः वेद्यां विद्यते, इति निश्चित्य यागं कुर्वन्ति, स्वधाभिः सह अनेन मन्त्रेण वेद्यां समीकरणरूपं मार्जनं कुर्यात्-हे होतः प्रोक्षणीः नाम आपः आसादय नाम वेद्यां स्थापय, हे स्फ्य द्विषतो नाम शत्रोः वधोऽसि हन्ताऽऽसि इत्यलम् देवैर्वै पृथिवी सुसोमसदने यज्ञैश्च नीता पुरा। सा वै भूः शरणं सुदेव यजने कुर्यात् सदा मंगलम् ॥१८॥

(एकोनत्रिंशी)

प्रत्युष्ट ꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्त ꣳ रक्षो निष्टप्ता अरातयः । अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि । प्रत्युष्ट ꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्त ꣳ रक्षो निष्टप्ता अरातयः । अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि ॥२९

अथ पदच्छेदः—प्रत्युष्टं — रक्षः—प्रत्युष्टाः—अरातयः — निष्टप्तं — रक्षः— निष्टप्ताः—अरातयः—अनिशितः —असि —सपत्नक्षिद्—वाजिनं—त्वा—वाजेध्यायै — संमार्ज्मि —प्रत्युष्टं—रक्षः—प्रत्युष्टाः—अरातयः—अनिशिता—असि — सपत्नक्षिद् — वाजिनीं — वाजेध्यायै— संमार्ज्मि ॥ अथ मन्त्रार्थः —यथा पूर्वं प्रत्युष्टमिति मन्त्रेण प्रतपनं कृतं, तथा स्रुवस्यापि प्रतपनं कर्त्तव्यं, प्रत्युष्टमिति मन्त्रो व्याख्यातः हे स्रुव त्वमनिशितोऽसि शो तनूकरणे, निशितः तीक्ष्णीकृतः, न निशितः, अस्मद्विषये तीक्ष्णोपद्रवरहितोऽसि, यतः सपत्नक्षिद् सपत्नान् अस्मच्छत्रून् क्षिणोतीति हिनस्तीति सपत्नक्षिद्, अत एव त्वां संमार्ज्मि, सम्यक् शोधयामि, किं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूत त्वामन्नवन्तं वा यज्ञवन्तं, किमर्थं वाजेध्यायै, इन्धनं नाम इध्या दीप्तिः वाजस्य इध्या, वाजेध्या, तस्यै वाजेध्यायै यज्ञस्य दीप्त्यै प्रकाशनार्थं, अनिशितासीति मन्त्रेण स्रुचस्तिस्रो जुहुपभृद् ध्रुवाः संमृज्य प्रत्युष्टमिति मन्त्रेण प्रतप्य अध्वर्यवे प्रयच्छति—प्रत्युष्टमिति मन्त्रो व्याख्यातः, जुह्वादीनां स्त्रीलिङ्गनिर्देशात् तद्विशेषणयोरपि स्त्रीलिङ्गनिर्देशः। इत्यलम् ॥ श्री विष्णुः शरणं सुदेवयजने कुर्यात्स नो मङ्गलम् ॥२९॥

(अथ त्रिंशी)

अदित्यै रास्नासि विष्णोर्वेष्योऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि। अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ॥३०॥

अथ पदच्छेदः—अदित्यै—रास्ना—असि—विष्णोः—वेष्यः—असि—ऊर्जे—त्वा—अदब्धेन—त्वा—चक्षुषा—अवपश्यामि—अग्नेः—जिह्वा—असि—सुहूः—देवेभ्यः—धाम्ने—धाम्ने—मे—भव—यजुषे—यजुषे ॥ अथ मन्त्रार्थः—यज्ञपत्नीं त्रिवृता मुञ्जयोक्त्रेण संनह्यति हे मुञ्जयोक्त्र। अदित्यै नाम अदित्या भूम्यास्त्वं रास्नासि रशना भवसि, दक्षिणपाशमुत्तरे प्रति मुच्योर्द्धं उद्गृह्णति, विष्णो वैष्य इति हे दक्षिणपाश त्वं विष्णोर्यज्ञस्य वेष्योऽसि नाम व्यापकोऽसि हे आज्य त्वा मुद्वासयामि नाम विलापयामि किमर्थं, ऊर्जे, उत्तमरसलाभाय विलापितं घृतं सुस्वादुर्भवति, हे आज्य अदब्धेनोपहिंसितेन चक्षुषा त्वामवपश्यामि, किञ्च हे आज्य त्वमग्नेर्जिह्वाऽसि, किं भूता देवेभ्योऽर्थाय सुष्टु ह्वयन्ते देवाः अनया सा सुहूः जिह्वा, अतो मे मम धाम्ने धाम्ने भव तथा यजुषे यजुषे भव तद् तद् यागफलोपभोगस्थानसिद्ध्यर्थं योग्यं भवेत्यलम्। देवाः वै जगतां सुदेवयजने कुर्वन्तु नो मंगलम्। ३०॥

(एकत्रिंशी)

सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥३१॥

अथ पदच्छेदः—सवितुः—त्वा—प्रसवे—उत्पुनामि—अच्छिद्रेण—पवित्रेण—सूर्यस्य—रश्मिभिः—सवितुः—वः—प्रसवे—उत्पुनामि—अच्छिद्रेण—पवित्रेण—वसोः—सूर्यस्य—रश्मिभिः—तेजः—असि—शुक्रं—असि—अमृतं—असि—धाम—नाम—असि—प्रियं—देवानां—अनाधृष्टं—देवयजनं—असि—अथ मन्त्रार्थः—आज्यमुत्पुनाति सवितुस्त्वेति मन्त्रेण—वसन्ति भूतानि यस्मिन् सः वसुस्तस्य प्रसवे अह्नायां वर्त्तमानोऽहं हे आज्य त्वामुत्पुनामि शोधयामि केन अच्छिद्रेण पवित्रेण, अच्छिद्रो वै वायुः, वायुरूपपवित्रेण सूर्यस्य रश्मिभिः प्रेक्षणीपात्राणि वो युष्मान् उत्पुनामि, हे आज्य त्वं तेजोऽसि कान्तिप्रदमसि शुक्रमसि दीप्तिमदसि—अमृतमसि हे आज्य त्वं धाम स्थानमसि, धीयत चित्तवृत्तिर्यत्र तद्धाम नाम नामयति आत्मानं प्रति सर्वाणि भूतानि इति नाम, हे आज्य देवानां प्रियमिष्टमनभिभूतमसि देवयजनमसि यागसाधनमसि ह्येतद्गुणविशिष्ट यज्ञसिद्ध्यर्थं त्वां गृह्णामीत्यलम् ॥ आज्यं वै शरणं समस्त यजुषां कुर्यात्सदा मङ्गलम् ॥३१॥

मया गोकुलचन्द्रेण पिण्डोरीधामवासिना।
शुक्ले वै यजुषां वेदे ह्यध्याये प्रथमे पुनः।
शाखाद्याज्यग्रहणांताः मन्त्रास्तत्र प्रकीर्त्तिताः ॥

समाप्तोऽयं प्रथमोऽध्यायः ॥१॥



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वितीयाध्यायसमारम्भः

(तत्र प्रथमा)

कृष्णोऽस्याखरेष्ठोऽग्नयें त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि सुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥१॥

अथ पदच्छेदः—कृष्णः—असि—आखरेष्ठः—अग्नये—त्वा—जुष्टं—प्रोक्षामि—वेदिः—असि—बर्हिषे—त्वा—जुष्टं—प्रोक्षामि—बर्हिः—असि—सुग्भ्यः—त्वा—जुष्टं—प्रोक्षामि ॥ अथ मन्त्रार्थः—कृष्ण शब्दो वर्णवचनोऽन्तोदात्तः, कृष्णशब्दो मृगवचन आद्युदात्तः, मन्त्रत्रयेण इध्मं वेदिं च बर्हिश्च प्रोक्षेत्—हे इध्म त्वं कृष्णोऽसि कृष्णमृगरूपो यज्ञोऽसि, यज्ञो वै पुरा देवेभ्यो भीतः सन् कृष्णमृगो बभूव, कथं भूतः, आसमन्तात् खरे कठिने वृक्षे तिष्ठतीति आखरेष्ठः, अत एवाग्नये जुष्टं प्रियं त्वां जलेन प्रोक्षामि; हे भूमे त्वं वेदिरसि अत एव बर्हिषे जुष्टं प्रियं त्वां जलेन प्रोक्षामि, पृथिवीरूपायाः वेदेः प्रजारूपस्य बर्हिषो धारकत्वं युक्तं—हे दर्भ त्वं बर्हिरसि वेदिग्रहणसमर्थमसि अत एव सुग्भ्यो जुष्टं प्रियं त्वां जलेन प्रोक्षामि इत्यलम् ॥१॥

वेदिर्वै पृथिवी सुदेवयजने बर्हिः प्रजा गीयते।
यज्ञो वै हविषां समस्तयजने धत्ते हितं देहिनां ॥

(अथ द्वितीया)

अदित्यै व्युन्दनमसि विष्णोः स्तुपोऽस्यूर्णम्रदसं त्वा स्तृणामि, स्वासस्थां देवेभ्यो भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ॥२॥

अथ पदच्छेदः —अदित्यै —व्युन्दनं —असि—विष्णोः—स्तुपः—असि —ऊर्णम्रदसं—त्वा—स्तृणामि—स्वासस्थां — देवेभ्यः — भुवपतये—स्वाहा—भुवनपतये—स्वाहा—भूतानां—पतये—स्वाहा ॥ अथ मन्त्रार्थः;— देवतायै सुष्टु हुतं स्यात् भुवनपतये देवनायै सुष्टु हुतं स्यात् इति स्वाहाशब्दार्थयोगः स्वाहावषट्कारशब्दाभ्यांदेवा उपजीवन्ति । प्रोक्षणशेषोदकं मूलेष्वुपसिंचति, अदित्यै चेति मन्त्रेण—हे प्रोक्षणशेषोदक। त्वमदित्यै अदित्याः भूम्याः व्युन्दनमसि, विशेषेण क्लेदनमसि, दर्भप्रस्तरमादाय, हे दर्भप्रस्तर। मुष्टिरूप त्वं विष्णोर्यज्ञस्य स्तुपोऽसि, केशसंघातशिखेव भवसि, वेदिमाह हे वेदे। त्वां बर्हिषा स्तृणामि, छादयामि, किं भूतां त्वां ऊर्णम्रदसं ऊर्णमिव मृदुतरां, दर्भैराच्छादिता वेदिर्मृदुगुणविशिष्टा भवति, पुनः किं भूतां त्वां देवेभ्यः स्वासस्थां देवोपकाराय सुखेनासितुंस्थानभूतां, हविर्ग्रहणकाले यज्ञपरिधिभ्योऽग्नेर्भ्रातृभ्यो जुहुयात् एता हि परिधिदेवताः संति 'अग्निर्भ्रातरो हि वषट्कारभयात् भूमिं प्राविशन् तदूदुःखेनाग्निरपि पलाय्योदके प्राविशत् ततस्तेऽग्नेर्भ्रातरः यज्ञपरिधयो जातास्तेषां यज्ञे यज्ञभागः कृतः। इत्यलम्। अग्निर्वै शरणं समस्तजगतां कुर्यात्सनो मङ्गलम् ॥२॥

(अथ तृतीया)

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः। इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः—गन्धर्वः—त्वा —विश्वावसुः—परिदधातु—विश्वस्य —अरिष्टयै —यजमानस्य—परिधिः —असि —अग्निः — इडः—ईडितः—इन्द्रस्य—बाहुः —असि — दक्षिणः—विश्वस्य—अरिष्टयै —यजमानस्य —परिधिः — असि—अग्निः—इडः—ईडितः —मित्रावरुणौ—त्वा—उत्तरतः—परिधत्तां—ध्रुवेण —धर्मणा—विश्वस्य—अरिष्ट्यै—यजमानस्य —परिधिः—असि—अग्निः—इडः—ईडितः—अथ मन्त्रार्थः—मध्यमदक्षिणोत्तरान् परिधीन् — परिदधाति, हे परिधे विश्वावसुः नामा गन्धर्वः त्वां परिदधातु आहवनीयस्य सर्वतः स्थापयतु, विश्वं वसु धनं यस्य सविश्वावसु द्युलोकस्थं सोमं रक्षितुं तत्पार्श्वे गन्धर्वोऽवसदिति कथा—किमर्थं विश्वस्यारिष्टयै, हिंसापरिहाराय, किं च त्वं यजमानस्यपरिधिरसि यजमानमपि रक्षितुं पश्चिम दिशि स्थापितोऽसि,किं चाग्निरिडः ईडितश्चासि, आहवनीयस्याग्नेः प्रथमभ्राता भुवपतिनामाग्निरूपस्त्वमसि, इडः नाम स्तुतियोग्यः अत एव होत्रादिभिः ईडितः नाम स्तुतः दक्षिण परिधिं परिदधाति हे द्वितीय परिधे त्वमिन्द्रस्य दक्षिणो बाहुरसि, तत्तुल्योऽसि, विश्वस्येत्यादिः व्याख्यातं, अत्राग्निशब्देन भुवनपति नामान्नेर्द्वितीयो भ्राता व्याख्यातस्तृतीयमुत्तरं परिधिं परिदधातीति हे तृतीय परिधे मित्रावरुणौ वाय्वादित्यौ ध्रुवेण स्थिरेण धर्मणा धारणेनोत्तरस्यां दिशि त्वां परिधत्तां परितः स्थापयताम्, विश्वस्येत्यादि पूर्ववत्, अत्राग्निर्भूतानां पतिस्तृतीयो भ्राता व्याख्यातः। इत्यलम् ॥ ३ ॥ अग्निर्हव्यपतिश्च विश्वयजने कुर्यात्सदा मङ्गलम् ॥

(अथ चतुर्थी)

वीतिहोत्रं त्वा कवे द्युमन्त ꣳ समिधीमहि। अग्ने बृहन्तमध्वरे ॥४॥

अथ पदच्छेदः—वीतिहोत्रं—त्वा—कवे—द्युमन्तं — समिधीमहि —अग्ने — बृहन्तं—अध्वरे। अथ मन्त्रार्थः — इध्म काष्टमादधाति, इयमृक् अग्निदेवत्या गायत्री छन्दस्का प्रजापत्यार्षा, हे अग्ने अतीतानागतवर्त्तमानज्ञानात्मककवे अध्वरे यागे निमित्ते सति त्वां वयं समिधीमहि अनेन काष्टेन दीपयामः किं भूतं त्वां वीतिहोत्रं, वीतिः समृद्धिस्तस्यै संमृद्धयै होत्रं नाम होमो यस्य स वीतिहोत्रस्तं वीतिहोत्रं तथा द्युमन्तं स्वभावतया द्युतिमन्तं तथा बृहन्तं नाम महान्तमित्यलम्। अग्निर्वैश्वरणं समस्तयजने कुर्यात् सनो मङ्गलम् ॥४॥

(अथ पञ्चमी

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै। सवितुर्बाहू स्थ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य आ त्वा वसवो रुद्रा आदित्याः सदन्तु ॥५॥

अथ पदच्छेदः—समिद्—असि—सूर्यः—त्वा—पुरस्तात्—पातु —कस्याश्चिद् — अभिशस्त्यै—सवितुः—बाहू—स्थ—ऊर्णम्रदसं—त्वा—स्तृणामि—स्वासस्थं — देवेभ्यः —आ— त्वा—वसवः—रुद्राः— — आदित्याः — सदन्तु। अथ मन्त्रार्थः —द्वितीयमिध्ममादधाति— समित्सूयते— आहवनीयं पश्यन् जपति —हे इध्म काष्ट। त्वं समिदसि अग्ने समिन्धनमसि दीपनमसि, हे आहवनीयाग्ने। सूर्यः पुरस्तात् पूर्वस्यां दिशि कस्याश्चिदभिशस्त्यै सर्वस्या अभिशस्तेर्हिंसायाः सकाशात् त्वां पातु रक्षतु, तृणद्वयं प्रस्तरस्थापनार्थं तिर्यक्, निदध्तात्, हे तृणद्वय। युवां सवितुर्देवस्य बाहू स्थ प्रस्तरधारणेन सूर्यस्य बाहु सदृशे भवथः, ऊर्णम्रदसं, ऊर्णमिव म्रदसं मृदुतरं देवेभ्य इति पञ्चमी षष्ठ्यर्थे देवानां स्वासस्थं सुखेनासनेन स्थीयते यत्र हे तृणद्वय। तादृशं त्वां स्तृणामि, हे तृणद्वय। वसवः रुद्राः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आदित्याः सवनत्रयाभिमानिनस्त्रयो देवाः त्वामा-सादयन्तु सर्वतः प्रसारयन्तु इत्यलम् । अग्निः काष्ट-चयैर्विभाति यजने भुञ्जीत सुयज्ञे हविः ॥५॥

(अथ षष्ठी)

घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रिय ꣳ सद आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रिय ꣳ सद आसीद-घृताच्यसि ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रिय ꣳ सद आसीद प्रियेण धाम्ना प्रिय ꣳ सद आसीद । ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥६॥

अथ पदच्छेदः—घृताची—असि—जुहूः—नाम्ना—सा—इदं—प्रियेण—धाम्ना—प्रियं—सदः—आसीद—घृताची—असि—उपभृत्—नाम्ना—सा—इदं—प्रियेण—धाम्ना—प्रियं—सदः—आसीद—प्रियेण—धाम्ना—प्रियं—सदः आसीद—ध्रुवा—असदन्—ऋतस्य—योनौ—ता—विष्णो—पाहि—पाहि—यज्ञं—पाहि—यज्ञपतिं—पाहि—मां—यज्ञन्यं ॥ अथ मन्त्रार्थः—जुहूं निदधाति, हे जुहु ! त्वं घृताची असि घृतपूर्णाऽसि नाम्ना च जुहूः हूयते अनयेति जुहूः, क्विपि द्युतिगमिजुहोतीनां द्वे च जुहोते-र्दीर्घश्चेति द्वित्वं दीर्घश्च, सा त्वं प्रियेण देवलभे-नाज्येन सह इदं प्रियं सदः प्रस्तरलक्षणं स्थान-मासीद, अधितिष्ठप्रियधामशब्देनाज्यं लक्ष्यते, उप समीपे स्थित्वा आज्यं विभर्त्ति, इति, उपभृत् त्वं घृताची असि नाम्ना उपभृत् असि, सा त्वं इदं प्रियेण धाम्ना देववल्लभेनाज्येन सह प्रियं प्रस्तर-लक्षणं सदः स्थानमासीद, अधितिष्ठस्थिरत्वात् नाम्ना ध्रुवा हे ध्रुवे । त्वं घृताची असि नाम्ना ध्रुवाऽसि सा त्वं इदं प्रियेण धाम्ना देववल्लभेना-ज्येन सह प्रियं प्रस्तरलक्षणं सदः स्थानमासीद हे हविः । प्रियेण धाम्नाज्येन सह प्रियं प्रस्तरलक्षणं सदः स्थान मासीद ऋतस्य यज्ञस्य योनौ स्थाने यानि ध्रुवाणि हवींषि असदन् अतिष्ठन्, हे विष्णो यज्ञपुरुष ! ता तानि हवींषि पाहि यज्ञं पाहि, यज्ञपतिं पाहि, मां यज्ञन्यं यज्ञनेतारं अध्वर्युं पाहि ॥ विष्णुवै शरणं समस्तयजुषां कुर्यात्सदा मङ्गलम् ॥६॥

(अथ सप्तमी)

अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजि-तꣳ संमार्ज्मि । नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥७॥

अथ पदच्छेदः—अग्ने—वाजजित्—वाजं त्वा—सरिष्यंतं—वाजजितं—संमार्ज्मि—नमः देवेभ्यः—स्वधा—पितृभ्यः—सुयमे—मे भूयास्तम् । अथ मन्त्रार्थः—अग्ने संमार्गं करोति वाजं अन्नं जयतीति वाजजित्—हे वाजजित् अग्ने ! त्वामहं संमार्ज्मि शोधयामि किं भूतं त्वां वाजं सरिष्यन्तं अन्नसम्पादनोपयुक्तं तथा वाज-जितं अन्नप्रतिबन्धनिवारकं, देवान् नमस्करोति प्राङ्मुखः, दक्षिणमुखः पितॄन् । नमस्करो-ति, ये पितरः पालकाः सन्ति तेभ्यः स्वधान्न-मस्तु, अनेन मन्त्रद्वयेन देवाः पितरश्चोपचर्यन्ते जुहूपभृतौ गृहीत्वा, हे जुहूपभृतौ ! मे मदर्थं सुयमे सुष्ठु नियते स्थाने युवां भूयास्तं यथा युवयोः स्थितमाज्यं न पतेत तथा धारयामी-त्यलम् ॥ आज्यं यज्ञपतिसुरक्षितमिदं कुर्यात्सु-यज्ञे हितम् ॥ ७ ॥

(अथाष्टमी)

अस्कन्नमद्य देवेभ्य आज्य ꣳ संभ्रियास-मूर्ध्निणा विष्णो मा त्वावक्रमिषं वसुमती-मग्ने ते च्छायामुपस्थेषं विष्णोः स्थानमसीत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात् ॥८॥

अथ पदच्छेदः—अस्कन्नं— अद्य— देवेभ्यः—आज्यं—संभ्रियासं—अंघ्रिणा—विष्णो—मा—त्वा—अवक्रमिषं—वसुमतीं—अग्ने—ते—छायां— उपस्थेषं—विष्णोः—स्थानं—असि—इतः—इन्द्रः—वीर्यं—अकृणोत्—ऊर्ध्वः—अध्वरः—आस्थात् ॥ अथ मन्त्रार्थः—हे जुह्वुपभृतौ तथा सति, अद्यानुष्ठानदिने देवेभ्यो देवोपकारार्थं माज्यं युवयोः स्थिमस्कन्नं भूमौ यथा न स्कन्देत् तथा संभ्रियासं सम्यक् धारणं करोमि, हे विष्णो। यज्ञ। त्वामंघ्रिणा पादेनाहं मावक्रमिषं पादक्रमणं माकार्षं हे अग्ने ते तव च्छाया, यां छायावत् समीपवर्त्तिनीं वसुमतीं भूमिमहमुपस्थेषं, उपतिष्टेयम्, हे वसुमति त्वं विष्णोर्यज्ञस्य स्थानमसि, इतोऽस्माद्देवयजनस्थानादिन्द्र उद्युक्तः सन् वीर्यमकृणोत् वीरकर्म शत्रुवधरूपं कृतवान् अत एवाध्वरोयज्ञः ऊर्ध्वं आस्थात् उन्नतो बभूव, इन्द्रबलेन हि विश्वरूपो यज्ञः उन्नतो भवति ॥ इन्द्रो बलेन नेता हि येन विश्वं वितन्यते। भोजयत्येव च विश्वानि स्वयं भोक्ता च देहिषु ॥८॥

[अथ नवमी]

अग्ने वेर्होत्रं वेर्दूत्यमवतां त्वां द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत्स्वाहा संज्योतिषा ज्योतिः ॥९॥

अथ पदच्छेदः—अग्ने—वेः—होत्रं—वेः—दूत्यं—अवतां—त्वां—द्यावापृथिवी—अव—त्वं—द्यावापृथिवी—स्विष्टकृत्—देवेभ्यः—इन्द्रः—आज्येन—हविषा—भूत्—स्वाहा—सं—ज्योतिषा—ज्योतिः ॥ अथ मन्त्रार्थः—हे अग्ने! होत्रं नाम होतुः कर्म त्वयि विद्यते त्वं वेः नाम विद्धि जानीहि, अग्निर्वै देवानां होता, इतश्च, ईदृशं त्वां द्यावापृथिवी अवतां समर्थयतां, हे अग्ने त्वमपि द्यावापृथिवी देवते अव पालयेत्थं परस्परपालने सति इन्द्र अस्माभिः दत्तेनाज्येन हविषा देवेभ्यः स्विष्टकृत् भूत् सुष्ठु इष्टं करोतीति स्विष्टकृत् भवतु, अडभावः छान्दसः, स्वाहास्माभिर्दत्तं हविः शुभमाह,स्वाहेति निपातोऽयं देवदाने वर्त्तते, ज्योतिषा ध्रुवा स्थिताख्यज्योतिषा सह ज्योतिः जुह्वा सिच्यमानरूपं ज्योतिः संगच्छतां ज्योतिषाज्येन ज्योतिः आज्यं संगच्छतामित्यलम् ॥ अग्निर्यज्ञपतिः सुदेव यजने होता च दूतः पुनः। यज्ञे हव्यभुजां समस्तयजने कुर्यात्सदा मङ्गलम् ॥९॥

[अथ दशमी]

मयीदमिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम्। अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिषः उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहा ॥१०॥

अथ पदच्छेदः—मयि—इदं—इन्द्रः—इन्द्रियं—दधातु—अस्मान्—रायः—मघवानः—सचन्तां—अस्माकं—सन्तु—आशिषः—सत्याः—नः—सन्तु—आशिषः—उपहूता—पृथिवी—माता—उप—मां—पृथिवी—माता—ह्वयतां—अग्निः—आग्नीध्रात्—स्वाहा ॥ अथ मन्त्रार्थः—यजमानो जपति—मयीदमिन्द्र इति इन्द्रः परमेश्वरः इदं इन्द्रियं वीर्यं मयि यजमाने दधातु किं च रायो धनानि दैवमानुष भेदेन द्विविधानि धनानि, मघवानः धनवन्तश्चास्मान् यजमानान् सचन्तां सेवन्ताम्, किं चास्माकं यजमानानां आशिषः सत्याः सन्तुः, यदा होता द्यावापृथिव्योरुपह्वानं करोति, तदोभयो र्हविषोरेकैकं भागं कृत्वा अग्नीधे प्रयच्छति, सचोपहूतेति मन्त्रेण प्राश्नाति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपहूतेयं पृथिवी दृश्यते सा जगतो माता निर्मात्री मयोपहूताभ्यनुज्ञाता सा पृथिवी अस्माभिः मातृत्वेन भाविता सती मामुपह्वयतां हविःशेषभक्षणायाज्ञांददातु अहं चाग्नि रूपः सन् तं भागं प्राश्नामीति शेषः तद्धविः शेषं मम जाठरेऽग्नौ स्वाहा सुहुतमस्तु इत्यलम्। पृथिवी सर्वजन्तूनां मातृभावेन भाविता। द्यौरेव च पिता प्रोक्तः मध्ये विश्वं चराचरम् ॥१०॥

[अथैकादशी]

उपहूतो द्यौष्पितोप मा द्यौष्पिता ह्वयताग्निराग्नीध्रात्स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥११॥

अथ पदच्छेदः — उपहूतः — द्यौः — पिता —उप — मा — द्यौः — पिता — ह्वयताम्—आग्निः—आग्नीध्रात्—स्वाहा—देवस्य—त्वा—सवितुः—प्रसवे—अश्विनोः— बाहुभ्यां—पूष्णः—हस्ताभ्यां—प्रतिगृह्णामि—अग्नेः—त्वा—आस्येन—प्राश्नामि ॥ अथ मन्त्रार्थः—द्वितीयं हविर्भागं प्राश्नाति, मनोपहूतो द्यौः जगत्पालकः पिता उप मां द्यौः पिता ह्वयतामुपहूयतामभ्यनुजानातु, आज्ञां ददातु अग्नीध्रः इदं कर्माग्नीध्रं तस्मादहमग्निरूपः सन् द्वितीयं हविर्भागं प्राश्नामीति शेषः मम जठराग्नौ स्वाहासुहुतमस्तु, हे यज्ञ कर्म। सवितुर्देवस्य प्रसवे नामाज्ञायां प्रवर्त्तमानोऽहं त्वामश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि स्वीकरोमि, हे हविषो द्वितीयभाग त्वामग्नेरास्येन मुखेन प्राश्नामि भक्षयामि, ॥ ॐ प्रतिष्ठ इत्यन्तं ब्रह्मत्वं तस्यांगिरसो बृहस्पतिः ऋषिरित्यलम् ॥ अग्न्यास्येन देवा हि भोक्तारो जगती तले ॥११॥

(अथ द्वादशी)

एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥१२॥

अथ पदच्छेदः—एतं—ते—देव—सवितः—यज्ञं—प्राहुः—बृहस्पतये—ब्रह्मणे—तेन—यज्ञं—अव—तेन—यज्ञपतिं—तेन—मां—अवः। अथ मन्त्रार्थः—समिधमाधातुमनुज्ञां प्रदानाय बोधितो ब्रह्मा मन्त्रेणानु जानीयात्, एतंते इत्यादि ओं प्रतिष्टेत्यन्तो मन्त्रः, हे देव सवितः। एतं यज्ञमिदानीं काले क्रियमाणमिमं यज्ञं ते तुभ्यं त्वदर्थं यजमानाः प्राहुः कथयंति किं च त्वया प्रेरितो देवानां यज्ञे यो ब्रह्मा बृहस्पतिस्तस्मै ब्रह्मणे बृहस्पतये च प्राहुः नाम कथयन्ति, बृहस्पतिर्वै देवानां ब्रह्मा तदधिष्ठत एवायं मानुषो यज्ञे ब्रह्मत्वं करोति—किं च हे देव सवितः त्वदीयत्वेन हेतुना यज्ञं त्वमव तथा तेनैव हेतुना यज्ञपतिं यजमानं च त्वमव तथा तेनैव हेतुना मां ब्रह्माणं च त्वमव सर्वतः रक्ष इत्यलम्। देवानां यजनं पुनातु गुरु हि भूतश्च ब्रह्मा पुरा ॥१२॥

[अथ त्रयोदशी]

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु। विश्वेदेवास इह मादयन्तामो ३ प्रतिष्ठ ॥१३॥

अथ पदच्छेदः—मनः—जूतिः—जुषतां—आज्यस्य—बृहस्पतिः—यज्ञं—इमं—तनोतु—अरिष्टं—यज्ञं—सम्—इमं—दधातु—विश्वे देवासः—इह—मादयंतां—ओं प्रतिष्ठ ॥ अथ मन्त्रार्थः—हे सवितः अत्रयज्ञे त्वदीयं मनः आज्यस्येति कर्मणि षष्ठी, आज्यं जुषतां सेवतां कीदृशं मनः जूतिः अतीतानागतवर्त्तमानकालगतपदार्थेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गमनशीलं किं च बृहस्पतिरिमं यज्ञं तेनोतु विस्तारयतु तथारिष्टं हिंसारहितं यथा तथेमं यज्ञं संदधातु किं च विश्वेदेवासः सर्वे देवाः इह यज्ञकर्मणि मादयंतां मद्तृप्तौ (चुरादिः) तृप्यन्तामेवं प्रार्थितः सन् सविता देवः ओं प्रनिष्ठेत्यनुज्ञां प्रयच्छतु ओं इति अंगीकारे तथास्तु प्रतिष्ठेति प्रतिष्ठां कुरुध्व मस्य यज्ञस्येत्यलम्। यज्ञो यज्ञप्रतिष्ठां वै करोतु जगतीतले ॥१३॥

(अथ चतुर्दशी

ए॒षा ते॑ अग्ने स॒मित्तया॒ वर्ध॑स्व॒ चा च॑ प्यायस्व। व॒र्धि॒षी॒महि॑ च व॒यमा च॑ प्यासिषीमहि। अग्ने॑ वाजजि॒द्वाजं॑ त्वा ससृ॒वाꣳसं॑ वाज॒जित॒ꣳ संमा॑र्ज्मि ॥१४॥

अथ पदच्छेदः — एषा — ते — अग्ने — समित् — तया वर्धस्व — च — आ — च — प्यायस्व — वर्धिषीमहि — च — वयं — आ — च — प्यासिषीमहि — अग्ने — वाजजित् — वाजं — त्वा — ससृवांसं — वाजजितं — संमार्ज्मि ॥ अथ मन्त्रार्थः — ब्रह्मत्वं समाप्तं, अतः प्राकृतमार्षमियमनुष्टुबग्निदेवत्या — हे अग्ने ! एषा ते तव समित् समिन्धनहेतुः काष्ठविशेषः त्वया समिधा त्वं वर्धस्व वृद्धिं गच्छ। प्यायस्व चास्मानपि सर्वतो वृद्धिं प्रापय, तथा सति तव प्रसादाद्वयं वर्धिषीमहि वृद्धिं प्राप्नुयाम प्यासिषीमहि चास्मदीयपुत्रपश्वादीन् सर्वतो वृद्धियुक्तान् करवाम, हे अग्ने वाजजित् ! अन्नजयोपेतं वाजं नामान्नमुद्दिश्य गतवन्तमन्नं संपादितवन्तं वाजजितमन्नंजयोपेतं त्वामहं संमार्ज्मि शोधयामि इत्यलम्। भद्रं वै करणे समस्तजगतामग्निः समर्थः परः ॥१४॥

(अथ पञ्चादशी)

अ॒ग्नीषो॑म॒यो॒रुज्जि॑ति॒मनूज्जे॑षं॒ वाज॑स्यमा प्रस॒वेन॒ प्रोहा॑मि। अ॒ग्नीषोमौ॒ तमप॑नुदतां॒ यो॒ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मो वाज॑स्यैनं प्रस॒वेनापोहामि। इ॒न्द्रा॒ग्न्योरुज्जि॑ति॒मनूज्जे॑षं॒ वाज॑स्य मा प्रस॒वेन॒ प्रोहा॑मि। इ॒न्द्रा॒ग्नी तमप॑नुदतां॒ यो॒ऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मो वाज॑स्यैनं प्रस॒वेनापो॑हामि ॥१५॥

अथ पदच्छेदः — अग्नीषोमयोः — उज्जितिं — अनूज्जेषं — वाजस्य — मा — प्रसवेन — अपोहामि — अग्नीषोमौ — तं — अपनुदतां — यः — अस्मान् — द्वेष्टि — यं — च — वयं — द्विष्मः — वाजस्य — एनं — प्रसवेन — अपोहामि — इन्द्राग्न्योः — उज्जितिं — अनू — ज्जेषं — वाजस्य — मा — प्रसवेन — अपोहामि — इन्द्राग्नी — तं — अपनुदताम् — यः — अस्मान् — द्वेष्टि — यं — च — वयं — द्विष्मः — वाजस्य — एनं — प्रसवेन — अपोहामि ॥ अथ मन्त्रार्थः — जुहूपभृतौ व्यूहति तत्र जुहूं प्राचीं प्रेरयति, अग्नीषोमयोः उज्जितिं अनु अविघ्नेन हविः स्वीकाररूपमुत्कृष्टं जयमनुसृत्याहमुज्जेषंमुत्कृष्टं जयं प्राप्तवानस्मि, वाजस्यान्नस्य प्रसवेन नाम प्रेरणया स्वात्मानं यजमानरूपं जुहूरूपधारिणं प्रोहामि नाम प्रोत्साहयामि, उपभृतं प्रतीचीं यो प्रेरयति यज्ञविघ्नकर्ता शत्रुः अस्मान् द्वेष्टि अस्मदीययज्ञविनाशाय द्वेषं करोति यं च वयं द्विष्मः तमुभयविधं शत्रुमग्नीषोमौ देवौ अपनुदतां निराकुरुताम् किं च अहमप्येनं द्विविधं शत्रुमुपभृतरूपं वाजस्यान्नस्य प्रसवेन नाम प्रेरणयापोहामि निराकरोमि, उत्तरौ मन्त्रौ दर्शदेवताविषयौ समानार्थौ — इत्यलम्। शत्रूणां निराकरणे चाग्निसोमौ हि विश्रुतौ कुरुतां मंगलं नित्यं सदा यज्ञे हि भावितौ ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(अथ षोडशी)

वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् । व्यन्तु वयोऽक्तꣳ रिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवंगच्छ ततो नो वृष्टिमावह । चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ॥१६॥

अथ पदच्छेदः—वसुभ्यः—त्वा—रुद्रेभ्यः—त्वा—आदित्येभ्यः—त्वा—सं—जानाथां—द्यावा पृथिवी—मित्रावरुणौ—त्वा—वृष्ट्या—अवताम्—व्यन्तु—वयः — अक्तं — रिहाणाः—मरुतां — पृषतीः—गच्छ—वशा—पृश्निः—भूत्वा—दिवं—गच्छ—ततः—नः—वृष्टिं—आवह—चक्षुष्पा—अग्ने — असि — चक्षुः —मे — पाहि ॥ अथ मन्त्रार्थः—जुह्वा परिधिननक्ति वसुभ्य इति मन्त्रं हे मध्यमपरिधे ! वसुभ्यः वसुदेवताप्रीत्यर्थं त्वा त्वामनज्मि व्यक्तीकरोमि, एवं दक्षिणोत्तरपरिधिमन्त्रौ व्याख्येयौ, परिधित्रयव्यञ्जनेन सवनत्रयदेवता प्रीताः भवन्तु हे द्यावापृथिवी ! द्युलोकभूलोकदैव्यौ । युवां गृह्यमाणं यज्ञप्रस्तरं संजानाथां सम्यगवगच्छतं किं च हे यज्ञकुश प्रस्तर मित्रावरुणौ वृष्ट्या त्वामवताम्, तौ मित्रावरुणौ प्रस्तररूपा सर्वा प्रजा अवताम्—वयो नाम गायत्र्यादीनि छन्दांसि पक्षिणो भूत्वा यज्ञप्रस्तरमादाय दिवं गच्छन्तु, किं भूताः अक्तं नाम घृतलिप्तं प्रस्तरं रिहाणाः लिहिनाः आस्वादयन्तः रलयोरैक्यं, मरुतामिति प्रस्तरदेवत्या बृहती कपिष्टा,, हे यज्ञ प्रस्तर ! त्वं मरुतां पृषतीर्गच्छ, मरुतदेवतानां वाहनभूता चित्रवर्णाऽऽश्वा गच्छ, प्राप्नुहि, हे यज्ञ प्रस्तर ! अन्तरिक्षं तर्पयित्वा वशा पृश्निर्भूत्वा अल्पतनुर्गौ भूत्वा दिवं गच्छ, ततः स्वर्गप्राप्तेरनन्तरं नोऽस्मदर्थं वृष्टिमावह भूलोके वृष्टिमानय, हे अग्ने यतस्त्वं चक्षुष्पा असि अतो मे चक्षुष्पाहि—इत्यलम्

कर्त्ता कर्म च करणं च, सर्वं ब्रह्म प्रचक्षते ।
ऋषिभिर्मन्त्रद्रष्टृभिः, बहुधास्तूयते हितत् ॥
तुष्टिं पुष्टिं तथा वृष्टिं, देहि यज्ञ ! प्रसादतः ।
चक्षुः शक्तिं तथा रक्ष ब्रह्माग्ने त्वं स्वरूपतः ॥१६॥

(अथ सप्तदशी)

यं परिधिं पर्यधत्था अग्ने देव पाणिभिर्गुह्यमानः । तं तऽएतमनु जोषं भराम्येष नेत्त्वदपचेतयाता अग्नेः प्रियं पाथोऽपीतम् ॥१७॥

अथ पदच्छेदः —यं — परिधिं — पर्यधत्थाः — अग्ने — देव — पणिभिः—गुह्यमानः—तं—ते—एतं—अनु—जोषं—भरामि—एषः—नेत्—त्वत्—अपचेतयातै—अग्नेः— प्रियं —पाथः—अपीतम् ॥ अथ मन्त्रार्थः—परिधीननुपहरति—यं परिधिमिति त्रिष्टुप् विराड् रूपाग्नेयी यजुरन्ता अग्नेः प्रियमिति यजुःदेवलदृष्टा, हे आहवनीयाग्ने देव पणिभिरसुरैः गुह्यमानः संरुध्यमानः सन् त्वं यं परिधिं पश्चिमदिशि पर्यधत्थाः असुरोपद्रवनिवारणाय स्थापितवानसि, ते तव जोषं प्रियं तमेतं परिधिमनुभरामि, आहवनीयाग्नौ त्वयि प्रक्षिपामि एष परिधिः त्वत्—त्वत्तः, सकाशात् नेत नैव अपचेतयातै नैवापगच्छतु त्वय्येव तिष्ठतु, दक्षिणोत्तरौ परिधी युगपत् प्रक्षिपेत, हे परिधी ! अग्नेः प्रियं पाथः युवामपीतमपिगच्छतं अग्ने रत्न! त्वं भवद्भ्यां प्राप्यतामित्यलम् अग्निर्वै शरणं समस्तयजने कुर्यात्स नो मङ्गलम् ॥१७॥

[अथाष्टदशी]

स ꣳ स्रवभागाः स्थेषा बृहतः प्रस्तरेष्ठाः परिधेयाश्च देवाः । इमां वाचमभि विश्वे गृणा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्त आसद्यास्मिन् बर्हिषि मादयध्व ँ स्वाहा वाट् ॥१८॥

अथ पदच्छेद — संस्रवभागाः—स्थ—इषा—बृहंतः—प्रस्तरेष्ठाः—परिधेयाः—च-देवाः इमां—वाचं—अभि—विश्वे—गृणन्तः — आसद्य—अस्मिन्—बर्हिषि—मादयध्वं — स्वाहा—वाट ॥ अथ मन्त्रार्थः—संस्रवान् जुहोति। वैश्वदेवी त्रिष्टुप् यजुरन्ता स्वाहा वाडिति यजुः, सोमशुष्म ऋषिः, हे विश्वेदेवाः, यूय संस्रवभागाः स्थ विलीनमाज्यं संस्रवसः एव भागो येषां ते संस्रवभागाः तथाविधाः भवथ, तथा इषा नाम संस्रवलक्षणेनान्नेन बृहंतो महान्तो भवथ, किं च ये प्रस्तरेष्ठाः ये च परिधेयाः परिधिभवाः सन्ति, ते विश्वेदेवाः इमामस्मदीयां वाचमभिगृणन्तः यजमानोऽयं सम्यक् यजति इति सर्वत्र देवलोकेषु वर्णयन्तः यूयमस्मिन् बर्हिषि नाम संसारे यज्ञे आसद्य हविषा स्वात्मानं मादयध्वं स्वतृप्तिं कुरुध्वं, स्वाहा वाट् शब्दौ देवदाने वर्त्तते इत्यलम्। यज्ञेशः शरणं समस्तजगतां कुर्यात्स नो मंगलम् ॥ १८ ॥

(अथैकोनविंशी)

घृताचीं स्थो धुर्य्यौ पात ँ सुम्ने स्थः सुम्ने मां धत्तम्। यज्ञ नमश्च त उप च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥१९॥

अथ पदच्छेदः—घृताची—स्थः—धुर्य्यौ—पातं—सुम्ने—स्थः—सुम्ने—मा—धत्तं—यज्ञ—नमः—च—ते —उप —च —यज्ञस्य—शिवे—संतिष्ठस्व — स्विष्टे —मे — संतिष्ठस्व ॥ अथ मन्त्रार्थ· —जुहूपभृतौ यज्ञशकटधुरि निदध्यात् हे जुहूपभृतौ युवां घृताची स्थः घृतमञ्चतः प्राप्नुतः इति घृताच्यौ प्राप्ते पूर्वसवर्णः, तथा विधे युवां धुर्य्यौ अनड्वाहौ पातं नाम रक्षतं किं च युवां सुम्ने सुखरूपे स्थः तस्मात् सुम्ने सुखे मा नाम मां यजमानं धत्तं नाम स्थापयतम्—अस्य मन्त्रस्य यज्ञो देवता हे यज्ञ ते तुभ्यं नमोऽस्तु उपचयो वृद्धिश्चतेऽस्तु किं च हे यज्ञपुरुष विश्वयज्ञस्य शिवे कल्याणे संतिष्ठस्व किं च मे मम यजमानस्य स्विष्टे नाम शोभने यागे संतिष्ठस्वेत्यलम् ॥ यज्ञो वै शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥१९॥

(अथ विंशी)

अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्टयै पाहि दुरद्वन्या अविषं नः पितुं कृणु। सुषदा योनौ स्वाहा-वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ॥२०॥

अथ पदच्छेदः—अग्ने—अदब्धा—यः—अशीतम—पाहि—मा—दिद्योः — पाहि—प्रसित्यै—पाहि—दुरिष्ट्यै—पाहि—दुरद्वन्या—अविषं—नः—पितुं—कृणु—सुषदा—योनौ—स्वाहा —वाट्—अग्नये—संवेशपतये—स्वाहा—सरस्वत्यै —यशो भगिन्यै—स्वाहा—अथ मन्त्रार्थः—ऋक्ऋचं प्रगृह्णाति, अदब्धोऽनुपहिंसित आयुर्नाम मनुष्यो यजमानो यस्य सोऽदब्धायुः, हे अदब्धायो अहिंसितयजमान, हे अशीतम् भोक्तृतम व्यापकतम अश्नातेरश्नुतेर्वा हे अग्ने गार्हपत्य मां दिद्योः वज्रात् वज्रतुल्यात् शत्रुशस्त्रात् पाहि, दिद्युरिति वज्र नाम प्रसित्यै नाम बंधनरूपात् जालात् मां पाहि, दुरिष्टि नाम अशास्त्रीयो यागः तस्मात् मां पाहि दुरद्वनी गाम दुर्भोजनात् मां पाहि किं च नोऽस्माकं पितुमन्नमविषं कृणु सुषदा योनौ सम्यगवस्थानयोग्ये गृहे मां वासय हे अग्ने दत्तं हविः त्वयि सुहुतमस्तु देवान् प्राप्नोतु,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्त्रीपुरुषयोरेकत्र वासः संवेशः, तस्य पतिः योऽग्निस्तस्मै स्वाहा हविर्दत्तं सुहुतमस्तु, नृणां यशो भगिनी वाग्देवी तस्यै सरस्वत्यै दत्तं हविः सुहुतमस्तु ॥ इत्यलम् । अग्निर्वै शरण समस्तजगतां कुर्यात् स नो मङ्गलम् ॥ २० ॥

(एकविंशी)

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः । देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत इमं देव यज्ञ ५ स्वाहा वाते धाः ॥२१॥

अथ पदच्छेद—वेदः—असि—येन—त्वं—देव—वेद—देवेभ्यः—वेदः—अभवः—तेन—मह्यं—वेदः—भूयाः—देवाः—गातुविदः—गातुं—वित्त्वा—गातुं—इत—मनसस्पते—इमं—देव—यज्ञं—वाते—धाः—अथ मन्त्रार्थः—हे यज्ञ पुरुष त्वं वेदोऽसि यज्ञज्ञातासि, हे देव द्योतनात्मक । येन कारणेन त्वं सर्वयज्ञस्वरूपं वेद नाम जानासि, अतस्त्वां ब्रवीमि देवेभ्यः षष्ठ्यर्थे चतुर्थी, देवानां वेदोऽभवः, ज्ञापकोऽभवः, तेन कारणेन मह्यं नाम मम वेदो भूयाः ज्ञापको भव । देवा गातुविदः इति, इयं विराट्छन्दस्का ऋक्, हे गातुविदः देवाः, यज्ञवेत्तारः, गातु इति यज्ञ नाम, गै शब्दे, गीयते नानावैदिकशब्दैः प्रतिपाद्यते इति गातु यज्ञः, अत एव गातुं नाम यज्ञं समाप्तं वित्त्वा नाम विदित्वा गातुमिति मार्गस्यापि नाम,, यज्ञो भगवान् गातुं नाम स्वमार्गं गच्छत, हे मनसस्पते सोमदेव ! परमेश्वर ! इममनुष्ठितं यज्ञं स्वाहा त्वद्धस्ते समर्पयामि, त्वं ममोपरि प्रसन्नो भूत्वा तं यज्ञं यज्ञफलं च वाते वायुरूपे देवे धाः नाम धेहि स्थापयेत्यर्थः इत्यलम् । यज्ञो यज्ञफलं ददातु सकलं कुर्याच्च नो मङ्गलम् ॥२१॥

(अथ द्वाविंशी)

सं बर्हिरङ्क्ता ५ हविषा घृतेन समादित्यैर्वसुभिः संमरुद्भिः । समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहा ॥२२॥

अथ पदच्छेदः—सं—बर्हिः—अक्तां—हविषा—घृतेन—सं—आदित्यैः—वसुभिः—सं—मरुद्भिः—सं—इन्द्रः—विश्वदेवेभिः—अक्तां—दिव्यं—नभः—गच्छतु—यत्—स्वाहा— ॥२२॥

अथ मन्त्रार्थः—बर्हिर्जुहोति, इयमृक् त्रिष्टुब् विराड्रूपा बर्हिर्देवत्या इन्द्रो हविषा रूपेण घृतेन कुशं समक्तां सम्यगंजनोपेतं करोतु अञ्जु व्यक्तिम्रक्षणकान्तिगतिषु धोतोः रूपं, स इन्द्रः स्वयं न किंतु आदित्यैः वसुभिः मरुद्भिः विश्वेदेवेभः विश्वनामकैश्च गणदेवैः सहितः समङ्क्त तत् बर्हिः यद् दिव्यं नभः आदित्यलक्षणं ज्योतिस्तद्गच्छतु तत् बर्हिः हवनफलमादित्यं प्राप्नोतु, स्वाहा इदं बर्हिर्देवोद्देशेन दत्तं सुहुतमस्तु इत्यलम् । तदेवाग्निस्तदादित्यस्तद्वायुस्तचन्दुद्रमा तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः । इत्यतस्तदेकमेव ब्रह्म वसुषु मरुत्सु विश्वेदेवेषु नभसि आदित्ये ज्योतिषि इन्द्रे च स्तूयते ।

सूर्यो वै शरणं समस्त जगतां कुर्यात्स नो मङ्गलम् ॥२२॥

[अथ त्रयोविंशी]

कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति । पोषाय रक्षसां भागोऽसि ॥२३॥

अथ पदच्छेदः—कः—त्वा—विमुञ्चति—सः—त्वा—विमुञ्चति—कस्मै—त्वा—विमुञ्चति—तस्मै—त्वा—विमुञ्चति—पोषाय—रक्षसां—भागः—असि ॥ अथ मन्त्रार्थः । व्याख्यातो मन्त्रः प्रजापतिर्दैवतः, तत्र यज्ञयोगे नियुक्तोऽत्रतु यज्ञविमोके नियुक्तः, अत्र चत्वारि सर्वनामानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथमतृतीये प्रश्नभूते, द्वितीयचतुर्थे प्रतिप्रश्नभूते। हे यज्ञ त्वां कः विमुञ्चति, सर्वं वेदेषु प्रसिद्धो यः प्रजापतिः सर्वजगतामीश्वरः स एव परमेश्वरः त्वां विमुञ्चति, कस्मै प्रयोजनाय त्वां विमुञ्चति, तस्मै प्रजापतये प्रीत्यर्थं त्वां विमुञ्चति अत्र तु यज्ञविमोके यजमानस्य पोषाय नाम पुत्र पौत्रपुष्टयर्थं त्वां निनयामीति शेषः, "यज्ञं प्रयुज्याविमोके यजमानस्याप्रतिष्ठा स्यात, हे यज्ञहविःपतितभाग त्वं रक्षसां भागोऽसि तेषां नीचत्वात् निकृष्टभाग त्वमित्यलम्। यज्ञो वै शरणं समस्त यजुषां कुर्यात्स नो मङ्गलम् ॥२३॥

(अथ चतुर्विंशी)

संवर्चसा पयसा संतनूभिरगन्महि मनसा स ꣳ शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥२४॥

अथ पदच्छेदः—सं—वर्चसा—पयसा—सं—तनूभिः—अगन्महि—मनसा—सं—शिवेन—त्वष्टा—सुदत्रः—विदधातु—रायः—अनुमार्ष्टु—तन्वः—यद्—विलिष्टं ॥ अथ मन्त्रार्थः—त्वष्टृदेवत्या त्रिष्टुप्-यजमानोऽञ्जलिना पूर्णपात्रं प्रतिगृह्णाति, वयं यजमानाः वर्चसा ब्रह्मवर्चसा समगन्महि संगताः भवेम, पयसाक्षीरादिरसेन समगन्महि, तनूभिः भार्यापुत्रादिभिश्च पुनः शरीरावयवैः समगन्महि, शिवेन शांतने कर्मश्रद्धायुक्तेन मनसा समगन्महि, किं च सुदत्रःशोभनदानः त्वष्टा रायो नाम धनानि विदधातु करोतु, तन्वः शरीरस्य मदीयस्य यद् विलिष्टं न्यूनमगं तदनुमार्ष्टु—न्यूनत्वपरिहारेण शोधयतु धनस्य शरीरस्य च मे पुष्टिं करोतु इत्यलम्। प्रसन्नेन्द्रियसमायुक्ताः मनोवाक्कायकर्मभिः ब्रह्मतेजस्तथा भद्रं प्राप्नुयां तव प्रसादतः ॥२४॥

(अथ पञ्चविंशी)

दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्ता योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः संज्योतिषाभूम ॥२५॥

अथ पदच्छेदः—दिवि—विष्णुः—व्यक्रंस्त—जागतेन—छन्दसा—ततः—निर्भक्तः—यः—अस्मान्—द्वेष्टि—यं—च—वयं—द्विष्मः—अन्तरिक्षे—विष्णुः—व्यक्रंस्त—त्रैष्टुभेन—छन्दसा—ततः—निर्भक्तः—यः—अस्मान्—द्वेष्टि—यं—च—वयं—द्विष्मः—पृथिव्यां—विष्णुः—व्यक्रंस्त—गायत्रेण—छन्दसा—ततः—निर्भक्तः—यः—अस्मान्—द्वेष्टि—यं—च—वयं—द्विष्मः—अस्मात्—अन्नात्—अस्यै—प्रतिष्ठाया—अगन्म—स्वः—सं—ज्योतिषः—अभूम ॥ अथ मन्त्रार्थः—विष्णुक्रमान् क्रमते दिवि, विष्णुरिति विष्णुपादभावनया स्वपादस्य भूमौ प्रक्षेपाः विष्णुक्रमाः, विष्णुः यज्ञपुरुषो जागतेन छन्दसा, जगती छन्दोरूपेण स्वकीयेन पादेन दिवि द्युलोके व्यक्रंस्त विशेषेण क्रमणं कृतवान्, तथा सति ततो द्युलोकात् निर्भक्तो नाम भागरहितः सन् निःसारितोऽभवत् कः योऽस्मान् द्वेष्टि यं च वयं द्विष्मः—योऽस्मान् दृष्ट्वा न प्रीयते यं च दृष्ट्वा वयं न प्रीयामहि योऽदानशीलः दुष्कर्मा स ईदृशः शत्रुः दिवः निःसारितोऽभवत्, स यज्ञपुरुषो विष्णुः अन्तरिक्षलोके व्यक्रंस्त पादन्यासं कृतवान् त्रैष्टुभेन छन्दसा त्रिष्टुप्छन्दोरूपेण तृतीयेन पादेन ततो निर्भक्तः योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यादि पूर्ववत्, स विष्णुर्यज्ञपुरुषः पृथिव्यां व्यक्रंस्त, वि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमणं कृतवान् गायत्रेण छन्दसा गायत्रीछन्दो रूपेण पादेन ततो निर्भक्त इत्यादिः पूर्ववत् अस्मादन्नात् यज्ञभागात् निर्भक्त इति पूर्ववत्, अस्यै नाम अस्याः पुरतो दृश्यमानायाः प्रतिष्ठाहेतोः यज्ञभूमेः निर्भक्त इत्यादि पूर्ववत्, वयं यजमानाः यज्ञानुष्टानेन पूर्वस्यां दिशि स्थितं स्वः सूर्यं स्वर्गं वा अगन्मः प्राप्ताः इत्यर्थः ज्योतिषा हवनीयलक्षणेन वयं समभूम संगता अभूम ते पूर्वोक्ताः दुष्टकर्माणः सर्वेऽन्धतामिस्रादिषु जायन्ते—इत्यलम् ॥ ज्योतिष्मान् विष्णुः समस्त जगतां कुर्यात्सदा मङ्गलम् ॥२५॥

(अथ षड्विंशी)

स्वयम्भूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि। सूर्यस्यावृतमन्वावर्ते ॥२६॥

अथ पदच्छेदः—स्वयंभूः—असि—श्रेष्ठः—रश्मिः—वर्चोदा—असि —वर्चः —मे—देहि—सूर्यस्य—आवृतम्—अन्वावर्ते ॥ अथ मन्त्रार्थः—सूर्यमुदीक्षते—हे सूर्य—त्वं स्वयंभूरकृतकः स्वयं सिद्धोऽसि श्रेष्ठः प्रशस्यतमः रश्मिर्नाम आदित्यमण्डलशरीराभिमानीहिरण्यगर्भाख्यपुरुषोऽसि सूर्यस्य सप्तरश्मयः सन्ति चतुर्दिक्षु चत्वारः एकः उपर्येकोऽधस्तात् सप्तमो मण्डलाभिमानी हिरण्यगर्भः स श्रेष्ठः स त्वमसि यथा त्वं वर्चोदा असि अतो मे वर्चो ब्रह्मवर्चसं देहि, सूर्यस्य संबंधिनीमावृतमावर्त्तनमनुसृत्याहमपि आवर्त्ते प्रादक्षिण्येनावर्त्तनं करोमि इत्यलम् ॥ सूर्यो ब्रह्म महत् तेजः पुरुषः परमो महान् । वर्चस्कामा वयं सर्वे प्रार्थयामः तवाग्रतः ॥२६॥

(अथ सप्तविंशी)

अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयास ꣳ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः ॥ अस्थूरि नौ गार्हपत्यानि सन्तु शत ꣳ हिमाः सूर्यस्यावृतमन्वावर्त्ते ॥२७॥

अथ पदच्छेदः—अग्ने—गृहपते—सुगृहपतिः—त्वया—अग्ने—अहं—गृहपतिना—भूयासम्—सुगृहपतिः—त्वं—मया—अग्ने—गृहपतिना—भूयाः—अस्थूरि—नौ—गार्हपत्यानि—सन्तु—शतं—हिमाः—सूर्यस्य —आवृतं —अन्वावर्ते ॥ अथ मन्त्रार्थः—गार्हपत्यमुपतिष्टते, अग्ने गृहपते इति—हे गृहपते गृह पालक हे अग्ने त्वया गृहपतिना गृहपालकेन अहं सुगृहपतिः भूयासं संभवेयम्—तथा हे अग्ने त्वमपि मया — गृहपतिना मदीयसेवया सुगृहपतिः शोभनो गृहपालको भूया भव- एवं सति नौ आवयोः गार्हपत्यानि गृहपतिभ्यां स्त्रीपुंभ्यां निष्पाद्यानि कर्माणि शतं हिमाः शतवर्षमर्य्यन्तं अस्थूरीव सन्तु अव्यवहितानि प्रवर्त्तन्तां—अस्थूरि लुप्तोपमा वलीवर्द युक्तशकटमिव प्रवर्त्तन्ताम्—शतं वर्षाणि सूर्यस्यावृतमावर्त्तनं अनुसृत्याहमपि आवर्त्ते, प्रादक्षिणेनावर्त्तनं करोमि इत्यलम् ॥ देहि गृहं धनं धान्यं जीवनं शतवार्षिकं । मंगलं कुरु तत्सर्वं येन यज्ञं प्रशास्महे ॥ अग्ने च जातवेदस्त्वां नमस्कुर्मः सदा वयम् ॥२७॥

(अथाष्टाविंशी)

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीदमहं य एवास्मि सोऽस्मि ॥२८॥

अथ पदच्छेदः—अग्ने—व्रतपते—व्रतं—अचारिषं—तत्—अशकं—तत्—मे—अराधि—इदं—अहं—यः—एव—अस्मि—सः—अस्मि ॥

अथ मन्त्रार्थः—व्रतग्रहणे मन्त्रद्वययुक्तं तयोर्मध्ये येन व्रतादानं कृतं प्रथमेन द्वितीयेनवा अत्रापि तदनुसारेण व्रतं विसृजेत् व्रतमिति कर्म नाम—हे अग्ने—व्रतपते कर्मपालक व्रतमचारिषं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञकर्मानुष्ठानं कृतवानस्मि, तत् यज्ञकर्म कर्त्तुमशकं नाम शक्तोऽभवम् — तत्प्रसादात् त्वया च मे मम तदिदं मदीयं कर्मफलं अराधि साधितं ॥ द्वितीयो मन्त्रः हे अग्ने इदं यज्ञकर्म समाप्य योऽहं यज्ञकर्मणः पुराऽऽस्मि स एव मनुष्योऽहमधुनास्मि ॥ इति दर्शे पूर्णमासेष्टिमन्त्राः समाप्ताः॥ इत्यलम् । अग्निर्यज्ञपतिः समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥२८॥

(अथैकोनत्रिंशी)

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा । अपहता असुरा रक्षा ꣳसि वेदिषदः ॥२९॥

अथ पदच्छेदः—अग्नये—कव्यवाहनाय—स्वाहा—सोमाय—पितृमते—स्वाहा—अपहता—असुरा—रक्षांसि—वेदिषदः ॥ अथ मन्त्रार्थः—अतः परं पिण्डपितृयज्ञमन्त्राः । तेषां प्रजापतिऋषिः अतीतानागतवर्त्तमानपदार्थज्ञानदर्शिनः कवयः संति ते कवयो नाम पितरस्तेषां सम्बन्धि हविः कव्यं भवति, कव्यं वहतीति कव्यवाहनो ऽग्निस्तस्मै कव्यवाहनायाग्नये स्वाहा हविर्दत्तं शुभं सुहुतमस्तु, पितृमते पितृसंयुक्ताय सोमनामकाय देवाय स्वाहा, वेद्यां सीदन्तीति वेदिषदः देवाविमौ मन्त्रौ—तादृशाः असुरा अपहताग्निवेदिसकाशात् निःसारितानि असुराः रक्षांसि देवविरोधिनः आसन् । पितॄणां देवतानां च कव्यहव्ययोर्वाहनः । करोतु मङ्गलम् नित्यं सदासुरविनाशकः ॥२९॥

(अथ त्रिंशी)

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥३०॥

अथ पदच्छेदः—ये—रूपाणि—प्रतिमुञ्चमानाः—असुराः—सन्तः—स्वधया—चरन्ति—परापुरः—निपुरः—ये—भरन्ति—अग्निः—तान्—लोकात्—प्रणुदाति—अस्मात् ॥ अथ मन्त्रार्थः—उल्मुकं परस्तात्करोति, इयं त्रिष्टुप् कव्यवाहनाग्निदेवत्या-येऽसुराः देवविरोधिनः सन्तः, स्वधया पैतृकान्नेन निमित्तेन रूपाणि प्रतिमुञ्चमानाः पितृसमानि रूपाणि धारयन्तः पितृयज्ञस्थाने चरन्ति, येऽसुराः परापुरः निपुरश्च भरन्ति, पराक्रान्ताः पुरः इति परापुरः स्थूलदेहान् । निकृष्टाः पुरः इति निपुरः, सूक्ष्मदेहान् च ये धारयन्ति । स्वमसुरत्वं प्रच्छादयतुं ये स्थूलसूक्ष्म शरीराणि बिभ्रति अस्मात् पितृयज्ञस्थानात् तानसुरान् प्रणुदाति प्रकर्षेण अपसारयतु ॥ अग्निर्यज्ञपतिः समस्तजगतां कुर्यात्स नो मङ्गलम् ॥३०॥

(अथैकत्रिंशी)

अत्र पितरो मादयध्वं यथा भागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ॥३१॥

अथ पदच्छेदः—अत्र—पितरः—माद यध्वम्—यथाभागं—आवृषायध्वम्—अमीमदन्त—पितरः—यथाभागं—आवृषायिषत ॥ अथ मन्त्रार्थः—श्वासनिरोधेनग्लानिपर्यन्तमुदङ्मुखः तिष्ठति, हे पितृदेवाः अत्रास्मिन् पितृयज्ञे यूयं मादयध्वम्—हृष्टाः भवत किं च यथाभागं यो यस्य भागस्तं भागमनतिक्रम्य आवृषायध्वम्,अङ्पूर्वात्वृषशब्दात्कर्त्तुः क्यङ् सलोपश्चेति क्यङ् वृषवदेतान् पिण्डान् अश्नीत यथा वृषः स्वाभीष्टं घासं प्राप्य तृप्तिपर्यन्तं घासं भक्षयति। यान् पितॄन् प्रति मादयध्वमित्युक्तं ते पितरः अमीमदन्त हृष्टाः आसन् यथाभागमावृषायिषत, स्वं भागमनतिक्रम्य वृषवदशितवन्तः, इत्यलम् ॥ पितरः पितृयज्ञेषु तुष्टाः सर्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यैसिद्धिदाः धनधान्य समायुक्ता नान्धन्त्येव न संशयः ॥३१॥

(अथ द्वात्रिंक्षी)

नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास आधत्त ॥३२॥

अथ पदच्छेदः—नमः वः—पितरः — रसाय-नमः—वः—पितरः—शोषाय—नमः—वः—पितरः—जीवाय—नमः—वः—पितरः—स्वधायै नमः—वः—पितरः—घोराय—नमः—वः—पितरः—मन्यवे — नमः—वः—पितरः—पितरः—नमः—वः—गृहान् नः—पितरः—दत्त—सतः—वः—पितरः—देष्म—एतद्—वः—पितरः—वासः—आधत्त ॥ अथ मन्त्रार्थः—नमो वः इत्यञ्जलिं करोति, द्वादशादित्याः वै पितरः तेषां षड् ऋतवो रूपं, हे पितरो वो युष्माकं संबन्धिने रसाय रसभूताय चैत्रवैशाखरूपाय वसन्ताय नमोऽस्तु, हे पितरो वो युष्माकं संबन्धिने शोषाय शोषप्रभावाय ज्येष्ठाषाढरूपाय ग्रीष्माय नमोऽस्तु हे पितरो वो युष्माकं सम्बन्धिने जीवाय जीवनहेतुभूताय श्रावणभाद्रपदरूपाय वर्षर्तवे नमोऽस्तु हे पितरो वो युष्माकं सम्बन्धिने स्वधायै स्वान् पितॄन् दधातीति स्वधा पितॄणं स्वधान्नभूताश्विनकार्त्तिरूपाय शरदृतवे नमोऽस्तु, हे पितरो वो युष्माकं सम्बन्धिने घोराय नाम मार्गशीर्षपौषरूपाय हेमन्त ऋतवे नमोऽस्तु, हे पितरो वो युष्माकं सम्बन्धिने मन्यवे नाम माघफाल्गुणरूपाय शिशिर ऋतवे नमोऽस्तु, हे पितरः ! एवं विध ऋतुरूपेभ्यो वो युष्मभ्यं नमोऽस्तु, हे पितरो वो नमः, अभ्यास आदरार्थः, हे पितरः नोऽस्मभ्यगृहान् नाम भार्यापुत्रपौत्रान् यूयं दत्त, हे पितरो वो युष्मभ्यं सतः विद्यमानधनकारणात् एतद्धविर्विषयं देष्म ददामः, हविर्दत्तात्मस्माकं कदाचित् द्रव्यक्षयो मा भवतु, हे पितरो वो युष्मभ्यमेतद् वासः सूत्रं परिधानमस्तु ॥ वर्षर्तुमासरूपेभ्यः नमस्कुर्मः सदा वयम् । कृष्णशुक्लद्विपक्षेभ्यः पितरेभ्य स्तथा वयम् ॥ कुर्वन्तु मङ्गलम् नित्यं सदा यज्ञेषु भाविताः ॥३२॥

(अथ त्रयस्त्रिंशी)

आधत्त पितरो गर्भं कुमारं पुष्करस्रजं । यथेह पुरुषोऽसत् ॥३३॥

अथ पदच्छेदः—आधत्त—पितरः—गर्भं—कुमारं—पुष्करस्रजं — यथा —इह — पुरुषः—असत् ॥ अथ मन्त्रार्थः— पुत्रकामा पत्नी मध्यमं पिण्डं प्राश्नाति, गायत्री पितृदेवत्या । हे पितरः यथा इह अस्मिन्नेव ऋतौ पुरुषो देवपितृमनुष्याणामपेक्षितार्थस्य पूरयिता असत् नाम भूयात्—तथा कुमारं गर्भं पुत्ररूपं गर्भं यूयमाधत्त सम्पादयत किं भूतं कुमारं यथा अश्विनीकुमारौ पुष्करस्रजौ देवभिषजौ तत्तुल्यं कुमारं सर्वं रोगरहितं सुन्दरं च पुत्रमाधत्तेति सूचितं इत्यलम् । गर्भं शुभगुणोपेतं सुमनस्कं शुभेन्द्रियं । धारयन्तु जगत्यस्मिन् पूजिताः पितरः सदा ॥३३॥

(अथ चतुस्त्रिंशी)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् ॥३४॥

अथ पदच्छेदः—ऊर्जं —वहन्ती—अमृतं—घृतं—पयः—कीलालं —परिस्रुतम् —स्वधा —स्थ—तर्पयत—मे—पितॄन् ॥ अथ मन्त्रार्थः—ऊर्जमित्यपो निषिञ्चतीति—अब्देवत्या विराट्—हे आपः यूयं स्वधास्थ पित्र्यहविः स्वरूपाः भवथ-अतो मे पितॄन् तर्पयत, पित्र्युपलक्षितान् सर्वान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जीवसंघान् तर्पयत सर्वं विश्वं च तर्पयत, कीदृश्यः यूयं परिस्रुतं माधुर्य्यगुणोपेतमूर्जं अमृतं सर्वरोग विनाशकं मृत्युनाशकं च पुनः कीलालं कीलबंधने धातो रूपं कीलः, कीलमलतीति कीलालः—अल भूषणपर्य्याप्तिवारणनिन्दानिषेधेष्विति, धातो रूपं कीलालं सर्वबन्धनिवर्त्तकं ऊर्जं घृतं पयो वहन्ती नाम वहन्त्यः, ईदृश्यः आपः ऊर्जं घृतं पयः इति त्रिविधं रसं धारयन्त्यः विश्वं पुष्टन्ति इत्यलम्। आपो वै शरणं समस्त जगतां कुर्वन्तु नो मङ्गलम् ॥३४॥

मयो गोकुल चन्द्रेण मन्त्रार्थस्यनिरूपणे। इध्मप्रोक्षाक्षिपिड्यान्तो द्वितीयोऽध्याय ईरितः ॥

श्री हरिः शरणम्

अथ तृतीयाध्यायसमारम्भः

(तत्र प्रथमा)

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम।
आस्मिन् हव्या जुहोतन ॥१॥

अथ पदच्छेदः—समिधा—अग्निं—दुवस्यत—घृतैः—बोधयत—अतिथिं—आ—अस्मिन्—हव्या—जुहोतन—अथ मन्त्रार्थः—अध्यायद्वयेन दर्शपौर्णमासेष्टिमन्त्रा उक्ताः अथाधानमन्त्रा उच्यन्ते—प्रागग्निर्ज्योतिरित्यन्तेभ्यः देवानां प्रजापतेरग्नेर्गन्धर्वाणामार्षे, आग्नेयाश्चतिस्रो गाय्योः, हे ऋत्विजः यूयं समिधा अग्निं दुवस्यत परिचरत दुवस्यतिः परिचणार्थः, पूर्णाहुतिसंबन्धिभिर्घृतैरतिथिं अतिथिभावेन पूजनीयमग्निं समिधा बोधयत प्रज्वालयत अस्मिन्नग्नौ प्रज्वलिते सति हव्या नाम हवींषि आजुहोतन सर्वतो जुहुत तप्तनप्तनथनाश्चेति तनबादेशः, इत्यलम्। अग्निर्वै शरणं समस्त जगतां कुर्यात्स नो मङ्गलम् ॥१॥

(अथ द्वितीया)

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन।
अग्नये जातवेदसे ॥२॥

अथ पदच्छेदः—सुसमिद्धाय—शोचिषे—घृतं—तीव्रं—जुहोतन—अग्नये—जातवेदसे॥ अथ मन्त्रार्थः—हे ऋत्विजः अग्नये यूयं घृतेन जुहोतन जुहुत तप्तनप्तनथनाश्चेति तनबादेशो, उपजन भवति कर्त्तन हन्तन यावन वत, किं भूताय अग्नये शोचिषे दीप्तिमते ज्वलिताय जातवेदसे जातानि वेदांसि ज्ञानानि यस्मात् तस्मै जातवेदसे किं भूतं घृतं तीव्रं नाम संस्कारैः संस्कृतम्। अग्निर्वै शरणं समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥२॥

(अथ तृतीया)

तं त्वा समिद्भिरङ्गिरो घृतेनं वर्धयामसि। बृहच्छोचा यविष्ठ्य ॥३॥

अथ पदच्छेदः—तं—त्वा—समिद्भिः—अङ्गिरः—घृतेन—वर्धयामसि—बृहत्—शोचाः—यविष्ठ्य॥ अथ मन्त्रार्थः—हे अङ्गिरः सर्वयागेषु गमनशील भगवन्नग्ने एतद्गुणविशिष्टं त्वां समिद्भिर्यज्ञसम्बन्धिकाष्ठैर्घृतेन संस्कृताज्येन च वर्धयामसि वयं वर्धयामः प्रवृद्धं कुर्मः, हे यविष्ठ्य युवतम तथाविधाग्ने बृहत् प्रवृद्धं यथा तथा शोच दीप्यस्व दीप्तो भव, ह्यश्चोऽनस्तिङः इति संहितायां दीर्घ इत्यलम्॥ शोचिष्केशो हि वै विष्णुः तुष्टिं पुष्टिं करोतु नः ॥३॥

(अथ चतुर्थी)

उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत।
जुषस्व समिधो मम ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः —उप —त्वा—अग्ने — हविष्मतीः—घृताचीः—यन्तु—हर्यत—जुषस्व—समिधः—मम—अथ मन्त्रार्थः—उपत्वेति जपति, हे अग्ने हविष्मतीः हविष्मत्यः—हविर्युक्ताः घृताचीः घृताक्ताः एताः समिधस्त्वामुपयन्तु त्वां प्राप्नुवन्तु, हे हर्यत हे कान्तिरूप हे अग्ने मम मदीयाः समिधः त्वं जुषस्व सेवस्व त्वमंगीकुरु, हविष्मतीरित्यादौ वा छन्दसि, इति पूर्व सवण दीर्घत्वमित्यलम् ॥ हविष्मान् वै सदा विष्णुः सेवतां समिधो मम ॥४॥

(अथ पञ्चमी)

भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा । तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥५॥

अथ पदच्छेदः—भूः—भुवः—स्वः—द्यौः—इव—भूम्ना—पृथिवी—इव—वरिम्णा—तस्याः—ते-पृथिवि—देवयजनि-पृष्ठे—अग्निं— अन्नादं—अन्नाद्याय—आदधे ॥ अथ मन्त्रार्थः—भूर्भुवः स्वः महाव्याहृतयः प्रजापतेरार्षं गार्हपत्याहवनीययोराधानमन्त्राः, पृथिव्यन्तरिक्षद्युलोकाः अभिधेयाः,, यजमानो भूर्भुवः स्वरितिव्याहृतीनामुच्चारणेनाग्निं स्थापयेत् । हे पृथिवि देवयजनि ! देवाः ईज्यन्ते यस्यां सेति देवयजनी तत्संबुद्धौ देवयजनि, तस्यास्ते तव पृष्ठेऽग्निमन्नादमहमादधे, स्थापयामि, किमर्थं अन्नाद्याय अदनीयान्नस्य भक्षणाय, एतदुक्तं भवति, आपो वै अन्नं पृथिवी अन्नं अग्निरन्नादः, तस्याः पृथिव्याः पृष्ठेऽग्निमाधाय मन्त्र द्रष्टा ब्रवीति, द्यौरिव भूम्ना महत्त्वेनाहं भूयासं, यथा द्यौः भूम्ना ग्रहनक्षत्रताराभिर्महती, तथाहं भार्यापुत्रपौत्रादिभिर्महान् भूयासं, पृथिवीव वरिम्णा यथा पृथिवी उरुत्वेन सर्वप्राणिनामाधारभूता तथाहमपि सर्वप्राणिनामाश्रयो भूयासम, कीदृशमग्निं द्यौरिव भूम्ना, महत्त्वेन महान् पृथिवीव वरिम्णा विस्तीर्ण इत्यलम्। अग्निर्वै शरणं त्रिलोकजनकः कुर्यात्स नो मङ्गलम् ॥५॥

(अथ षष्ठी)

आयं गौः पृश्निरक्रमीदसन्मातरं पुरः पितरं च प्रयन्त्स्वः ॥६॥

अथ पदच्छेदः—आं—अयं —गौः-पृश्निः-अक्रमीत्—असदत् — मातरं —पुरः—पितरं—च—प्रयन्—स्वः ॥ अथ मन्त्रार्थः—आयं गौरित्यादीनां तिसृणामृचां सर्पराज्ञी कद्रूः पृथिव्यभिमानी देवतार्षं, ताभिर्ऋग्भिराहवनीयाग्निमुपतिष्टते । ततो दक्षिणाग्निमादध्यात्, अग्निः परापरूपेण स्तूयते अयं दृश्यमानो अग्निरक्रमीत्—सर्वतः विश्वयज्ञकर्मसु क्रमणं कृतवान् किं भूतोऽग्निः, विश्वयज्ञनिष्पत्तये सर्वत्र गच्छतीति गौः, गमेर्डो प्रत्ययः, तथा पृश्निः चित्रवर्णः, आक्रमणमाह, पुरः प्राच्यां दिशि मातरं पृथिवीं असदत् स्थावरजंगमरूपेण प्राप्तवान्, तथा स्वः प्रयन्, आदित्यरूपेण स्वर्गे संचरन्, देवरूपं प्राप्तवान्, पितरं द्युलोकमपिग्रहनक्षत्रतारादिरूपेण प्राप्तवान्, एतदुक्तं भवति द्यौरेव पिता पृथिवी माता इत्यलम् अग्निर्वै शरणं सुविश्वयज्ञने कुर्यात्स नो मङ्गलम् ॥६॥

(अथ सप्तमी)

अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥७॥

अथ पदच्छेदः—अन्तः—चरति—रोचना-अस्य—प्राणात्—अपानती—व्यख्यन्—महिषः—दिवम् ॥ अथ मन्त्रार्थः—एवमादित्यरूपेणाग्निं स्तुत्वा वायुरूपेण स्तौति, आस्याग्नेः रोचना नाम वाग्व्याख्या शक्तिः, अन्तश्चरति द्यावापृथिव्योर्मध्ये प्राणिशरीरमध्ये चरति, अन्तरिक्षेऽयं तिर्यग् वायुश्चरति, किं कुर्वती प्राणादपानती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वप्राणिशरीरेषु प्राणव्यापारादनन्तरमपानव्यापारं कुर्वती, अपानव्यापारादनन्तरं प्राणव्यापारं कुर्वती,सती जठराग्नौ शरीरे तत्रोष्मायाः सद्भावात् प्राणापानौ प्रवर्त्तेते, तस्मादग्निः प्राणापानरूपः य एन मुपतिष्टते तस्य किं फलं करोत्याह-महिषोऽग्निः दिवं व्यख्यत, द्युलोकभोगस्थानमुपासकेभ्यः विशेषेण प्रकाशितवान्। प्राणापानादिरूपैश्च दिव्यैं र्भोगैश्च सर्वदा। उद्भासयतु लोकान् वै अग्निर्वायू रविस्तथा ॥ ७ ॥

(अथाष्टमी)

त्रिꣳ शद्धाम विराजति वाक् पतङ्गाय धीयते। प्रतिवस्तोरह द्युभिः ॥८॥

अथ पदच्छेदः—त्रिंशत्—धाम—विराजति—वाक्—पतंगाय—धीयते—प्रतिवस्तोः—अह—द्युभिः ॥८॥

अथ मन्त्रार्थः—सुपां सलुक्, इत्यादि सूत्रेण त्रिंशत् शब्दात् धामशब्दाच्च सुपोलुक् धामानि त्रयाणि संति, स्थानानि, नामानि, जन्मानि चेति अत्र धाम शब्देन स्थानमुच्यते। अहोरात्रस्य त्रिंशत् मुहूर्त्ता धामशब्देनाभिप्रेताः त्रिंशत्सु धामसु मुहूर्त्ताख्येषु स्थानेषु वा वाग् (विराजति शोभते स्तूयमाना ऋग्यजुः)सामलक्षणा सा वाक् पतङ्गाय धीयते गामाग्न्यर्थेमुच्चार्यते,, काष्ठादिषु पतन् गच्छतीति पतङ्गोऽग्निः सर्वदेव सम्बन्धिनीभिः स्तुतिभिरग्निरेव स्तूयते सर्वात्मकत्वात्, न केवलं त्रिंशद्धामसु इत्युक्तं किं तर्हि प्रति वस्तो प्रत्यहं या स्तुतिलक्षणा वाक् या च द्युभिः कालावयवैर्या स्तुति लक्षणा वाक् विराजति सापि पतङ्गाय नामाग्न्यर्थमुच्चायते नान्यस्यै देवतायै वस्तो द्युः भानु इत्यहर्नाम सु पठितं, अह इति निपातो विनिग्रहे, सर्वकालं सर्वा स्तुतिः वागग्न्यर्थं स्तूयते इत्यलम् ॥ अग्निर्वै सर्वदेवात्मा करोतु मङ्गलम् सदा ॥८॥

इत्यग्न्याधेय मन्त्राः समाप्ताः ॥

अथाग्निहोत्रहोममन्त्राः अग्निर्ज्योतिरित्यारभ्य उपप्रयन्तः इत्यतः प्राक् ॥

(अथ नवमी)

अग्निर्ज्योति र्ज्योतिरग्निः स्वाहा, सूर्यो ज्योति र्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा, सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥९॥

अथ पदच्छेदः—अग्निः—ज्योतिः—ज्योतिः—अग्निः—स्वाहा—सूर्यः—ज्योतिः—ज्योतिः—सूर्यः—स्वाहा—अग्निः—वर्चः—ज्योतिः—वर्चः—स्वाहा—सूर्यः—वर्चः—ज्योतिः—वर्चः—स्वाहा—ज्योतिः—सूर्यः—सूर्यः—ज्योतिः—स्वाहा ॥ अथाग्निहोत्रमन्त्राः अग्निर्ज्योतिरित्यारभ्य उपप्रयन्न इत्यतः प्राक् तन्मन्त्राणां प्रजापतिर्ऋषिः सामान्यतः सप्तलिङ्गोक्ता देवता, गायत्र्यः। आद्याः पञ्चैकपदाः, अग्निर्ज्योतिः सूर्योज्योतिः द्वे एकपदे गायत्र्यौ,, तक्षा ऋषिरपश्यत् परां ज्योतिः सूर्यः, चेलकस्य पुत्रो जीवलऋषिरपश्यत् तामभिलक्ष्य जुहुयात्,, मन्त्रार्थस्तु, योऽयमग्निर्देवः स एव ज्योतिः दृश्यमानज्योतिःस्वरूपं, यच्चेदं दृश्यमानं ज्योतिः तदेवाग्निर्देवः, देवस्य ज्योतिषश्चाभेदेन प्रतिपादनं, स्वाहा ज्योतीरूपायाग्नये हविः सुहुतमस्तु, अयं सायं कालीनोऽग्निहोत्रहोम मन्त्रः, सूर्योऽज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्होममन्त्रः, पूर्ववत् व्याख्येयः, योऽयं सूर्यो देवः स एव ज्योतिः दृश्यमानं ज्योतिः स्वरूपः यच्चेदं दृश्यमानं ज्योतिः तदेव सूर्योदेवः सूर्यस्य ज्योतिषश्चाभेदेन प्रतिपादनं, स्वाहा ज्योतिरूपाय सूर्याय हविः प्रदत्तं सुहुतमस्तु,, सूर्य सम्बन्धि तेजो रात्रावग्निं प्रविशति इति साय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मग्नि ज्योतिरिति मन्त्रः प्रयुक्तः,, उदयकालेषु अग्नि सम्बन्धि ज्योतिः सूर्यं प्रविशति तस्माद् प्रातः सूर्यो ज्योतिरिति मन्त्रः प्रयुक्तः ब्रह्मवर्चस्कामस्तु अग्निर्वर्चः सूर्योवर्च इति सायं प्रातश्च जुहुयात्—योऽग्निर्वर्चो नन्यभूतं यस्य तज्योतिर्वर्चो नन्यभूत तस्मै प्रदत्त हविः सुहुतमस्तु इति सायं मन्त्रः,, यः सूर्यो वर्चो नन्यभूतो यस्य तज्ज्योतिर्वर्चो नन्यभूतं तस्मै प्रदत्तं हविः सुहुतमस्तु इति प्रातः होम मन्त्रः ॥ इत्यलम् ॥ यज्ज्योतिः स एव सूर्यः, यः सूर्यः स ज्योतिरेव तस्मै सूर्याय स्वाहा ॥ ब्रह्मतेजस्त्वमापन्ना वेदपाठेरतास्तथा यज्ञकर्मसुनिष्णाताः लभन्ते परमं पदं ॥९॥

(अथ दशमी)

सजूर्देवेनसवित्रा सजू राज्येन्द्रवत्या ।
जुषाणो अग्निर्वेतु स्वाहा । सजूर्देवेन सवित्रा
सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु
स्वाहा ॥१०॥

अथ पदच्छेदः — सजुः — देवेन— सवित्रा — सजुः—देवेन— सवित्रा—सजूः — राज्या — इन्द्रवत्या — जुषाणः — अग्निः — वेतु—स्वाहा-सजूः—देवेन —सवित्रा -सजूः—उषसा—इन्द्रवत्या—जुषाणः —सूर्यः—वेतु — स्वाहा ॥ अथ मन्त्रार्थः — पूर्वोक्तमन्त्रैः सह सजूरित्यादिमन्त्रद्वयं विकल्पितं, सोऽयमग्निर्वेतु मदीयं हविः भक्ष्यतु, वी प्रजनन कान्त्यसनखादनेषु धातोः प्रयोगः—किं भूतोऽग्निः सवित्रा देवेन प्रेरकेन परमेश्वरेण सह सजूः नामसमानप्रीति तथा इन्द्रवत्या राज्या इन्द्रेण देवेनोपेतया राज्या रात्रिदेवतया सजूः नाम समानप्रीतिः तथा जुषाणः मदीयं हविः सेवमानः,एवं गुणविशिष्टो ऽग्निर्देवः तस्मै स्वाहास्मद्दत्तं हविः सुहुतमस्तु । इति सायं होममन्त्रः, अयं सूर्यो मदीयं हविः वेतु नाम भक्षयतु, किं भूतः सूर्यः सवित्रा नाम प्रेरकेण देवेन सह समान प्रीतिः तथास्मदीयं हविः जुषाणः, ईदृशगुणविशिष्टः सूर्यो देवः तस्मै स्वाहास्मत्प्रदत्तं हविः सुहुतमस्तु इति प्रातर्होममन्त्रः, इत्यलम् सूर्यो ददातु वै तेजः अग्निर्वर्चो ददातु मे यतो धर्मसमापन्नाः वेदविद्यामुपास्महे ॥ १०॥

(अथैकादशी)

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ॥११॥

अथ पदच्छेदः—उप—प्रयन्तः—अध्वरं-मन्त्रं—वोचेम—अग्नये—आरे —अस्मे —च—शृण्वते । अथ मन्त्रार्थः—अथ यजमानाग्न्युपस्थानं-उपप्रयन्तो अध्वरं सुपोषः पौषैरित्यन्तं देवानामार्षं, आद्ये द्वे आग्नेयौ गायत्र्यौ उपप्रयन्त श्चेति मन्त्रमार्षं —मन्त्रार्थस्तु —वयमनुष्ठातारोऽग्नयेऽग्न्यर्थमनेनत्राणकारणं मन्त्रं वोचेम किं भूताः वयं, अध्वरं यज्ञमुपप्रयन्तः उपगच्छन्तः किं भूतायाग्नये आरे नाम दूरे अस्मे नामास्माकं समीपे चेति शेषः, शृण्वते दूरे समीपे चास्मदीयं वाक्यं श्रोतु मुद्युक्ताय वोचेमेति वक्तेराशीर्लिङि परस्मैपदे उत्तमपुरुषबहुवचनं लिङ्याशिष्यङ्, इत्यङ यासुट्, अतोयेयः, छन्दस्युभयथा इति सार्वधातुकत्वं सुपां सुलुगिति शे आदेशः, इत्यलम् अग्नियज्ञपतिः सुविश्वयज्ञने कुर्यात्स नो मङ्गलम् ॥११॥

(अथ द्वादशी)

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या
अयम् । अपा ँ रेता ँ सि जिन्वति ॥१२॥

अथ पदच्छेदः—अग्निः—मूर्धा—दिवः—ककुत्—पतिः—पृथिव्याः—अयं—अपां-रेतांसि जिन्वति । अथ मन्त्रार्थः—परापररूपेण व्यवस्थि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तोऽयमग्नि रस्यामृचि स्तूयते। योऽयमग्निर्मूर्धा-दिवः, अहनि आदित्यरूपेण दिवो द्यलोकस्य मूर्धा भवति, यथा शिरः शरीरस्योपरिवर्त्तते तथायमग्निः स्वतेजसा आदित्यरूपेण द्युलोकस्यो-परिवर्त्तते, तथायमग्निः ककुत् ककुदमिति मह-न्नामसु पठितं तस्यान्तलोपः छांदसः, अयमग्नि-रेव महानात्मा जगतां कारणं, अयमेव पृथिव्याः पतिः पार्थिवाग्निरूपेण स्थावरजंगमजीवाना--मुत्पत्तिस्थितिसंहारकारणं, अयमग्निरपां रेतां-सि जिन्वति, द्यलोकात् वृष्टिरूपेण पतन्तीनामपां रेतांसि, जीवजातीनां बीजरूपाणि साराणि, स्थावरजंगमरूपेण परिणतानि जिन्वति प्रीति-कर्मा प्रीणयति नाम तेषां जीवानां वृद्धिह्रासौ करोति, इत्यलम्॥ अग्निर्वै शरणं समस्तजगतां कुर्यात्स नो मङ्गलम्॥१२॥

(अथ त्रयोदशी)

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै। उभा दातारा विषा रयीणामुभा वाजस्य सातये हुवे वाम्॥१३॥

अथ पदच्छेदः—उभा—वाम्—इन्द्राग्नी-आहुवध्यै—उभा—राधसः—सह—मादयध्यै—उभा—दातारौ—इषां—रयीणां—उभा—वाज स्य—सातये—हुवे—वाम्॥ अथ मन्त्रार्थः—भरद्वाजदृष्टा ऐन्द्राग्नी तिष्टुप् द्वयूना—हे इन्द्राग्नी वां युवां उभौ अस्मिन् विश्वयज्ञे आहुवध्यै आह्वा-तुमिच्छमीति शेषः ह्वयतेस्तुमर्थे कध्यै प्रत्ययः, किं च राधसः हविर्लक्षणधनात् सह मादयध्यै, युगपदेककर्मणि उभौ युवां मादयितुं हर्षयितुं चेच्छामीति शेषः, मदी हर्षे, मद तृप्तौ धातोरिति णिजन्तात् तुमर्थे शध्यै प्रत्ययः, यत उभौ युवां इषां अन्नानां रयीणां धनानां दातारौ, अत उभौ वां युवां वाजस्यान्नस्य सातये नाम दानाय हुवे नाम आह्वयामि, उभा इति उभशब्दस्य विभक्ते राकारः छांदसः इत्यलम्॥ इन्द्राग्नी शरणं समस्तजगतां तेजोवपुधारकौ॥१३॥

(अथ चतुर्दशी)

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आरोहाथा नो वर्धया रयिम्॥१४॥

अथ पदच्छेदः—अयं—ते—योनिः—ऋत्वियः—यतः—जातः—अरोचथाः—तं—जानन्—अग्ने—आरोहाथाः—नः—वर्धय—रयिम्॥ अथ मन्त्रार्थः तिस्रः आग्नेय्यः अनुष्टुब् जगती गायत्र्यः देवश्रवोदेववातदृष्टाः, आहव-नीयोऽग्निरुच्यते, हे अग्ने आहवनीय! ते तवायं गार्हपत्योऽग्निः, योनिरुत्पत्तिस्थानं, किं भूतः ऋत्वियः ऋतुः प्राप्तोऽस्येति ऋत्वियः, छन्दसि घस्, ऋतुशब्दात् प्राप्तयर्थे घस् प्रत्ययः घस इयादेशः यतो यस्मात् ऋतुकालोपेतात् गार्ह-पत्यात् त्वमुत्पन्नः सन् अरोचथाः यज्ञकर्मकाले दीप्तो भूः, हे अग्ने! सोत्पादकं तं गार्हपत्याग्निं जानन् सन् आरोह पुनरुद्धरणाय, यज्ञकर्मान्ते प्रविश, अथानन्तरं नोऽस्मदर्थं रयिं धनं वर्धय, पुनर्यागाय समृद्धं कुरु, अत एव त्वां वयं नमस्-कुर्म, इत्यलम्॥ अग्निर्वै शरणं समस्त यज्ञपां कुर्यात्स नो मङ्गलम्॥१४॥

(अथ पञ्चदशी)

अयमिह प्रथमो धायि धातुभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे। १५॥

अथ पदच्छेदः—अयम्—इह—प्रथमः—धायि-धातुभिः—होता—यजिष्ठः—अध्वरेषु—ईड्यः—यम्—अप्नवानः—भृगवः—विरुरुचुः—वनेषु—चित्रम्—विभ्वम्—विशे-विशे॥ अथ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रार्थः—जगती वामदेवदृष्टा ! द्वादशाक्षरा श्चत्वारः पादाः जगत्याः, द्वितीयोऽत्र व्यूहेनैकादशः चतुर्थो व्यूहेन द्वादशस्तेनैकोना जगती। अयमाहवनीयोऽग्निप्रथमो दक्षिणाग्नितो मुख्यः इह यज्ञकर्मानुष्ठाने धातुभिर्नामाग्निधातृभिरध्वर्युभिः धायि नाम निहितः, अत्राडभावो छान्दसः, किं भूतोऽग्निः होता नाम देवानामाह्वाता, पुनः किं भूतः यजिष्ठः अतिशयेन यष्टा, तथाध्वरेषु सोमयागादिषु ईड्यः, ऋत्विग्भिः स्तुत्यः यं अप्नवानः नाम पुत्रवन्तो भृगवः भृगुवंशोत्पन्नाः मुनयः विडिति मनुष्यनाम यजमानरूपाय तस्मै मनुष्याय तदुपकाराय वनेषु अरण्यप्रदेशेषु अग्निं विरुरुचुः नाम दीपयन्ति स्म, किं भूतं तं चित्रं यज्ञेषु पूज्यं, अत एव विभ्वं विभुत्वशक्तियुतं, यणादेशः छान्दसः, ईदृशमहत्वयुक्तमग्निं वयं नमस्कुर्मः, इत्यलम् पूजयामो वयं सर्वे ऋषीणामप्यृषीश्वरम् चित्रं यज्ञे सदा पूज्यं गोपतिं च प्रशास्महे ॥१५॥

(अथ षोड्शी)

अस्य प्रज्ञामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः पयः सहस्रसामृषिम् ॥१६॥

अथ पदच्छेदः—अस्य—प्रज्ञां—अनु—द्युतं-शुक्रं-दुदुह्रे—पयः—सहस्रसाम्—ऋषिम्॥ अथ मन्त्रार्थः—गायत्री अवत्सारदृष्टा गोऽग्निपयोदेवत्या,, अस्याग्नेः प्रज्ञां चिरन्तनकालभवां द्युतमनु दीप्तिमनुसृत्य अह्रयः नाम लज्जारहिताः दोग्धारः ऋषिं गां शुक्रं नाम शुद्धं पयः दुदुह्रे दुहुहिरे तां गां होमार्थं दुग्धवन्तः, किं भूतां गां सहस्रसां,; षोऽन्तकर्मणि सहस्रसंख्याकानि कर्माणि क्षीरदध्याज्यनवनीतहविः प्रदानेन स्यति नाम समापयति इति सहस्रसा तां, स्यतेः किप् ॥ गावः कामधुगाः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥१६॥

(अथ सप्तदशी)

तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥१७॥

अथ पदच्छेद—तनूपा—अग्ने—असि—तन्वं—मे—पाहि—आयुर्दा—अग्ने—असि—आयुः—मे—देहि—वर्चोदा—अग्ने—असि—वर्चः—मे—देहि—अग्ने—यत्—मे—तन्वाः-ऊनं—तत्—मे—आपृण ॥ अथ मन्त्रार्थः—अथ यजूंषि चत्वार्यग्निदेवत्यानि—हे अग्ने त्वं स्वभावत एव तनूपा असि अग्निहोत्रिशरीराणां पालकोऽसि, उदराग्नौ अन्ने जीर्णे सति शरीरपालनं अग्नेः कर्म, हे अग्ने मे मम तन्वं शरीरं पाहि, हे अग्नेः त्वमायुर्दा असि आयुषो दाता भवसि, अतो मे पूर्णायुः देहि, अपमृत्युपरिहारेण यावद् कालं वपुषि उदराग्नेरौष्णचमुपलभ्यते तावन्न म्रियते इति प्रसिद्धं,हे अग्ने त्वंवर्चो दा असि, वर्चसो दाता असि अतो मे वर्चो देहि, वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः यद्दृशनादेव महानयं ब्राह्मणो विद्वान् तपसाग्निरिव ज्वलतीति, किं च हे अग्ने मे मम मदीयशरीरस्य यदंगं चक्षुरादिरूपमूनं दृष्टिपाटवादिरहितं तदंगं मे आपृण सर्वतः पूरय इत्यलम् अग्नियर्ज्ञपतिः समस्तयजने कुर्यात्स नो मङ्गलम् ॥१७॥

अथाष्टादशी

इन्धानास्त्वा शत꣡ꣳ हिमाद्युमन्त꣡ꣳ समिधीमहि । वयस्वन्तो वयस्कृत꣡ꣳ सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः—इन्धानाः—त्वा—शतं—हिमाः—द्युमन्तं—समिधीमहि—वयस्वन्तः—वयस्कृतम्—सहस्वन्तः—सहस्कृतम्—अग्ने—सपत्नदम्भनम्—अदब्धासः—अदाभ्यम्—चित्रावसो—स्वस्ति—ते—पारम्—अशीय—अथ मन्त्रार्थः—अग्नि देवत्या महापङ्क्तिः, यस्याः षट् पादाः अष्टाक्षराः सा महापङ्क्तिः, अत्रः षष्ठः सप्ताक्षरः। हे अग्ने शतं हिमाः शतं वर्षाणि अस्मदायुषि वर्त्तमानान् शतसंवत्सरान् त्वां समिधीमहि नितरां वयं दीपयामः, किं भूताः वयं इन्धानाः त्वदनुग्रहेण दीप्यमानाः तथा वयस्यन्तः वय इति अन्ननाम अन्नवन्तः तथा सहस्वन्तः सह इति बलनाम बलवन्तः तथा अदब्धाः अनुपहिंसिताः केनापि, दम्भोति हिंसाकर्मा किं भूतं त्वां द्युमन्तं दीप्तिमन्त तथा वयस्कृतमन्नकर्तारं तथा सहस्कृतं बलस्यकर्त्तारं पुनः सपत्नदम्भनं सपत्नानां शत्रूणां हिंसितारं तथा अदाभ्यं हिंसितुमशक्यं, चित्रावसो रात्रिदेवत्यं यजुर्ऋषिदृष्टं। चित्राणि ग्रहनक्षत्राणि यस्यां सा चित्रावसुः रात्रिः हे चित्रावसो रात्रे! स्वस्ति क्षेमं यथा तथा ते तव पारं समाप्तिमशीय व्याप्नवानि, यथालोके सुप्तेषु मनुष्येषु ग्रहे चौराः प्रविशन्ति,यथा तथा देव यज्ञे रक्षांसि प्रविशन्ति, यथा तथा देव यज्ञे रक्षांसि प्रविशन्ति, तन्निवारणाय रात्रि प्रार्थनम् इत्यलम् यज्ञो वै शरणं समस्तयजुषां कुर्यात्स नो मंगलम् ॥१८॥

अथैकोनविंशी

सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणा ꣳ स्तुतेन। सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया स ꣳ रायस्पोषेण गमिषीय ॥१९॥

अथ पदच्छेदः—सं—त्वं—अग्ने—सूर्यस्य—वर्चसा—अगथाः—सं—ऋषीणां—स्तुतेन—सं—प्रियेण—धाम्ना—सं—अहं—आयुषा—सं—वर्चसा—सं—प्रजया—सं—रायस्पोषेण—गमिषीय—अथ मन्त्रार्थः—उपप्रयन्तमित्यादिभिश्चित्रावसो इत्यन्तैः मन्त्रैरुत्थानमत्र उपविश्य जपति ॥ हे अग्ने रात्रौ त्वं सूर्यस्य वर्चसा समगथाः संगतोऽसि, तद्यस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह, इति श्रुतेः तथा ऋषीणां मन्त्राणां स्तुतेन स्तोत्रेण समगथाः संगतोऽसि, बहवो मन्त्राः अग्निं स्तुवन्ति, पुनः हे अग्ने प्रियेण धाम्ना प्रियाभिराहुतिभिः त्वं समगथाः संगतोऽसि, आहुतयो वै अस्य प्रियं धाम, इति श्रुतेः, यथा त्वमेतैः त्रिभिः संगतः एवमहमपि त्वत्प्रसादात् आयुषा अपमृत्युदोषरहितेन सग्मिषीय संगतो भूयासं, तथा वर्चसा ब्रह्मतेजसा संग्मिषीय संगतो भूयासम्, तथा प्रजया पुत्रपौत्रादिभिः संग्मिषीय संगतो भूयासम्, तथा रायस्पोषेण धनस्य पुष्ट्या संग्मिषीय संगतो भूयासम्, गमेः समो गम्यृच्छि इति सूत्रेण तथा लुङि सिचि गमश्चेति सिचः कित्वं, अनुदात्तोपदेशेति म लोपे, हलादङ्गादिति सिचो लोपे रूपं ग्मिषीय। गमेराशीर्लिङि उत्तमैकवचनम्, इटोऽत्, इति सीयुटः छान्दसः इट् "गमहन" इत्यादिना उपधालोपे रूपं ग्मिषीय इति इत्यलम् ॥ अग्निर्देवपतिः समस्तजगतां कुर्यात्स नो मंगलम् ॥१९॥

(अथ विंशी)

अन्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोर्जस्थोर्जं वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय ॥२०॥

अथ पदच्छेदः—अन्धः—स्थ—अन्धः—वः—भक्षीय—महः—स्थ—महः—वः—भक्षीय—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऊर्जः—स्थ—ऊर्जे—वः — भक्षीय-रायस्पोष—स्थ — रायस्पोषं — वः — भक्षीय ॥ अथ मन्त्रार्थः-अन्धस्थ-रेवती रमध्वमिति यजुर्द्वयेन गां गच्छति, गौर्देवता, हे गावः यूयमन्धस्थ क्षीरदध्याज्यनवनीतरूपान्नस्योत्पादिकाः भवत, अतो भवत्प्रसादात् वो युष्मत्संबन्धि अन्धः क्षीरादिरूपमन्नमहम् भक्षीय सेवेय, भजसेवायामित्यस्याशीर्लिङि उत्तमैकवचने रूपं,, यूयं महस्थ पूज्यरूपाः भवत, मह पूजायां, अतो वो युष्माकं पूज्यानां प्रसादादहमपि महो भक्षीय महत्वं सेवेय, गौर्न पदा स्पष्टव्या, इत्यादि स्मृते र्गवां लोके पूज्यत्वं प्रसिद्धम् तथा यूयमूर्जस्थ बलरूपाः भवत, युष्माकं प्रसादात् वयमपि बलवन्तो भवेम, तथा यूयं रायस्पोषस्थ धनपुष्टिरूपाः भवत, वो युष्माकं प्रसादात् रायस्पोषं धनपुष्टिं भक्षीय सेवेय, अत एव गोदेवतां वयम् सदा नमस्कुर्मः, इत्यलम् ॥ गावो वै शरणं समस्तंजगतां कुर्वन्तु नो मङ्गल ॥२०॥

(अथैकविंशी)

रेवती रमध्वमस्मिन् योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये । इहैव स्त माप-गात ॥२१॥

अथ पदच्छेदः—रेवतीः — रमध्वम् — अस्मिन्—योनौ—अस्मिन्—गोष्ठे —अस्मिन्—लोके—अस्मिन्—क्षये—इह—एव—स्त—मा—अपगात । अथ मन्त्रार्थः—हे रेवतीः रेवत्यः धनवत्यो गावः ! रयि विद्यते यासां ताः रेवत्यः, रयिशब्दात् मतुप् "रयेर्मतौ बहुलमिति सूत्रेण संप्रसारणम्, संप्रसारणाच्चेति सूत्रेण पररूपं, आदृगुणः,, पशवो वै रेवन्तः, इति श्रुतेः । हे रेवत्यः गावः ! अस्मिन् यजमानस्य हविर्दोहनस्थाने यूयं रमध्वं नाम क्रीडत दोहनादनन्तरं अस्मिन् यजमानस्य संचारप्रदेशे रमध्वम्, हे गावः सर्वदा अस्मिन् लोके यजमानस्य दृष्टिप्रदेशे रमध्वम्, हे गावः ! रात्रौ अस्मिन् क्षये यजमानगृहे रमध्वम्, क्षय शब्दोऽत्र वासवाची क्षि निवासे धातोः रूपं, सर्वदाइहैव यजमान गृहे एव भवत, यूयम् मा अपगात नाम यजमानगृहात् मा गच्छत इणो गा लुङि, इति सूत्रेण गादेशे रूपम्, इत्यलम् ॥ गावः कामदुघाः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥२१॥

(अथ द्वाविंशी)

स्थ हितासि विश्वरूप्यूर्जामाविश गौपत्येन । उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥२२॥

अथ पदच्छेदः—संहिता—असि -विश्वरूपी—ऊर्जा—मा—आविश—गौपत्येन—उप—त्वा—अग्ने—दिवे—दिवे—दोषावस्तः—धिया—वयं—नमः—भरन्तः—एमसि । अथ मन्त्रार्थः—गामुपतिष्ठते, हे गौः त्वं संहितासि, क्षीराज्यदधिनवनीतहविर्भिः यज्ञकर्माणि संदधातीति संहिता तथा विश्वरूपी विश्वं रूपं यस्याः सा त्वं शुक्लकृष्णादिबहुरूपैर्विचित्रवर्णासि, सा त्वमूर्जा क्षीरादिरसेन गौपत्येन गोस्वामित्वेन मा नाम माम् आविश त्वत्प्रसादात् मम बहुविधो रसो बहुविधं गोस्वामित्वं च संपद्यताम्, "गार्हपत्याग्निमुपतिष्ठते, उप त्वा तिस्रो गायत्र्य आग्नेय्यो मधुच्छन्दो दृष्टाः, हे दोषावस्तः नाम रात्रौ वसनशीलगार्हपत्याग्ने दिवे दिवे प्रतिदिनं वयं यजमानाः त्वामुप एमसि त्वां प्रत्यागच्छामः, इदन्तो मसि इति रूपं, किं भूताः वयम् धिया श्रद्धायुक्त्या बुद्ध्या नमो भरन्तः नमस्कारं सम्पादयन्तः, यदा नम इति अन्न नाम अन्नं बिभ्रतः सन्तः त्वां वयं नमस्कुर्म इत्यलम् ॥ गावः कामदुघाः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥२२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(अथ त्रयोविंशी)

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमान ꣳ स्वे दमे ॥२३॥

अथ पदच्छेदः—राजन्तं—अध्वराणां—गोपां—अमृतस्य—दीदिविम् — वर्धमानम् — स्वे—दमे । अथ मन्त्रार्थः—अत्र क्रियापदमनुवर्त्तते, वयमीदृशमग्निमुपैमः, कीदृशं राजन्तं दीप्यमानं तथाध्वराणां गोपां गोप्तारं, पुनः ऋतस्य सत्यवचनस्य सत्यव्रतस्य दीदिविम् दीपयितारम् अग्निसमीपे व्रतं गृहीत्वा सत्यं वदतीत्याशयः, तथा स्वे दमे स्वकीय गृहे वर्धमानं चातुर्मासस्सोमादियज्ञैर्वृद्धिं गच्छन्तं, दमो गृहं, दिवेः कि प्रत्ययः लिड्वद्भावात् द्वित्वं, तुजादीनां दीर्घोऽभ्यासस्येति सूत्रेणाभ्यासदीर्घः अग्निर्वै शरणं समस्तजगतां कुर्यात्स नो मंगलम् ॥२३॥

(अथ चतुर्विंशी)

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥२४॥

अथ पदच्छेदः—सः—नः—पिता—इव—सूनवे—अग्ने—सूपायनः—भव—सचस्व—नः—स्वस्तये,, अथ मन्त्रार्थः—हे अग्ने गार्हपत्य ! स पूर्वोक्त गुणविशिष्टस्त्वम् नोऽस्माकम् सूपायनो भव नाम सुखेन प्राप्तुं शक्यो भव, तत्र दृष्टांतः सूनवे पितेव, यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यो भवति किं च नोऽस्माकं स्वस्तये नाम क्षेमाय सचस्व अस्मिन् यज्ञकर्मणि समवेतो भव,' षच् समवाये,, यद्वास्मदीयं हविः सेवस्व षच् सेवने वा, अत एव वयं त्वां नमस्कुर्मः इत्यलम् ॥ विष्णुर्वै शरणं समस्तजगतां भूयात्सदा पालकः ॥२४॥

(अथ पञ्चविंशी)

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तम ꣳ रयिं दाः ॥२५॥

अथ पदच्छेदः—अग्ने—त्वं—नः—अन्तमः—उत—त्राता—शिवः—भव—वरूथ्यः—वसुः—अग्निः—वसुश्रवाः—अच्छ—नक्षि—द्युमत्तमम्—रयिं—दाः॥ अथ मन्त्रार्थः—चतस्रो द्विपदा विराज आग्नेय्यः, दशार्णपादा, बन्ध्वादिदृष्टा, हे गार्हपत्याग्ने ! भगवन् ! त्वं नोऽस्माकं अन्तमः अन्तिकतमः सर्वदा समीवर्त्ती भव, उतापि त्राता नाम पालयिता भव, तथा शिवः शान्तो भव, पुनः वरूथ्यः वरूथाय हितो वरूथ्यः नाम जनसमूहः, यद्वा गृहं वरूथं, जनसमूहाय गृहाय च हितो भव, किं भूतस्त्वम् वसुः नाम जनानां वासयिता, तथाग्निः, अगि गतौ, आहवनीयादिरूपेण सर्वत्र व्याप्तिशीलः, अंगति गच्छति सर्वत्र व्याप्नोतीत्यग्निः, तथा वसुश्रवाः, वसु नाम धनप्रदानेन कीर्त्तिर्यस्य, किं च हे अग्ने त्वामच्छा नक्षि अभिव्याप्नुहि, अच्छाभेराप्तुमिति शाकपूणिः, यद्वा हे अच्छ नाम निर्मलभावाग्ने ! नक्षि अस्मद्धोमस्थानमागच्छ, किं च द्युमत्तमं रयिं नाम द्युतिमद्धनं दाः नाम देहि, अत एव त्वां वयं सर्वदा नमस्कुर्म- इत्यलम् ॥ अग्निर्वै शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥२५॥

(अथ षड्विंशी)

तं त्वा शोचिष्ट दीदिवः सुम्नाय नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥२६॥

अथ पदच्छेदः—तम्—त्वा—शोचिष्ठ—दीदिवः—सुम्नाय—नूनम्—ईमहे—सखिभ्यः—सः—नः—बोधि—श्रुधी—हवम्—उरुष्य—नः—अघायतः—समस्मात् ॥ अथ मन्त्रार्थः—हे शोचिष्ठ ! दीप्तिमत्तम ! हे दीदिवः सर्वस्य दीपयितः ! सर्वप्रकाशक ! ते पूर्वोक्तगुणयुक्तं त्वां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सखिभ्योऽर्थाय सुम्नाय,, द्वितीयार्थे चतुर्थी सुम्नं सुखं नूनं निश्चयेन, ईमहे याचामहे, यद्वा सुम्नाय नाम सुखार्थं, सखिभ्योऽस्मदूसखीनामुपकाराय च त्वामीमहे, स त्वं नोऽस्मान् नाम भवत्से वकान् बोधि बुध्यस्व तथा हवमस्मदीयमाह्वानं श्रुधी शृणु, तथा समस्मात् सर्वस्मात् अघायतः परस्याघमिच्छतः शत्रोः सकाशात् नोऽस्मान् उरुष्य नाम रक्ष, अस्मान् सर्वतः पालय, शोचिरिति ज्वाला नाम शोचिरस्यास्तीति शोचिष्मान्, मतुप् अतिशयेन शोचिष्मान् शोचिष्ठः, "अतिशयेन तमबिष्ठनौ,, "विन्मतोर्लुक्,, इति मतुपो लुक् इष्टनिः,, दीदिवः दिवेर्वलनार्थस्य लिडादेशकसन्तस्य रूपम्। इत्यलम् ॥ अग्निर्वै शरणं समस्त जगतां कुर्यात्स नो मङ्गलम्। शोचिष्केशो हि मे शरणं करोतु मङ्गलम् सदा ॥२६॥

(अथ सप्तवशी)

इड् एह्यदित एहि काम्या एत। मयि वः कामधरणं भूयात् । २७॥

अथ पदच्छेदः-इडे-एहि-अदित-एहि-काम्याः-एत-मयि-वः—कामधारणं—भूयात् ॥ अथ मन्त्रार्थः—गां गच्छति—द्वे यजुषी गव्ये-हे गौः अस्मत् यज्ञस्थानमेहि आगच्छ, इडा मनोर्दुहिता अदितिर्देवमाता, इडा मनुमिवास्मानेहि, आदितिरादित्यानिव अस्मानेहि, अतस्मिंस्तच्छब्दस्तद्वदतिदेशार्थः, गां प्रति कर्मफलं याचते हे काम्याः । सर्वैः कामयितव्या, ! यूयमेत, अस्मद् यज्ञमागच्छत, नो युष्माकं कामधारणं कामानां धरणमपेक्षितफलधारकत्वं यदस्ति तन्मयि यज्ञानुष्ठातरि भूयात्, युष्मत्प्रसादादहमभीष्टफलस्य धारयिता भूयासम् यूयमपि अस्माकं प्रियाः भवत, अहं वः युष्माकं प्रियो भूयासम्—अत एव वयं नमस्कुर्मः इत्यलम् ॥ गावः कामदुघाः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥२७॥

(अथाष्टाविंशी)

सोमान ँ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः ॥२८॥

अथ पदच्छेदः — सोमानं —स्वरणं — कृणुहि—ब्रह्मणस्पते- कक्षीवंतं-यः-औशिजः- अथ मन्त्रार्थः -व्रतेत्यपरेणाहवनीयं प्राङ् तिष्ठन्नवर्च जपति, सोमानं स्वरणं तृचो गायत्रो ब्रह्मणस्पतिदेवत्यः तेनैवदृष्टः,, हे ब्रह्मणस्पते वेदस्य पालक ! कर्मफल दातः ! सोमानं सोमयागकर्त्तारं. स्वरणं नाम स्तोत्रैः स्तुतिकर्त्तारं च धनप्रदानैः मां कृणुहि नाम कुरुत, तत्रोपमानमुच्यते, कक्षीवंतं कक्षीवन्नामकमृषिं दीर्घतमसः पुत्रं यथा सोमयागयुक्तं स्तुतियुक्तं च कृतवानसि, तथा मां कुरु, कोऽसौ कक्षीवान् य औशिजः उशिजः पुत्रः। उशिक्, कक्षीवतो माता,, इव शब्दोऽत्र लुप्तो द्रष्टव्यः, सोमानं सुनोतेः "अन्येभ्योऽपि दृश्यते, इति सूत्रेण मनिन्,, अत एव वयं त्वां नमस्कुर्मः ॥ विष्णुर्वै शरणं समस्त जगतां कुर्यात्स नो मंगलम् ॥ २८॥

(अथैकोनत्रिंशी)

यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स न: सिषक्तु यस्तुरः ॥२९॥

अथ पदच्छेदः —यः — रेवान् —यः— अमीवहा—वसुवित्—पुष्टिवर्धनः—सः—नः—सिषक्तु—यः—तुरः ॥ अथ मन्त्रार्थः—यो ब्रह्मणस्पतिः अग्निर्देवता रेवान् धनवान् यश्च अमीवहा अमीवस्य रोगस्य हंता यो वसुवित् वसुनो धनस्य सारासारतां जानाति ज्ञात्वा च स्तोतृभ्यो यथा योग्यं ददाति यः पुष्टिवर्धनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धनस्य स्तोतृणां च पुष्टिकर्त्ता सः नोऽस्मान् दयादृष्टया सिषक्तु नाम सेवतां वर्धयन्त्वित्यर्थः. यस्तुरः नाम शीघ्रकारी सः सर्वदा अस्मान् वर्धयतु, अत एव ब्रह्मणस्पतिं वयं नमामः, सः ब्रह्मणस्पतिः पूर्वोक्तगुणविशिष्टं पुत्रं च ददातु, इत्यलम् ॥ अग्निर्वै शरणं समस्त जगतां कुर्यात्स नो मङ्गलम् ॥२९॥

(अथ त्रिंशी)

मा नः श ५ सो अररुषो धूर्त्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥३०॥

अथ पदच्छेदः—मा—नः शंसः—अररुषः—धूर्त्तिः—प्रणक्—मर्त्यस्य—रक्ष—नः—ब्रह्मणस्पते ॥ अथ मन्त्रार्थः—रादाने धातोः क्सुञन्तस्य रूपं ररौ, इति ररिवान् तस्य ररुषः, षष्ठ्येकवचने नञा सह समासे अररुषो हविर्दानमकृतवतः तादृशस्य मनुष्यस्य शंसो नाम अनिष्टचिन्तनं, धूर्त्तिः हिंसा च नोऽस्मान् मा प्रणक् प्रकर्षेण मा नाशयतु, शत्रुकृतमनिष्टचिंतन शत्रुकृता हिंसा चास्मान् मा व्याप्नोतु, किं च हे ब्रह्मणस्पते ! वेदस्य पालकाग्ने ! भगवन् ! नो, ऽस्मान् सर्वतः रक्ष, पालय,, अत एव त्वां वयं सर्वदा नमस्कुमः द्व्यचोऽतस्तिङः इति पा० सूत्रेण संहियां दीर्घः, नश्चधातुस्थोरुषुभ्यः णत्वम्—इत्यलम् ॥ अग्निर्वै शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥३०॥

(अथैकत्रिंशी)

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥३१॥

अथ पदच्छेदः-महि-त्रीणां-अवः-अस्तु-द्युक्षं—मित्रस्य-अर्यम्णः—दुराधर्षं-वरुणस्य ॥ अथ मन्त्रार्थः—सत्यधृतिदृष्टः आदित्यदेवत्यस्तृचो गायत्रो जपे विनियुक्तः, पथि स्वस्त्ययनं च, त्रिशब्दस्यापि छन्दसि त्रयोदेशो वेति वाच्यम,, इति पा० सूत्रेण,, मित्रस्यार्यम्णो वरुणस्येति त्रीणां त्रयाणां देवानां सम्बन्धि अवः पालनमस्तु, किं भूतमवः महि महत् तथा द्युक्षं द्युमन्ति सुवर्णादि द्रव्याणि, क्षियन्ति निवसन्ति यस्मिन् पालने तथाविधम्, पुनः दुराधर्षं अन्यैराधर्षयितुमशक्यं, ईदृशगुणविशिष्टान् मित्रवरुणार्यमदेवान् वयं नमस्कुर्मः ॥ श्रीविष्णुः शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥३१॥

(अथ द्वात्रिंशी)

नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशं ५ सः ॥३२॥

अथ पदच्छेदः—न—हि—तेषां—अमा—चन—अध्वसु—वारणेषु—ईशे—रिपुः—अघशंसः ॥ अथ मन्त्रार्थः—अमाशब्दो गृहनामसु पठितः चन शब्दोऽप्यर्थे,, ईशे इति "लोपस्त आत्मनेपदेषु,, इति सूत्रेण तलोपः, तेषामिति "अधीगर्थदयेशां कर्मणि,, इति कर्मणि षष्ठी, अमा चन गृहेपि वर्त्तमानानां तेषां तथा वारणेषु दस्युव्याघ्रादयो यत्र स्थिताः पथिकान् निवारयन्ति ते वारणाः तेषु दस्युव्याघ्रभयाढ्येषु अध्वसु मार्गेषु वर्त्तमानानां तेषां मित्रार्यमवरुणै स्त्रिभिर्देवैः रक्षितानां यजमानानामुपद्रवाय, अघशंसः नाम सर्वदा पापस्य प्रशंसको रिपुः शत्रुः नहि ईशे नाम ईष्टे, समर्थो न भवति, मित्रादिभिः रक्षितानामस्माकं गृहेऽरण्ये वा नास्ति शत्रुबाधः, अत एव तान् मित्रार्यमवरुणदेवान् वयं नमस्कुर्मः, इत्यलम् ॥ कल्याणं वितनोतु नो भयहरः मित्रादिरूपो हरिः ॥३२॥

(अथ त्रयस्त्रिंशी)

ते हि पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योतिर्यच्छन्त्यजस्रम् ॥३३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पदच्छेदः=ते— हि —पुत्रासः— अदितेः—प्रजीवसे—मर्त्याय—ज्योतिः —यच्छन्ति—अजस्रम् ॥ अथ मन्त्रार्थः—कथं तद्रक्षितानां शत्रुभयं न भवति हि यस्माददितेः अदीनायाः देवमातुः ते पुत्रासः पुत्राः पूर्वोक्ताः मित्रार्यमवरुणदेवाः मर्त्याय मनुष्याय यजमानाय अजस्रमनुक्षीणं ज्योतिः तेजः प्रयच्छन्ति किमर्थं जीवसे चिरं जीवितुं, यथा ते यजमानाः परमायुषो भवन्तु, अत एव तान् मित्रार्यमवरुणदेवान् वयम् नमस्कुर्मः इत्यलम् ॥ कल्याणं वितनोतु नो भयहरः मित्रादिरूपो हरिः ॥३३॥

(अथ चतुस्त्रिंशी)

कदाचनः स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥३४॥

अथ पदच्छेदः—कदाच—नः—स्तरीः—असि—नः—इन्द्र—सश्चसि—दाशुषे —उप—उप—इत्—नु—मघवन्—भूयः—इत् —नु—ते—दानं—देवस्य—पृच्यते ॥ अथ मन्त्रार्थः—ऐन्द्री पथ्या बृहती मधुच्छन्दो दृष्टा जपे विनियुक्ताः यस्यास्तृतीयः पादो द्वादशार्णोऽन्ये त्रयोऽष्टाक्षरा सापथ्या बृहती । हे इन्द्र ! परमैश्वर्ययुक्त ! कदाचन कदापि त्वं नोऽस्माकं स्तरीर्नासि हिंसको नासि, स्तृञ् हिंसायां धातो रूपं, किं तर्हि दाशुषे द्वितीयार्थे चतुर्थी दाशुषेनाम दाश्वांसं हविर्दत्तवन्तं यजमानं सेवसे, सश्चतिः सेवनार्थः, किं च हे मघवन् ! धनवन् ! देवस्य ते तव भूय इत् बहुतरं ते दानं नु इत् क्षिप्रमेव दाश्वांसं समुपपृच्यते, पृची सपर्के, यजमानेन सह सम्पर्कं प्राप्नोति, "प्रसमुपोदः पादपूरणे,, इति सूत्रेण इत्येक उप शब्दः, इदेवार्थे नु क्षिप्तार्थः न कदाचित् यजमानं प्रति क्रुध्यसि सेवसे च,, त्वदीयं भूयो धनं दाश्वांसमुपपृच्यते इति भावः, अत एव वयं त्वां सर्वदा नमस्कुमः महेन्द्रो वै शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥३४॥

(अथ पञ्चत्रिंशी)

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३५॥

अथ पदच्छेदः—तत्—सवितुः—वरेण्यं—भर्गः—देवस्य—धीमहि—धियः—यः—नः—प्रचोदयात् ॥ अथ मन्त्रार्थः— विश्वामित्रदृष्टा सावित्री गायत्री जपे विनियुक्ता,, मण्डले, पुरुषो, रश्मयश्चेति त्रयं भर्गः शब्दवाच्यम्, भर्गो वीर्यं वा तत् षष्ट्यर्थे, तस्य देवस्य द्योतमानस्य सवितुः प्रेरकस्य जगतां हिरण्यगर्भोपाध्यवच्छिन्नस्यादित्यस्य मण्डलांतरगतं यत् भर्गो विष्णुरूपं तेजो वरेण्यं नाम सर्वप्राणिभिः स्वकल्याणार्थं सदा प्रार्थनीयम् विश्वस्योत्पत्तिस्थितिसंहारकारणम् सत्यज्ञानानन्दलक्षणं तत् तेजो वयं धीमहि ध्यायामः, यः सवितृमण्डलान्तरवर्त्ती, आनखाग्रात् हिरण्यकेशो हिरण्यश्मश्रुः तेजोमयः सर्वतोभारूपः पुरुषो विष्णुः विश्वद्रष्टा दृश्यते, स नोऽस्माकं धियो यो बुद्धयः कर्माणि वा सत्कर्मानुष्ठानवेदोक्तयज्ञसंस्कारधर्मादिषु प्रचोदयात् प्रेरयेत्, तं पुरुषं वयं ध्यायेम, अत एव वयं तं नमस्कुर्मः ॥ वेद्यं वेदमन्त्राणां ज्योतिषं ज्योतिषामपि । प्रेरकं धर्मयज्ञानां परं ब्रह्म यजामहे ॥३४॥

(अथ षट्त्रिंशी)

परि ते दूडभो रथोऽस्मां २ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥३६॥

अथ पदच्छेदः—परि —ते —दूडभो—रथो—अस्मान्—अश्नोतु— विश्वतः =येन —

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रक्षसि—दाशुषः ॥ अथ मन्त्रार्थः — आग्नेयी गायत्री वामदेवदृष्टा जपे विनियुक्ता—हे अग्ने ते तव दाहरूपो रथोऽस्मान् यजमानान् विश्वतः सर्वतः सर्वासु दिक्षु पर्यश्नोतु परितो व्याप्नोतु, अस्मद्रक्षणाय सर्वतस्तिष्टतु, किं भूतो रथो दूडभ दम्भोतिर्वधकर्मा दुःखेन दभ्यते दुर्दभः "उकारं दुर्दे० इति प्रतिशाख्य सूत्रेण हुरो रेफस्य उकारः, च डः, दूडभः अवध्यः येन रथेन त्वं दाशुषो यजमानान् रक्षसि पालयसि यजमानाः वै दाश्वांस इति श्रुतेः, अत एव तेजोमयं ते रथं वयं नमस्कुर्मः ॥ बृहदुपस्थान मन्त्राः समाप्ताः इत्यलम् ॥ तिग्मशूलेन नो पाहि पाहि ज्वालारथेन च । पाहि चास्मांतु दुष्टेभ्यः नमस्कुर्मः सदा वयम् ॥३६॥

(अथ सप्तात्रिंशी)

भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्या ꣳ सुवीरो वीरैः सुपोषः पोषैः । नर्य प्रजां मे पाहि श ꣳ स्य पशून्मे पाह्यर्थर्य पितुं मे पाहि ॥३७॥

अथ पदच्छेदः — भूः — भुवः—स्वः—सुप्रजाः—प्रजाभिः—स्यां —सुवीरः —वीरैः—सुपोषः—पोषैः—नर्य—प्रजां —मे —पाहि — शंस्य—पशून्—मे—पाहि — अथर्य —पितुं — मे—पाहि । अथ मन्त्रार्थः—अथ क्षुल्लकोपस्थानमासुरिदृष्टं पूर्वोक्तेनोपप्रयन्त इत्यादिना वक्ष्यमाणेन भूर्भुवः स्वरित्यादिना वोभावाग्नी उपतिष्टेत उभयोरुपस्थानं कुर्यात् । हे अग्ने त्वं भूर्भुवः स्वः व्याहृति त्रयात्मकोऽसि, तदर्थभूतलोकत्रयात्मकोऽसि, अतस्त्वत्प्रसादादहं प्रजाभिः सह सुप्रजा, स्याम् शोभनप्रजावान् भवेयम्, तथा वीरैः पुत्रैः सुवीरः स्याम शास्त्रसंस्कारवर्त्ति शोभनपुत्रयुक्तो भवेयम् तथा पोषैः गोभूहिरण्यधान्यादिभिः सुपोषः स्याम् बहुहिरण्यादियुक्तो भवेयम् । प्रवत्स्यदुपस्थानमागतोपस्थान चादित्यदृष्टं प्रवसन् यजमानो गार्हपत्यमुपतिष्टते,, हे नर्य ! नरेभ्यो हितो नर्यः, हे गार्हपत्य मे प्रजां पाहि,, आहवनीयमुपतिष्टते, हे शंस्यस्तुत्याग्ने मे प्रजां पाहि दक्षिणाग्निमुपतिष्टते, हे दक्षिणाग्ने ! मे पितुं नामान्नं पाहि, अतनवान् अथर्यः, अत सातत्यगमने, अथर्यो निपातोऽयं, सो दक्षिणाग्निः गार्हपत्यात् सततं स्वस्थानं गच्छति, अत एव हे आहवनीयगार्हपत्यदक्षिणाग्निरूपाग्ने ! त्वां वयं सदा नमस्कुर्मः । विष्णुर्वै शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥३७॥

(अथाष्टात्रिंशी)

आगन्म विश्ववेद समस्मभ्यँ वसुवित्तमम्। अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्व ॥३८॥

अथ पदच्छेदः — आगन्म — विश्ववेद सम — अस्मभ्यम् — वसुवित्तमम् —अग्ने—सम्राट्—अभि—द्युम्नम्—अभि—सह —आयच्छस्व । अथ मन्त्रार्थः—समिधं हस्ते आदाय पूर्वमेवाग्न्यागारं प्राप्य आहवनीयमुपतिष्टते, अनुष्टुबाहवनीयदेवत्या,, हे अग्ने सम्राट् सम्यक् राजते दीप्यते सम्राट्,, तथा विधाग्ने ! आहवनीय ! वयं त्वां आगन्म, त्वामुद्दिश्य प्रत्यागताः, किं भूतं त्वां विश्ववेदसं विश्वानि सर्वाणि वेदांसि नाम ज्ञानानि यस्मात् सः विश्ववेदाः तं, पुनः किं भूतं अस्मभ्यं वसुवित्तमं अस्मदर्थं अतिशयेन वसुवेदितारं धन लब्धारं, किं च अग्ने द्युम्नं यशोऽन्नं वा सह बलं चास्मभ्यं अभितः आयच्छस्व, "दाण् दाने,, "पाघ्रा,, इत्यादिना यच्छादेशः यशोऽन्नं बलं चास्मभ्यं देहि, हे आहवनीयरूपाग्ने ! वयं सर्वदा नमस्कुर्मः,, अग्निर्वै शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥३८॥

(अथैकोनचत्वारिंशी)

अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वित्तमः। अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व ॥३९॥

अथ पदच्छेदः—अयम्—अग्निः—गृहपतिः—गार्हपत्यः—प्रजायाः—वसुवित्तमः—अग्ने—गृहपते—अभि—द्युम्नं—अभि—सह—आयच्छस्व। अथ मन्त्रार्थः—गार्हपत्यमुपतिष्ठते न्युंकुसारिणी बृहती, यस्या द्वितीयः पादो द्वादशाक्षरोऽन्ये त्रयोऽष्टाक्षराः सा न्युंकुसारिणी, अत्र तृतीयो नवार्णस्तेनेकाधिका,, अयं पुरोऽवस्थितो गार्हपत्यनामकोऽग्निर्गृहस्य पतिः पालकः, प्रजायाः पुत्रपौत्रादिरूपायाः अनुग्रहार्थं वसुवित्तमः, अतिशयेन धनस्य वेदिता तमेतं याचे। हे ईदृशगुणयुक्त गार्हपत्याग्ने ! स त्वं यशोऽन्नं सह बलं चास्मभ्यं अभ्यायच्छस्व, देहि, अत एव हे गार्हपत्यरूपाग्ने ! त्वां वयं नमस्कुर्मः। अग्निर्वै शरणं समस्तयजुषां पुष्णातु नः सर्वदा ॥३९॥

(अथ चत्वारिंशी)

अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः। अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छस्व ॥४०॥

अथ पदच्छेदः—अयम्=अग्निः—पुरीष्यः—रयिमान्—पुष्टिवर्धनः—अग्ने—पुरीष्य—अभि—द्युम्नं—अभि—सह—आयच्छस्व॥अथ मन्त्रार्थः—दक्षिणाग्निमुपतिष्ठते अनुष्टुप्—योऽयमग्निः पुरीष्यः,, पशवो वै पुरीषमिति श्रुतिः" पुरीष्यो नाम पशुभ्यो हितः हितरूपः रयिमान् धनवान्, पुष्टिवर्धनः पुत्रपौत्रगोभूहिरण्यप्रभृतिवर्धयिता तमेतं प्रत्यक्षीकृत्य याचे, हे अग्ने पुरीष्य ! द्युम्नं-यशोऽन्नं सह बलं च अस्मदर्थं अभ्यायच्छस्व निधेहि, आहवनीयो वै भोक्ता प्राणिनां हृदयं ज्योतिः, गार्हपत्यो वै गृहपालको, लौकिकाग्निः, पशुभ्यो हितो, दक्षिणाग्निः, सर्वप्राणिनां मृत्युरूपोऽग्निः,, अत एव तानग्नीन् आहवनीयगार्हपत्यदक्षिणाग्नीन् वयं नमस्कुर्मः—इत्यलम् ॥ अग्निर्वैश्वरणं समस्तजगतां पुष्णातु नः सर्वदा ॥४०॥

(अथैकचत्वारिंशी)

गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि। ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥४१॥

अथ पदच्छेदः—गृहाः—मा—बिभीत—मा—वेपध्वम्—ऊर्जं—बिभ्रत—एमसि—ऊर्जं-बिभ्रत्—वः—सुमनाः—सुमेधा—गृहान्—एमि—मनसा—मोदमानः ॥ अथ मन्त्रार्थः—ग्रामान्तरादागतो गृहामेत्यादि मन्त्रत्रयेण गृहं प्राप्नुयात् तिस्रोऽपि वास्तुदेवत्याः शंयुदृष्टाः त्रिष्टुब् विराड् रूपाः, यस्या एकादशार्णास्त्रयः पादा एकोऽष्टार्णः सा विराड् रूपा,, अत्र प्रथमो दशार्णस्तेनैकोना। यजमानो गृहानुपैति, हे गृहाः यूयं मा बिभीत, अस्माकं पालको यजमानो गृहात् कुत्र गतः इति हेतोः भयं मा कुरुत मा च वेपध्वम् कोऽपि शत्रुरागत्यास्मान् विनाशयिष्यति इति बुद्ध्या कम्पं मा कुरुत, यतो वै ऊर्जं बिभ्रतो धारयमाणान् अक्षीणान्नान् एव युष्मान् एमसि आ इमः आगताः स्म, यथा यूयं ऊर्जं बिभ्रतः तथाहमपि ऊर्जं बिभ्रत् सन्, सुमना- शोभनमनस्कः, सुमेधाः गृहकार्येषु कुशलप्रज्ञोपेतः दुःखरहितेन मनसा मोदमानः, वो युष्मान् गृहान् एमि आगच्छामि एमः एमि इत्यात्मनि विकल्पेन बहुवचनं "अस्मदो द्वयोश्चेति सूत्रोक्तेः, अत एव वास्तुदेवतां वयं नमस्कुर्मः श्री विष्णुः शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥४१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(अथ द्विचत्वारिंशी)

येषामध्येति प्रवसन्येषु सौमनसो बहुः।
गृहानुप ह्वयामहे ते नो जानन्तु जानतः ॥४२॥

अथ पदच्छेदः—येषां—अध्येति —प्रवसन्—येषु—सौमनसः—बहुः—गृहान्—उप—ह्वयामहे—ते—नः—जानन्तु — जानतः॥ अथ मन्त्रार्थः—अनुष्टुप्, प्रवसन् देशान्तरं गच्छन् सन् यजमानो येषां अध्येति, इक् स्मरणे, इत्येतस्यैतद्रूपं, यान् भगवत् सुरक्षितान् गृहान् स्मरति, "अधिगर्थदयेशां कर्मणि" इति सूत्रोक्तेः षष्ठी, गृहविषयं क्षेमं सदा चिन्तयति, तथा येषु गृहेषु यजमानस्य बहुः सौमनसः सुमनसो भावः प्रीतिः अतिशयेन वर्त्तते, वयं तान् गृहान्, उपह्वयामहे, गृहाभिमानी देवोऽस्मत्समीपमागच्छतु ते गृहदेवाः आहूताः सन्तः जानतः उपकाराभिज्ञान् नोऽस्मान् जानन्तु, एते भगवदुपासकाः कृतघ्नाः न संति, अवगच्छन्तु, अत एव वयं गृहाभिमानी देवान् नमस्कुर्मः। गृहं गृहपतिमग्निं दिव्यं कुशलकारिणं विष्णुं वयं नमस्कुर्मः सुखसम्पत्तिवर्द्धनम् ॥४२॥

(अथ त्रिचत्वारिंशी)

उपहूता इह गाव उपहूता अजावयः।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।
क्षेमाय वः शान्त्यै प्रपद्ये शिव ँ शग्म ँ शंयोः शं योः ॥४३॥

अथ पदच्छेदः—उपहूताः—इह-गावः—उपहूताः—अजावयः—अथो—अन्नस्य - कीलालः—उपहूतः—गृहेषु—नः— क्षेमाय — वः—शान्त्यै—शिवं—शग्मं—शंयोः — शंयोः। अथ मन्त्रार्थः—त्र्यवसाना महापंक्तिः, यस्या अष्टार्णाः षट्पादाः, सा महापंक्तिः, पंचमो नवमार्णस्तेनैकाधिका, आदित्यार्षं,, हे भगवन्नग्ने इह नोऽस्माकं गृहेषु अस्माभिरनुज्ञाता उपहूताश्च गावः धेनवो बलीवर्दाः अश्वमहिष्यश्च, सुखेन तिष्ठन्तु तथा इह गृहेषु उपहूताः अनुज्ञाताः अजावयः सुखेन वर्त्तन्ताम्, अयं त्रिधो रसो भवति अन्नं घृतं पयश्चेति अथो अपि च अन्नस्य कीलालः अन्नसम्बन्धिरसविशेषो नोऽस्मदीयेषु गृहेषु उपहूतो अस्माभिरनुज्ञातः समृद्धो भवतु, हे गृहदेवाः। वो युष्मान् प्रपद्ये शरणं व्रजामि, किमर्थं क्षेमाय विद्यमानधनरक्षार्थं, यथा शान्त्यै सर्वानिष्टशमनाय, तथा शंयोः शमिति सुख नामेति निघण्टुः,, तत्कामयते इति शंयुः,, इदंयुरितिकामयमानः इति निरुक्तं,, शिवं शग्मं द्वे सुख नामनीति अत्राद्यमैहिकं सुखं, द्वितीयमामुष्मिकं सुखं, एवमुभयविधं सुखं नो भूयात्, शंयोरिति अभ्यासोऽत्यादरार्थः, इत्युपस्थानमंत्राः समाप्ताः

हे गृह देवाः वयं नमस्कुर्मः। वास्तुदेव नमस्कुर्मः कुरु त्वं मङ्गलम् हि नः। भद्रं च कुरु तत्सर्वं येन यज्ञमुपास्महे ॥४३॥

(अथ चतुश्चत्वारिंशी)

प्रघासिनो हवामहे मरुतश्च रिशादसः।
करम्भेण सजोषसः ॥४४॥

अथ पदच्छेदः—प्रघासिनः—हवामहे—मरुतः—च—रिशादसः —करम्भेण —सजोषसः॥ अथ मन्त्रार्थः—अथ चातुर्मास्याख्याः मन्त्राः प्रजापतिदृष्टाः, चातुर्मास्याख्यो यागः स पर्व चतुष्टयात्मको भवति, तत्र वैश्वदेव वरुण प्रघाससाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि संति,, मारुती गायत्री, वयं सपरिचारकान् मरुद्देवान् हवामहे, अत्र विश्वयागे आह्वयामः, किं भूतान् प्रघासिनः, घस्लृ अदने, प्रकर्षेण घस्यते भक्ष्यते इति प्रघासो हविर्विशेषः, स एषामस्तीति तान् प्रघासिनः, एतन्नामकान्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुक्रज्योतिरित्यादयः सप्तसप्तकाः मारुताः गणाः, तत्र सतवां श्च प्रघासी चेति पठ्यते अध्याय १७-८५ प्रघास्युपलक्षितान् मरुद्देवान् आह्वयामः, तथा रिशादसः रिशतिर्हिंसार्थः, दसु उपक्षये, धातोः किप्, रिशन्ति हिंसन्तीति रिशः इगुपध इति कः, रिशान् हिंसकान् दस्यन्तीति रिशादसः दीर्घः छान्दसः, तथा करम्भेण सजोषसः यवमयो हविर्विशेषः करम्भः, तेन सजोषसः समानप्रीतयस्ते ईदृक्गुणयुक्तान् मरुतः देवान् वयं नमस्कुर्मः। मरुतः वै सौम्याः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥४४॥

(अथ पञ्चचत्वारिंशी)

यदग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ।४५।

अथ पदच्छेदः — यद् —ग्रामे—यत्—अरण्ये—यत्—सभायां—यद्—इन्द्रिये—यत्—एनः—चकृम—वयं—इदं—तत्—अवयजामहे—स्वाहा ॥ अथ मन्त्रार्थः—मारुत्यनुष्टुप्, करम्भपात्राणि मूर्धनि कृत्वा दक्षिणाग्नौ शूर्पेण जुहोति, यवपिष्टेन निर्मितानि सन्तानपरिमितानि एकाधिकानि वर्तुलादिरूपाणि करम्भपात्राणि, शूर्पेण पत्नी दक्षिणाग्नौ जुहुयात्, दम्पती द्वौ वा जुहुयाताम्,, मन्त्रार्थः—ग्रामे वसन्तो वयं यत् एनः पापं मृगोपद्रवरूपं चकृम कृतवन्तः, तथा सभायां स्थिताः यदेनः पापं महाजनतिरस्कारादिकं चकृम कृतवन्तः, तथेन्द्रिये जिह्वोपस्थरूपे प्रीतिमन्तो वयं यदेनः पापं मद्यमांसभक्षणपरस्त्रीपर द्रव्यादिहरणरूपं पापं चकृम कृतवन्तः, तथान्यत्रापि भृत्यस्वाम्यादौ यदेनः पापं ताडनावज्ञादिकं चकृम कृतवन्तः, वयं तदिदं सर्वं कायिकवाचिक मानसिकपापमवयजामहे विनाशयामः, अव पूर्वः यजिः नाशनार्थः, स्वाहा, हे भगवन् मरुद्देवाग्ने ! एतद्धविः पापविनाशिन्यां देवतायां त्वयि शोभनं हुतमस्तु, अत एव त्वां वयं नमस्कुर्मः सर्वपापनिवृत्त्यर्थम्। अग्निर्वै शरणं समस्तजगतां कुर्यात्सदा मङ्गलम् ॥४५॥

(अथ षट्चत्वारिंशी)

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः । महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥४६॥

अथ पदच्छेदः—मो सू—नः—इन्द्र—अत्र—पृत्सु—देवैः—अस्ति—हि—स्म—ते—शुष्मिन्—अवयाः—महश्चित्—यस्य—मीढुषः—यव्या—हविष्मतः—मरुतः—वन्दते—गीः ॥ अथ मन्त्रार्थः, ऐन्द्रमरुद्देवत्याविराड् यस्या दशाक्षरा श्चत्वारः पादाः सा विराड्, चतुर्थ एकाधिकोऽत्र, मीषू ण, इति यजमानो जपति, हे इन्द्र ! अत्र पृत्सु एषु संग्रामेषु वर्त्तमानः सन् त्वया सह सख्यं प्राप्तैः मरुन्नामकैः देवैः सहितस्त्वं नोऽस्मान् मो नाम मा विनाश शय इत्यर्थः, मो शब्दो निषेधार्थः, सुशब्दः क्रियासौष्ठवमाह, क उपकार इति चेत्, हे शुष्मिन् ! बलवन्निन्द्र ! यस्य ते तव अवयाः अवयुतो यागः पृथग्भागोऽस्ति, तथा मीढुषो वृष्टिप्रदत्वेन सेक्तुः हविष्मतो हविर्योग्यस्य यस्य तव यव्या यवमयैः करम्भपात्रैः निष्पन्ना होमक्रिया महिश्चिन्नाम यज्ञोऽस्मिन् खलु पूजा वर्त्तते, किं चास्मदीया गीः ऋग्यजुःसामलक्षणा वाक् भवतः सखीन् मरुतोनाम मरुद्देवान् वंदते नमस्करोति, नमो मरुद्भयः तुष्टस्य तव कृपैवयुक्ता, मो सु नः अत्र "सुञः,, इति षत्वं "अन्येषामपि दृश्यते,, इति दीर्घः,, नश्च धातुस्थोरुषुभ्यः,, इति णत्वम्, स्म इति "पूर्वपदात्,, इति षत्वम्, संहितायां दीर्घश्च, अवयाः "श्वेतवाः पुरोडाशाश्च,, इति विजन्तो निपातः,, "दाश्वान्साह्वामीढ्वांश्च,, इति क्वसंतो निपातः, अत एव मरुत्सहितं महेन्द्रं वयं नम-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्कुर्मः। पूजयामो वयं सर्वे हेन्द्रं मरुतस्तथा जगतां पालकाः ह्येते कुर्वन्तु मङ्गलम् सदा ।४६।

(अथ सप्तचत्वारिंशी)

अक्रन्कर्म कर्मकृतः सह वाचा मयोभुवा।
देवेभ्यः कर्म कृत्वास्त प्रेत सचाभुवः ॥४७॥

अथ पदच्छेदः — अक्रन् — कर्मकृतः— सह — वाचा — मयोभुवा — देवेभ्यः — कर्म — कृत्वा — अस्तं — प्रेत — सचाभुवः ॥ अथ मन्त्रार्थः —आग्नेय्यनुष्टुप्, अक्रन्कर्मेत्येनां पत्नीं वाचयति,कर्मकृतः हे वरुण ! प्रघासाख्य कर्मकारिणः ऋत्विजो वाचा सह स्तुतिरूपया वाचा सह कर्म प्रघासानुष्ठानरूपं कर्माक्रन् कृतवन्तः, कथं भूतया वाचा मयोभुवा, मय इति सुख नाम मयो भवति या सा मयोभूः तया मयोभुवा मन्त्ररूप स्तुत्या हे सचाभुवः अस्मिन् यज्ञकर्मणि सह भवनशीलाः हे ऋत्विजो देवेभ्यो देवार्थं कर्म कृत्वा वरुणप्रघासनामकं कर्मानुष्ठानाय अस्तं प्रेत गृहान् प्रकर्षेण यूयं गच्छत, अस्तमिति गृहनामसु पठितं निघं०, हे यज्ञाधिष्ठातृदेवाग्ने ! त्वां वयं नमस्कुर्मः। सर्वज्ञ देव होतासि जानवेदः नमोऽस्तुते ४७

(अथाष्टचत्वारिंशी)

अवभृथ निचुम्पुण निचेरुरसि निचम्पुणः। अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यैकृतं पुरुराव्णो देव रिषस्पाहि ॥४८॥

अथ पदच्छेदः—अवभृथ— निचुम्पुण— निचेरुः—असि —निचुम्पुणः —अव —देवैः— देवकृतम् —एनः—अयासिषं —अव —मर्त्यैः — मर्त्यकृतं—पुरुराव्णः —देव —रिषः—पाहि ॥ अथ मन्त्रार्थः—यज्ञैदवंत यजुः, अत्र विनियोगश्चिन्त्यः, वरुणप्रघासस्य कर्मणोऽन्ते तदंगभूतं यदवभृथाख्यं कर्मतज्जलसमीपे क्रियते, अत्रानेन मन्त्रेण दम्पतीभ्यां जले स्नानं विधेयम्, अवाचीनानि पात्राणि जलमध्ये म्रियन्ते, यत्र यज्ञ विशेषे सोऽयमवभृथः तत्सम्बोधनं,, हे अवभृथयज्ञ ! हे निचुम्पुण ! चुप् मन्दायां गतौ नितरां चोपति मन्दं गच्छति निचुम्पुणः, उण् प्रत्ययो मुमागमश्च, तत्सम्बोधनं हे निमुम्पुण ! यद्यपि त्वं निचेरुरसि, नितरां गमनशीलोऽसि, तथाप्यत्र निचुम्पुणो भव, मन्दगमनो भवेत्यर्थः, किमर्थं देवैः द्योतनात्मकैरस्मदिन्द्रियैर्देवकृतं हविः स्वामिषु देवेषु कृतमेनः पापं तदवयासिषम्, जलेऽहमवनीतवानस्मि, तथा मर्त्यैरस्मत्सहायभूतैः ऋत्विग्भिः मर्त्यकृतं यदेनो यज्ञदर्शनार्थं चागतेषुमनुष्येषु कृतमवज्ञारूपं यदेनोऽस्ति तदवयासिषम् जलेऽवनीतवानस्मि जलेऽस्माभिस्त्यक्तं यथा त्वां न व्याप्नोतु तथामन्दं गच्छेति भावः, किं च हे देवाभृथाख्य यज्ञपुरुष ! रिषोः हिंसारूपात् पापात् पुरुराव्णः, पुरु बहु विरुद्धं फलं राति ददातीति पुरुरावा तस्मात्, रा दाने धातोः मनिन् प्रत्ययः, तस्मात् विरुद्धफलदायी बधस्तत्प्रसादात् अस्माकं मा भूत् हे यज्ञपुरुष ! त्वां वयं नमस्कुर्मः, श्री यज्ञः शरणं समस्तजगतां कुर्यात्स नो मङ्गलम् ॥४८॥

(अथैकोनपञ्चाशी)

पूर्णा दर्वि परापत सुपूर्णा पुनरापत
वस्नेव विक्रीणावहा इषमूर्जं ꣳ शतक्रतो।४९।

अथ पदच्छेदः—पूर्णा—दर्वि—परापत— सुपूर्णा-पुनः-आपत—वस्नेव-विक्रीणवहै-इषं-ऊर्जं—शतक्रतो। अथ मन्त्रार्थः—द्वे ऐन्द्र्यावनुष्टुभौ साकमेधगतं कर्म, किं चिदुच्यते, दर्व्या स्थालीत ओदनं गृहीत्वा प्रथमया द्वितीयया तं जुहोति, मन्त्रार्थमाह हे दर्वि ! काष्टादिनिर्मिते ! देवान् प्रति अन्न प्रदानसाधन भूते ! त्वं स्थाली सकाशादन्नं गृहीत्वा पूर्णा सती परापत महेन्द्रं प्रति गच्छ, कर्मफलेन सुपूर्णा सती पुनरापत भूयोऽस्मान् प्रत्यागच्छ, एवं दर्वीमुक्त्वा महेन्द्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माह, हे शतक्रतो ! बहुकर्मेश ! महेन्द्र त्वं चाहं चोभौ वस्नेव मूल्येनेव इष अभीष्टं हविः स्वरूपमन्नं ऊर्जं च हविर्दानफलरूपं रस विशेषं विक्रीणावहै परस्परं द्रव्यविनिमयरूपं विक्रयं करवावहै, अहं तुभ्यं हवि र्ददामि, त्वं च मे यज्ञकर्मफलं देहि इति भावः, हे यज्ञपुरुष महेन्द्र त्वां वयं नमस्कुर्मः। यज्ञेश्वरो ददातु वै यज्ञकर्मफलं ध्रुवं ॥४९॥

अथ पञ्चाशी)

देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥५०॥

अथ पदच्छेदः—देहि—मे—ददामि—ते—नि—मे—धेहि—नि—ते—दधे—निहारं—च—हरासि—मे—निहारं—निहराणि—ते—स्वाहा ॥ अथ मन्त्रार्थः—देहि मे इति जुहोति, इन्द्रो वदति हे यजमान ! त्वं मे मह्यमिन्द्राय प्रथमं हविर्देहि प्रयच्छ, ते तुभ्यं यजमानाय समपेक्षितं यज्ञकर्मफलं पश्चाद्ददामि, एवं प्रथमपादोक्तार्थो द्वितीयपादेनादरार्थं पुनरुच्यते, मे मह्यमिन्द्राय हविः प्रथमं त्वं निधेहि मदर्थं नितरां संस्थापय, पश्चात् ते तुभ्यं यजमानाय निदधे समपेक्षितं यज्ञकर्मफलं नितरां सम्पादयामि, इन्द्रवाक्यं श्रुत्वैवं यजमानो ब्रवीति, निहारं नाम मूल्येन क्रेतव्यवस्तुरूपं यज्ञकर्मफलं मे मह्यं यजमानाय हरासि प्रयच्छ, "लेटोऽडाटौ,, इत्यडागमः, निहारं मूल्भूतं हविः ते तुभ्यमिन्द्राय निहराणि, नितरां समर्पयामि, मया समर्पितं हविः त्वदर्थं सुहुतमस्तु, हे यज्ञपुरुष ! त्वां वयं सदैव नमस्कुर्मः। श्री विष्णुः शरणं समस्तजगतां कुर्यात्सं नो मङ्गलम् ॥५०॥

(अथैकपञ्चाशी)

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती
योजा न्विन्द्र ते हरी ॥५१॥

अथ पदच्छेदः—अक्षन्—अमीमदन्त—हि—अव—प्रियाः—अधूषत—अस्तोषत—स्वभानवः—विप्राः—नविष्ठया—मतीः—योजा—नु—इन्द्र—ते—हरी ॥ अथ मन्त्रार्थः—ऐन्द्रीभ्यां पंक्तिभ्यां साकमेधगतपितृयज्ञाख्यकर्मणि आहवनीयमुपतिष्ठते, यस्या अष्टाक्षराः पञ्च पादाः सा पंक्तिः, पितृयज्ञाख्ये कर्मणि ये पितृदेवाः संति, तेऽस्माभिर्दत्तं हविः स्वरूपमन्नमक्षन् भक्षितवन्तः कथमवगम्यते हि यस्मादमीमदन्त हर्षं प्राप्ताः, अस्मदीयां भक्तिमवगम्य प्रियाः प्रीतियुक्ताः सन्तः अधूषत स्वकीयं शिरः कम्पितवन्तः किं च स्वभानवः स्वयं दीप्तिमन्तः विप्राः मेधाविनः सन्तः नविष्ठया नवतमया मती मत्या युक्ताः अस्तोषत, स्तुतिं कृतवन्तः, अहो स्वाद्वन्नं, बहुदत्तं, अहो भक्तिरिति स्तुतिः,, अतो हे इन्द्र ! नु क्षिप्रं ते तव हरी हरितवर्णावश्वौ गमनाय रथे योजा नाम योजय, तैः पितृदेवैः सह त्वया आगन्तव्यमित्यर्थः, अक्षन् इति अदेर्लुङि "लुङ्सनोर्घस्लृ,, इति घस्लृ आदेशः "मन्त्रे घस, इत्यादिना च्लेर्लुक्, "गमहन,, इत्युपधालोपः "खरिचेति,, चर्त्वम्, "शासि वासि,, इति षत्वं,, अधूषत धूञ् कम्पने,, लुङि रूपं, मती इति "सुपां सुलुक् इति तृतीया लुक् पूर्वसवर्ण दीर्घश्च,, योजा इति "व्यचोऽतस्तिङः,, इति संहितायां दीर्घः,, एवं सर्वत्र व्याकरण प्रक्रिया ऊहनीया। अत एव पितृदेवसहितं देवेन्द्रं वयं नमस्कुर्मः। सेन्द्रा वैपितरः समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥५१॥

(अथ द्विपञ्चाशी)

सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशां अनु योजा न्विन्द्र ते हरी ॥५२॥

अथ पदच्छेदः—सुसंदृशं—त्वां—वयम्—मघवन्—वन्दिषीमहि—प्र—नूनं—पूर्णवन्धुरः स्तुतः—यासि—वशान्—अनु =योजा—नु—इन्द्र—ते—हरी। अथ मन्त्रार्थः—हे मघवन् त्वा त्वां वयं वन्दिषीमहि स्तुतिकर्त्तारो भूयास्मेत्याशास्यते, किं भूतं त्वां सुसंदृशं, सु सम्यक् पश्यतीति सुसंदृक् तं शोभनदर्शनं, अनुग्रहदृष्ट्या सर्वस्य द्रष्टारं, इत्थमस्माभिः स्तुतस्त्वं वशान् कामयमानान् यजमानानुलक्षीकृत्य नूनं प्रयासि गच्छसि किं भूतस्त्वं पूर्णवन्धुरः वन्धुर शब्दो रथ नाडी, स्तोतृभ्यो देयैर्धनैः सम्पूर्णरथनीडोपेतोभूत्वा गच्छसि, हे इन्द्र नु क्षिप्रं ते तव हरी हरितवर्णावश्वौ गमनाय रथे योजय पितृदेवैः सह त्वयावश्यं गन्तव्यं,, योजा इति युजिर्योगे "ण्यन्तात् लोटि "छन्दस्युभयथा,, इति शप आर्धधातुकत्वात् "णेरनिटि,, इति णि लोपः, संहितायां दीर्घश्च,, अत एव वयं देवेन्द्रं त्वां नमस्कुर्मः। इन्द्रो वै शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥५२॥

(अथ त्रिपञ्चाशी)

मनो न्वाह्वामहे नाराश ꣳसेन स्तोमेन। पितॄणां च मन्मभिः ॥५२॥

अथ पदच्छेदः—मनः—नु—आह्वामहे—नाराशंसेन—स्तोमेन—पितॄणां—च—मन्मभिः। अथ मन्त्रार्थः—तिस्रः ऋचो मनोदेवत्या गायत्र्यो वन्धुदृष्टाः, इति तिसृभिः मनो न्वा ह्वामहे, इत्यादिभिर्गार्हपत्यमुपतिष्ठते, वयं नु क्षिप्रं मनोऽभिमानी दैवतमाह्वामहे, आह्वयामः, केन साधनेन स्तोमेन स्तोत्रेण, कथं भूतेन नाराशंसेन,, स्तोत्रं द्विविधं दैवं मानुषं च, यत्र देवाः स्तूयन्ते तद्दैवं यत्र च मनुष्याः प्रशस्यन्ते तन्मानुषं, येन नराः प्रशस्यंते दीर्घायुषः पुत्रवन्तो धनवन्तो भूयासुरित्यादिभिर्गुणैः सः नाराशंसः स्तोमः स्तुतिः किं च पितॄणां च मन्मभिः, पितृदेवताः यैः स्तोत्रैर्मन्यंते ते मन्मानः तैः तादृशैः स्तोत्रै राह्वयामः, अत एव पितृदेवान् मनोदेवयुक्तान् वयं नमस्कुर्मः ॥ श्री यज्ञः शरणं समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥५३॥

(अथ चतुःपञ्चाशी)

आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूर्यं दृशे ॥५४॥

अथ पदच्छेदः—आ—नः—एतु—मनः—पुनः—क्रत्वे—दक्षाय—जीवसे—ज्योक्—च—सूर्यं—दृशे ॥ अथ मन्त्रार्थः—हे सोमदेव! नोऽस्माकं मनः पुनर्भूय अस्मच्छरीरे आ एतु आगच्छतु, किमर्थं क्रत्वे संकल्पाय यज्ञसंकल्पयितुं, दक्षाय कर्मण्युत्साहाय, तथा च श्रुतिः, तदेव मनसा कामयत इदं मे स्यादिदं कुर्वीयेति स एव कृतरथ यदस्मै तत्समृद्धयते, स दक्षः इति ज्योगिति निपातश्चिरवचनः, ज्योग् जीवसे चिरं जीवितुं सूर्यं दृशे च चिरकालं सूर्यमवलोकयितुं च एतेषां संकल्पादीनां सिद्धये मनः पुनरागच्छतु,, क्त्वे गुणाभावाद्यणादेशः, जीवसे तुमर्थे असे प्रत्ययः, दृशे विख्ये चेति साधुः अत एव मनो दैवं वयं नमस्कुर्मः इत्यलम् ॥ शुभसंकल्पसिद्धये जीवेम शरदः शतम्। वासुदेव नमस्कुर्मः पूर्णकामोऽसि हे प्रभो ॥५४॥

(अथ पञ्चपञ्चाशी)

पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रात ꣳसचेमहि ॥५५॥

अथ पदच्छेदः—पुनः—नः—पितरः—मनः—ददातु—दैव्यः—जनः—जीवं—व्रातं—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सचेमहि ॥ अथ मन्त्रार्थः—हे पितरः भवदनुज्ञया दैव्योजनः देवसम्बन्धी जनः सोम देवः पुरुषः नोऽस्माकं पूर्वोक्तं मनः पुनः भूयो ददातु प्रयच्छतु तथा सति यज्ञानुष्ठानं कृत्वा भवत्प्रसादात् जीवं जीवनवन्तं व्रातं पुत्रपश्वादिरूपं गणं वयं सचेमहि सेवेमहि। सचतिः सेवनार्थः ॥ भद्रं सेवेमहि सदा पितृदेवप्रसादतः ॥५५॥

(अथ षट्पञ्चाशी)

वय ꣳ सोम व्रते तव मनस्तनूषु विभ्रतः । प्रजावन्तः सचेमहि ॥५६॥

अथ पदच्छेदः — वयं—सोम —व्रते—तव—मनः—तनूषु—बिभ्रतः—प्रजावन्तः —सचेमहि ॥ अथ मन्त्रार्थः—सोमदेतत्या गायत्री जपे विनियुक्ता, अत्र पितृयज्ञे सोमदेवोऽस्ति सोमाय पितृमते, इत्येव हविषो विहितत्वात्—हे सोम देव ! वयं यजमानाः तव व्रते नाम कर्मणि वर्त्तमानाः जाग्रतस्वप्नसुषुप्त्याख्येषु तनूषु नाम शरीरेषु मनो बिभ्रतः धारयन्तः संतः त्वत्प्रसादात् प्रजावन्तः पुत्रपौत्रादिसम्पन्नाः सेतव्यानि वस्तूनि यज्ञकर्माणि च सचेमहि सेवेमहि, अत एव हे सोमदेव ! त्वां वयं सर्वदा नमस्कुर्मः इत्यलम् प्रजावन्तः वयं सर्वे सोम तव प्रसादतः यज्ञकर्माणि कुर्वन्तः यज्ञं सदा प्रशास्महे ॥५६॥

(अथ सप्तपञ्चाशी)

एष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग आखुस्ते पशुः ॥५७॥

अथ पदच्छेदः—एषः—ते रुद्र-भागः-सह—स्वस्रा—अम्बिकया—तं—जुषस्व-स्वाहा—एषः—ते—रुद्र—भागः—आखुः—ते-पशुः-अथ मन्त्रार्थ—द्वे रौद्रे यजुषी विंशत्यक्षरद्वादशाक्षरे, साकमेधगतत्र्यम्बकहविर्विषयाः मन्त्राः उच्यन्ते, यदरोदीत् तद्रुद्रस्य रुद्रत्वं, प्राणवियोगकाले सर्वान् प्राणिनो रोदयति इति रुद्रः, हे रुद्र ! एषः भागः त्वया स्वीकर्त्तव्यः, तं भागं स्वस्रा ते तव भगिन्या अम्बिकया सह तं हविर्भागं त्वं जुषस्व, सेवस्व, हे रुद्र ! एषः ते तव पशुः, एषः कः यः आखुवत् परद्रव्यापहरणशीलः ब्रह्मज्ञानरहितः दस्युतस्करादिजनसमुदायरूपः, एषः ते तव भागः त्वयि स्वाहा सुहुतमस्तु—श्रुत्युक्तमाह, अम्बिकाह वै नामस्य स्वासा,, सा वै शरद्रूपा शरत्काले ज्वरादिभिः बहून् प्राणिनो हन्तुमिच्छति, तच्छान्त्यर्थं नवरात्रारम्भः,, अत एव तं रुद्रदेवं वयं नमस्कुर्मः इत्यलम् ॥ रुद्रो वै शरणं समस्तजगतां ध्यायेम सत्यं शिवं ॥ ५७॥

(अथाष्टपञ्चाशी)

अव रुद्रमदीमहव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥५८॥

अथ पदच्छेदः—अव—रुद्रं —अदीमहि अव—देवं—त्र्यम्बकं—यथा—नः — वयस्यसस्करत्—यथा—नः—श्रेयसः—करत् — यथा-नः—व्यवसाययात् ॥ अथ मन्त्रार्थः—द्वे रौद्यौ पंक्तिककुभौ, द्वयोर्जपे विनियोगः—असौ रुद्रो देवः सर्वेभ्यो महान् इति मनसा तमवगत्य तस्य प्रसादान्नं वयं अदीमहि भक्षयेम, तथा त्र्यम्बकं देवं, त्रीणि अम्बकानि नाम नेत्राणि यस्य तादृशं देवं, त्रिनेत्रोऽयं देवः, त्रिभिर्नेत्रैः सर्वान् जन्तून् पश्यति, मित्रस्य चक्षुषा निष्कामभक्तान् पश्यति तेभ्यः कैवल्यं ददाति, वरुणस्य चक्षुषा सकामोपासकान् पश्यति, तेभ्यः कर्मफलं ददाति, रुद्रस्य चक्षुषा पापकर्तॄन् जनान् पश्यति तेभ्यो नरक गतिं ददाति, सकामनिष्कामपापिष्ठान् जनान् पश्यतीति मनसावगत्य, तस्यानु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहादन्नं वयं अदीमहि, भुञ्जीमहि,, यथा येन प्रकारेण नोऽस्मान् वस्यसः करत् वस्तृतरान् वसनशीलान् असौ कुर्यात्, तथा च नोऽस्मान् श्रेयसः करत् ज्ञातिषु प्रशस्यतरान् कुर्य्यात् यथा च अस्मान् व्यवसाययात् सर्वेषु कार्येषु निश्चययुक्तान् कुर्यात्, तथैनं देवं वयं सर्वदा ध्यायेम, तं रुद्रं जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ॥ वसतीति वस्ता, तृन्, अतिशयेन वस्ता वसीयान्, "तुश्छन्दसि" इति ईयसुनि कृते "तुरिष्ठेमेयःसु" इनि तृनो लोपः वसीयसः इति प्राप्ते ईलोपः छान्दसः" व्यवसाययात् लेटि आडागमे "इतश्च लोपः परस्मैपदेषु" इतीकार-लोपे विपूर्वस्य ण्यन्तस्य स्यते: रूपम् ॥ इत्यलम् स रुद्रो शंकरः पातु सोऽयं विष्णुः प्रकीर्त्तितः ५८

(अथैकोनषष्टी)

भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् । सुखं मेषाय मेष्यै ॥५९॥

अथ पदच्छेदः—भेषजं—असि—भेषजं—गवे—अश्वाय—पुरुषाय – भेषजम्— सुखं—मेषाय – मेष्यै ॥ अथ मन्त्रार्थः—हे रुद्रत्वं भेषजमसि औषधवत् सर्वोपद्रवनिवारकोऽसि, अतोऽस्मदीयेभ्यो गवे अश्वाय पुरुषाय सर्वेभ्यः पशु-पुत्रादिभ्यो भैषज्यं सर्वव्याधिनिवारकमौषधं देहि, मेषाय मेष्यै च सुखं देहि, मेषमेष्युपलक्षितेभ्यः सर्वपशुमनुष्येभ्यः सुखं देहि, सुहितं खेभ्यः नाम प्राणेभ्यः इति सुखं, अनेन मन्त्रेण गृहपशुपुत्रादिक्षेमप्राप्तिः प्रार्थ्यते, अतो वयं रुद्रं मनामहे, तं रुद्रं जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ॥५९॥

(अथ षष्टी)

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् । त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः॥६०॥

अथ पदच्छेदः—त्र्यम्बकं —यजामहे— सुगन्धिं—पुष्टिवर्धनम्—उर्वारुकम् –इव–बन्धनात् —मृत्योः —मुक्षीय — मा — अमृतात् । त्र्यम्बकं—यजामहे – सुगन्धिं – पतिवेदनं— उर्वारुकं—इव—बन्धनात्—इतः – मुक्षीय — मा – अमुतः ॥ अथ मन्त्रार्थः – द्वावनुष्टुभौ, पुरुषाः प्रथममन्त्रेणाग्निं त्रिः परियन्ति, यजमानस्य कुमार्यश्चोत्तरमन्त्रेणाग्निं त्रिः परियन्ति, मन्त्रार्थस्तु – सुगन्धिं दिव्यगन्धोपेतं मर्त्यधर्मबहिर्भूतं पुष्टिवर्धनं धनधान्यादिपुष्टेर्वर्धयितारं त्र्यम्बकं नेत्रत्रयोपेतं रुद्रं पूर्वोक्त गुणविशिष्टं यजामहे पूजायामः, ततो श्री रुद्र प्रसादादहं मृत्योर्मुक्षीय अपमृत्योः संसृतेश्चाहं मुक्तो भूयासम, अमृतादहं मा मुक्षीय स्वर्गरूपात् मुक्तिरूपात् जन तपः सत्यलोकत्ररूपादमृतपदादहं मा मुक्षीय, मा मुक्तो भूयासम, अभ्युदय निःश्रेयसरूपात् फलद्वयान्मम भ्रंशो माऽभूदित्यर्थः, मृत्योर्मोचने दृष्टान्तः, यथोर्वारुकं कर्कन्ध्वादेः पक्वं फलं सत् बन्धनात् वृन्तात् स्वयं प्रमुच्यते, तद्वत् यजमानसंबन्धिन्यः कुमार्योऽपि उत्तरत्र्यम्बकमन्त्रेणाग्निं त्रिः परियन्ति, त्र्यम्बकं यजामहे, कीदृशं पतिवेदनं पतिलम्भयितारं विद्लाभे, अन्यत्पूर्ववत्, त्र्यम्बकप्रसादादहं इतो मुक्षीय मातृपितृगोत्रात् मुक्षीय मुक्ता भूयासम, अमुतो मा मुक्षीय त्र्यम्बकप्रसादात् पतिगोत्रात् माहं मुक्ता भूयासं, पितृगोत्रं परित्यज्य पतिगृहे यावज्जीवनं वसामि, सा यदि त इत्याह ज्ञातिभ्यः तदाह मामुत इति, पतिस्तदाह इति श्रुतिः, श्री रुद्रं जगतां पतिं च शरणं ध्यायेम सत्यं शिवं ॥६०॥

(अथैकषष्टी)

एतत्ते रुद्राऽवसं तेन परो मूजवतोऽतीं-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हि । अवतत धन्वा पिनाकवसः कृत्तिवासा अहिंꣳ सन्नः शिवोऽतीहि ॥६१॥

अथ पदच्छेदः — एतत् — ते—रुद्र—अवसं—तेन—परः—मूजवतः—अतीहि—अवततधन्वा—पिनाकवसः—कृत्तिवासा—अहिंसन्—शिवः—अतीहि ॥ अथ मन्त्रार्थः— रौद्रचस्तारपंक्तिः, यस्या अन्त्यौ द्वादशाक्षरावाद्यावष्टाक्षरौ पादौ सास्तारपंक्तिः,, व्रीहियवादीन् बद्ध्वा वहनार्थं तृणवंशादिनिर्मितः पात्रविशेषो मूतमित्युच्यते, तयो रुभयोर्मूतयोस्त्र्यबकान् हविःशेषान् प्रक्षिप्य स्वकीयेनांसेन वोढुं शक्यायां, वंशयष्ट्यां अवग्रहद्वयं आसज्योह्यते स्थाणौ वृक्षे वंशे वल्मीके वा मूतद्वययुतां वंशयष्टिं संमृजति, तत्राष्टोत्तशतावृत्तिरूपेणानेन मन्त्रेण ग्रामस्य सर्वोपद्रव वारणार्थं शान्त्यर्थं च जुहुयात्, मूजवान् नाम कश्चित् पर्वतो रुद्रस्य वासस्थानं, अवसं पथिभोक्तव्यं पाथेयं भवति, हे रुद्र ! एतत्ते तव हविःशेषाख्यं पाथेयम् अस्ति, तेन सहितस्त्वं मूजवतः पर्वतात् परः परभागवर्त्ती सन् अतीहि पर्वतमतिक्रम्य गच्छ, कीदृशस्त्वं अवततधन्वा अवतारितधनुष्कः, अस्मद्विरोधिनां त्वया निवारितत्वात्, ज्यावरोपणं युक्तं, तथा पिनाकावसः, पिनाकारव्यं त्वदीयं धनुरावस्ते सर्वतः आच्छादयतीति पिनाकावसः, यथा त्वदीयं धनुर्दृष्ट्वा प्राणिनो न बिभ्यति, तथा धनुर्वस्त्रादिना प्रच्छाद्य गच्छ, हे रुद्र त्व कृत्तिवासाः चर्माम्बरो नोऽस्मान् अहिंसन् हिंसामकुर्वन् सन् शिवो भव, अस्मदीयपूजयासंतुष्टः कोपरहितो भूत्वा अतीहि पर्वतमति क्रम्य गच्छ, इत्यलम्, श्री रुद्र जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ॥६१॥

(अथ द्विषष्टी)

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥६२॥

अथ पदच्छेदः—त्र्यायुषं—जमदग्नेः—कश्यपस्य—त्र्यायुषम्—यत्—देवेषु—त्र्यायुषम्—तत्—नः—अस्तु—त्र्यायुषम् ॥ अथ मन्त्रार्थः—आशीर्देवतोष्णिक् छन्दः, यस्याश्चत्वारः पादाः सप्ताक्षराः सोष्णिक्, मुण्डयमानो यजमानो जपति,त्र्यायुषमिति त्रयाणां बाल्ययौवनस्थविराणां आयुषां समाहारः त्र्यायुषं जमदग्नेः मुनेः यत् त्र्यायुषं तथा कश्यपस्य प्रजपतेः यत् त्र्यायुषं तथा देवेषु महेन्द्रादिषु यत् त्र्यायुषं अस्ति तत् सर्वं त्र्यायुषं नोऽस्माकं यजमानानां भूयात्,जमदग्न्यादिमहर्षीणां बाल्यौवनस्थाविरादिषु यादृशं चरितं तादृशं नो भूयादिति आशीराशंसनम् देवर्षिसेवितं चायुः भूयान्मे जमति प्रभो ॥६२॥

(अथ त्रिषष्टी)

शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः । निर्वर्तयाम्यायुषेऽन्नाद्यायꣳ प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥६३॥

अथ पदच्छेदः—शिवः—नाम—असि—स्वधितिः—ते—पिता—नमः—ते—अस्तु—मा—मां—हिंसीः—निवर्त्तयामि—आयुषे—अन्नाद्याय—प्रजननाय—रायस्पोषाय—सुप्रजास्त्वाय—सुवीर्याय ॥ अथ मन्त्रार्थः—हे रुद्र ! शिवो नामासि नाम्ना शिवः शान्तोऽसि, ते तव स्वधितिः वज्रं लोहक्षुरस्य पिता जनकोऽस्ति, ते तुभ्यं नमोऽस्तु, हे रुद्र तव प्रसादादहमनेन लोहक्षुरेण यजमानं निवर्त्तयामि, नाम मुण्डयामि, तस्य मुण्डनसंस्कारं करोमि, नि पूर्वो वृतिर्मण्डनार्थः, किमर्थं, आयुषे नाम जीवनाय तथान्नाद्यायान्नभक्षणसामर्थ्याय पुनः प्रजननाय नाम सन्तानार्थं रायो धनस्य पोषाय नाम वर्धनाय सुप्रजास्त्वाय सदाचारीसन्तानार्थं सुवीर्याय शोभनसामर्थ्याय, हे रुद्र ! वज्रेण स्वकीयेन मदीयां प्रजां त्वं मा हिंसीः मा विनाशय, त्वां रुद्रं जगतां पतिं च शरणं ध्यायेम सत्यं शिवं ॥६३॥ मया गोकुलचन्द्रेण तृतीयाध्यायगोचराः अग्न्याधानादिमन्त्राश्च मुण्डनांताः प्रकीर्त्तिताः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ चतुर्थाध्याय समारम्भः

(तत्र प्रथमा)

एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे । ऋक्सामाभ्यां ꣳ संतरन्तो यजुर्भी रायस्पोषेण समिषा मदेम । इमा आपः शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनं ꣳ हि ꣳ सीः ॥१॥

अथ पदच्छेदः—आ—इदं—अगन्म—देवयजनं—पृथिव्याः—यत्र—देवासः—अजुषन्त—विश्वे—ऋक्सामाभ्यां—संतरन्तः—यजुर्भिः—रायः—पोषेण-सम्—इषा—मदेम-इमाः-आपः-शं—उ—मे—सन्तु—देवीः-ओषधे—त्रायस्व-स्वधिते—मा—एनं-हिंसीः ॥ अथ मन्त्रार्थः—आधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यमन्त्रास्तृतीयाध्याये प्रोक्ताः, चतुर्थाध्यायं समारभ्याष्टमस्य द्वात्रिंशत्कण्डिकापर्यन्तमग्निष्टोममन्त्राः, प्रजापतेरार्षं, द्वेऽप्येते ऋचौ अत्यष्टी अवसाने, शालस्तम्भमन्वारभ्य यजमानो जपति, द्वावर्धर्चौ देवयजनदेवत्यौ,, आ इदं अगन्म इति पदानि उपसर्ग क्रियापदयो र्व्यवधानं, वयमिदम् पृथिव्याः सम्बन्धिदेवयजनं स्थानं आ अगन्म आगताः स्मः, इदं किं यत्र देवयजने विश्वेदेवासः सर्वे देवाः अजुषन्त प्रीत्या स्थिताः किं च तत्र वयं रायो धनस्य पुष्ट्या इषा अन्नेन च संमदेम हृष्टाः भवेम, धनैरन्नैश्च तृप्ताः भवेम, किं कुर्वन्त- ऋग्सामाभ्यां ऋक्साममन्त्राभ्यां यजुर्भिश्च वेदत्रयगतमन्त्रैः संतरन्तः समुद्रवत् गम्भीरं सोमयागं समापयन्तः किं च इमाः आपः देवताः शिरः क्षेदाय सिच्यमानाः मे मम यजमानस्य शमु सुखकारिण्यः भवन्तु, किं भूताः आपः देवीः नाम देव्यः द्योतमानाः निर्मलाः,, कुशतृणमन्तर्दधाति,, हे औषधे कुशकाशतृण रूपौषधे ! त्वं सर्वरोगनिवारकाऽऽसि, त्वमेनं यजमानं मा हिंसीः मा विनाशय, लोहक्षूरेणैनं यजमानं निवर्त्तयामि तस्य मुण्डनं करोमि, अत एव सर्वाबाधाप्रशमनं मा बधीः रुद्र इमाः प्रजाः ॥१॥ वासुदेवः सर्वमिति मङ्गलम् वितनोतु मे ॥

(अथ द्वितीया)

आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिराः पूत एमि । दीक्षातपसोस्तनूरसि तां त्वा शिवा ꣳ शग्मां परिदधे भद्रं वर्ण पुष्यन् ॥२॥

अथ पदच्छेदः—आपः-अस्मान्—मातरः—शुन्धयन्तु-घृतेन—नः-घृतप्वः—पुनन्तु-विश्वं—हि-रिप्रं—प्रवहन्ति—देवीः—उत्—इत्—आभ्यः—शुचिः-आपूतः-एमि- दीक्षातपसोः—तनूः-असि—ता—त्वां-शिवां—शग्मां-परिदधे—भद्रं—वर्णं—पुष्यन् ॥ अथ मन्त्रार्थः- आपो अस्मानितिस्नात्वा, हे आपः भवन्त्यः अस्मान् शुन्धयन्तु शोधयन्तु इत्यर्थः—क्षौरकर्म निमित्तामपहन्तिं निवारयन्तु, किं भूताः यूयं मातरः मिमते विश्वमिति मातरः, जगन्निर्माञ्यः कथंभूतानस्मान् कृतक्षौरान् यजमानान्, किं च घृतप्वः, घृ क्षरेण जिघर्ति क्षरतीति घृतं, तेन क्षरितजलेन नोऽस्मान् पुनन्तु शोधयन्तु शुद्धान् कुर्वन्तु, किं च देवीः नाम द्योतमानाः आपः विश्वं, हि एवार्थे सर्वमेव रिप्रं पापं प्रवहन्ति प्रकर्षेणापनयन्तु, उदि दाभ्यः इदेवार्थे, अहमाभ्यो अद्भ्यः उदेमि जलाद्बहिर्निगच्छामि, किं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूतोऽहं स्नानेन शुचिर्नाम शुद्धः, तथापूतः आचमनेन अन्तरपि शुद्धः, शुचिरापूत इति शब्दाभ्यां स्नानाचमनाभ्यां बाह्याभ्यन्तरशुद्धः, दीक्षातपसोः वासो देवता, हे क्षौम वस्त्र ! हे सौत्र वस्त्र ! त्वं दीक्षातपसोस्तनूरसि, दीक्षाभिमानी देवतायास्तपोभिमानिदेवतायाश्च त्वं शरीरवत् प्रियमसि, तां देवता द्वयशरीरभूतां त्वामहं परिदधे धारयामि, किं भूतां त्वां शिवां शग्मां द्वयोरपि सुखवाचकत्वात् अत्यन्तसुखरूपां, किं भूतोऽहं भद्रं वर्ण पुष्यन् त्वत्परिधानेन कल्याणीं कान्तिं पुष्यन् वर्द्धयन्नित्यर्थः, तं यज्ञं जगतां पतिं च शरणं ध्यायेम सत्यं शिवं ॥२॥

(अथ तृतीया)

महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि । वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि ॥३॥

अथ पदच्छेदः—महीनां—पयः—असि—वर्चोदाः—असि—वर्चो—मे—देहि—वृत्रस्य—असि—कनीनकः—चक्षुर्दा—असि—चक्षुः—मे—देहि ॥ अथ मन्त्रार्थः—यज्ञशालापूर्वभागे कुशेषु तिष्ठन् नवनीतं गृहीत्वा शिरस आरभ्य पादान्तं शरीराभ्यंगं कुर्यादिति, महीनां पयः नवनीतमुच्यते, हे नवनीत त्वं महीनां गवां पयोऽसि, महीति गोनामसु पठितं, नवनीतस्य क्षीरोत्पन्नत्वात्, वर्चोदा असि, पुंस्त्वमार्षं, अतो मे मह्यं यजमानाय वर्चो देहि कान्तिं प्रयच्छ, त्रिककुत्पर्वतादुत्पन्नाञ्जनं लभ्यते चेत् तदभावेऽन्यदपि ग्राह्यं, हे अञ्जन त्वं वृत्रासुरस्य कनीनकोऽसि, नेत्रयोः कृष्णमण्डलरूपोऽसि, इन्द्रो वृत्रमहन् तस्य कनीनकाः परापतत्तदेवाञ्जनमभवत् इति तित्तरिः हे अञ्जन चक्षुर्दा असि, दृष्टि प्रदोऽसि, अतो मे मह्यं चक्षुर्देहि, सूर्यं दृष्टिप्रदं च विश्वशरणं ध्यायेम सत्यं शिवं ॥३॥

(अथ चतुर्थी)

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥४॥

अथ पदच्छेदः—चित्पतिः—मा—पुनातु—वाक्पतिः—मा—पुनातु—देवः—मा—सविता—पुनातु—अच्छिद्रेण—पवित्रेण—सूर्यस्य—रश्मिभिः—तस्य—ते—पवित्रपते—पवित्रपूतस्य—यत्—कामः—तत्—शकेयम् ॥ अथ मन्त्रार्थः—चितांज्ञानानां पतिश्चित्पतिः, प्रजापतिर्वै चित्पतिः, विज्ञानात्मा प्रजापतिर्मां यजमानं पुनातु पापेभ्यः शोधयतु, वाचां पतिर्देवगुरुर्मां पुनातु, सविता कर्मसाक्षीदेवः मां पुनातु केन अच्छिद्रेण पवित्रेण, अच्छिद्रो वै वायुः, वायुरूपेण पवित्रेण तथा सूर्यस्य रश्मिभिर्मां पुनंतु सर्वे देवाः, पवित्रान् शुद्धान् पातीति पवित्रपतिस्तस्य सम्बुद्धौ हे पवित्रपते ! शुद्धपालक ! ते तव पवित्रेण पूर्वोक्तेन शुद्धस्य यजमानस्याभीष्टं भूयादिति शेषः, यत्कामोऽहं सोमयागनुष्ठाने कामोऽहं पुने, आत्मानं शोधयामि, तत्सोमयागानुष्ठाने 'शकेयम् शक्तो भूयासमिति-यज्ञेशं जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ॥४॥

(अथ पञ्चमी)

आ वो देवास ईमहे वामं प्रयत्यध्वरे ।
आ वो देवास आशिषो यज्ञियासो हवामहे ५

अथ पदच्छेदः—आ—वः—देवास,—ईमहे=वामं—प्रयति—अध्वरे—आ—वः—देवासः—आशिषः—यज्ञियासः—हवामहे ॥ अथ मन्त्रार्थः—आवो देवास इति—वाचयति, दैवी अनुष्टुप् आशीः, हे देवासः देवाः ! वो युष्मान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वयं वामं मनोहरं यज्ञफलं, आ ईमहे आस्मन्तात् याचामः, ई महे याञ्चाकर्मसु पठितो द्विकर्मकः कं सति, अस्मदीये अध्वरे नाम यज्ञे प्रयति प्रवर्त्तमाने सति किं च हे देवासः देवाः ! वो युष्मान् वयं हवामहे आह्वयामः किं कर्त्तुं यज्ञियासः यज्ञियाः यज्ञसन्वन्धि न्याशिषो नाम यज्ञफलानि समानेतुं यज्ञफलप्राप्त्यर्थं युष्मानाह्वयामः,, यज्ञेशं जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ५

(अथ षष्ठी)

स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात्स्वाहा द्यावापृथिवीभ्या ँ स्वाहा वातादारभे स्वाहा ॥६॥

अथ पदच्छेदः—स्वाहा—यज्ञं—मनसः—स्वाहा—उरोः-अन्तरिक्षात्—स्वाहा —द्यावापृथिवीभ्यां—स्वाहा—वातात्—आरभे—स्वाहा। अथ मन्त्रार्थः—स्वाहायज्ञमित्यङ्गुलीन्यर्च्यते,आद्यमन्त्रेण हस्तद्वयकनिष्ठिकाद्वयं सङ्कोचयति, एवमन्यत्र त्रयेण अन्याः, स्वाहा वातादारभे इत्युत्तमेन मुष्टिद्वयं कुर्यात,, चतुर्णां यजुर्गं यज्ञो देवता,, स्वाहा शब्दस्य निपातत्वात् ब्राह्मणानुसारेण अर्थाः ग्राह्याः,, स्वाहा यज्ञं मनसः इति तृतीयार्थे पञ्चमी,, मनसा लिङ्गशरीरेण यज्ञं स्वाहा यज्ञमभिगच्छामि, अत्र स्वाहा शब्दो गमनार्थः, स्वाहोरोरन्तरिक्षात् इति पञ्चमी सप्तम्यर्थे, उरौ नाम विस्तीर्णेऽन्तरिक्षे स्वाहा यज्ञ आश्रितः अत्र स्वाहा शब्दो यज्ञार्थः,, स्वाहा द्यावापृथिवीभ्यां द्यावापृथिव्योः स्वाहा यज्ञः श्रितः, लोकत्रयव्यापी विश्वयज्ञ इत्यर्थः स्वाहा वातादारभे वातात्, वायुसञ्चारात् स्वाहा यज्ञमारभे नाम प्रवर्त्तयामि, वायोः सर्व प्राणिनां प्रवर्त्तकत्वात्, एवं स्वाहा शब्देन यज्ञार्थः सिद्धः,, यज्ञेशं जगतां पतिं च शरणं ध्यायेम सत्यं शिवम् ॥६॥

(अथ सप्तमी)

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहा। आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उरो अन्तरिक्ष। बृहस्पतये हविषा विधेम स्वाहा ॥७॥

अथ पदच्छेदः—आकूत्यै—प्रयुजे—अग्नये—स्वाहा—मेधायै—मनसे—अग्नये—स्वाहा—दीक्षायै—तपसे—अग्नये—स्वाहा—सरस्वत्यै—पूष्णे—अग्नये—स्वाहा—आपः—देवीः—बृहतीः—विश्वशंभुवः—द्यावापृथिवी—उरो—अन्तरिक्ष—बृहस्पतये—हविषा — विधेम—स्वाहा ॥ अथ मन्त्रार्थः—अतः परं षडौदुम्बरभणहोममन्त्राः, चतुर्णामग्निर्देवता, औदुम्बरभणानि जुहोति, स्रुल्याः स्रुवेणाकूत्या इति प्रतिमन्त्रमिति वचनात्, आकूत्यै प्रयुजे अग्नये स्वाहा अग्नये वह्निदेवाय स्वाहा, इदमग्नये सुहुतमस्तु,, आकूतिः मानसः सकल्पशक्तिः तत्संपूर्त्यै प्रयुजे नाम सङ्कल्पसिद्धौ निर्विघ्नं प्रेरयते इति प्रथमोमन्त्रः,, मेधायै मनसोऽग्नये स्वाहा, मेधात्र धारणशक्तिः तत्सिद्धयर्थं मनसे मदीयमनोऽभिमानीने अग्नये स्वाहा इदमग्नये सुहुतमस्तु, इति द्वितीयो मन्त्रः,, जपति दीक्षायै तपसे अग्नये स्वाहा, व्रतनियमो दीक्षा तत्सिद्धयर्थं मदीयशरीरतपोऽभिमानिने अग्नये स्वाहा, तत्सिद्धयर्थं इदमग्नये सुहुतमस्तु, इति तृतीयो मन्त्रः,, सरस्वत्यै पूष्णेऽग्नये स्वाहा मन्त्रोच्चारणशक्तिः सरस्वती, तत्सिद्धयर्थं वागिन्द्रियपाटवायाग्नये हविरिदं सुहुतमस्तु, इति चतुर्थो मन्त्रः,, आपो देवीः लिङ्गोक्तदेवताविराट् यस्या एकादशाक्षराः त्रयः पादाः सा विराट्, हे आपः हे द्यावापृथिवी द्यावापृथिव्यौ,हे उरो अन्तरिक्ष ! हे विस्तीर्णान्तरिक्ष ! युष्मभ्यां बृहस्पतये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च हविषा विधेम हविर्देव, द्वितीयार्थे तृतीया, हविरिदं युष्मदर्थं सुहुतमस्तु,, किं भूताः आपः देवीः द्योतमानाः तथा बृहतीः बृहत्यः प्रचुराः विश्वशम्भुवः, विश्वस्य शं सुखभावयित्र्यः, इति पञ्चमो मन्त्रः,, अग्निर्वै शरणं समस्तजगतां ध्या, येम भोगास्पदम् ॥७॥

(अथाष्टमी)

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥८॥

अथ पदच्छेदः—विश्वः—देवस्य—नेतुः—मर्त्तः—वुरीत—सख्यम्—विश्वः—राये—इषुध्यति—द्युम्नं—वृणीत—पुष्यसे—स्वाहा ॥ अथ मन्त्रार्थः—अथषष्ठः औदूग्रभणमन्त्रः, सवितृदेवत्यानुष्टुप्, स्वस्त्यात्रेयदृष्टा, विश्वो मर्त्तः सर्वो मनुष्यः देवस्य दानादिगुणयुक्तस्य नेतुर्नाम कर्मफलप्रापकस्य सवितुर्नाम जगतां प्रेरकस्य सख्यं सखीभावं वुरीत वृणीत, वृञ् वरणे, अस्माल्लिङि तङि प्रथमैकवचने वासेन शपो लुक् "उदोष्ट्यपूर्वस्येति" उदादेशः किं च विश्वः सर्वो जनो राये धनाय इषुध्यति सवितारं प्रार्थयते, इषुध्यति याञ्चाकर्मसु पठितः, किं च द्युम्नं यशोऽन्नं वावृणीत प्रार्थयते, किमर्थं पुष्यसे पोषाय स्वप्रजापालनाय, पुषेस्तुमर्थे असे प्रत्ययः, यः पूर्वोक्तगुणविशिष्टः सविता नारायणो देवोऽस्ति तस्मै स्वाहा, समर्पितं हविरिदं सुहुतमस्तु—

समाप्तोऽयं षष्ठौदूग्रभणमन्त्रः—

सूर्यं प्राणप्रदं च सर्वजगतां ध्यायेम देवं हरिम् ॥८॥

(अथ मी)

ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः । शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हि ꣳसीः ॥९॥

अथ पदच्छेदः—ऋक्सामयोः—शिल्पेस्थः—ते—वां—आरभे—ते—मा—पातं—आ—अस्य—यज्ञस्य—उदृचः—शर्म—असि—शर्म—मे—यच्छ—नमः—ते—अस्तु—मा—मा—हिꣳसीः ॥ अथ मन्त्रार्थः—शुक्लकृष्णसन्धिमालभते, ऋक्सामाभिमानिन्यौ देवते, ऋक्साम वै देवेभ्यो यज्ञार्थं तिष्ठमाने कृष्णमृगरूपं कृत्वापक्रास्यातिष्ठतामेष वा ऋचो वर्णो यच्छुक्लं तदृचो, यत्साम्नो तत्कृष्णं वर्णः इति तित्तिरिवचनात्,, हे ऋक्सामयोर्देवते शुक्लकृष्णरूपे युवां शिल्पे स्थः प्रतिरूपे भवथः, ते वां तथा विधे युवामारभे, अहं उपस्पृशामि, ते युवां मां पातं तथाविधे युवां मां पालयतम्, कियतं कालमिति चेत्तदाह—अस्य यज्ञस्य आ उदृचः उत्तमा नाम चरमा ऋक् उदृक् तस्याः समाप्तिपर्यन्तं, अस्य यज्ञस्य समाप्तिपर्यन्तं यजमानो दक्षिणजानुमारोहयति, हे देवयजनभूम्यासन ! त्वं शर्मासि शरणमसि, अतो मे शरणं यच्छ, देहि, ते तुभ्यं नमोऽस्तु, मा मां हिꣳसीः,, श्री यज्ञं शरणं समस्तजगतां ध्यायेम देवास्पदम् ॥९॥

(अथ दशमी)

ऊर्ग्स्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्य ꣳहस आस्य यज्ञस्योदृचः ॥१०॥

अथ पदच्छेदः—ऊर्क्—असि—आङ्गिरसि—ऊर्णम्रदा—ऊर्जं—मयि—धेहि—सोमस्य—नीविः—असि—विष्णोः—शर्म—असि—शर्म—यजमानस्य—इन्द्रस्य—योनिः—असि—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुसस्याः—कृषीः—कृधि—उच्छ्रयस्व—वनस्पते—ऊर्ध्वः—मा—पाहि—अंहसः—आ—अस्य—यज्ञस्य—उत्—ऋचः ॥१०॥

अथ मन्त्रार्थः—मेखलां बध्नाति—हे मेखले त्वमङ्गिरसि,अंगिरो नामकानामृषीणां संबन्धिनी ऊर्क् अन्नरसरूपाऽऽसि; किं भूता ऊर्णम्रदा ऊर्णेव म्रदीयसी कम्बलवत् कोमलाऽऽसि तथा विधात्वमूज अन्नरसं मयि धेहि नाम स्थापय अङ्गिरसः स्वर्गलोकं गच्छन्तोऽन्नरसं व्यभजन्त, व्यभज्यमानेऽवशिष्टोऽन्नरसो भूमौ पतितः शणमुञ्जनामकतृणरूपेणाविर्भूतस्तस्माच्छणमुञ्जमयी मेखला अत एव मेखलायाः आंगिरसत्वमिति तित्तिरिणा प्रतिपादितं; हे मेखले त्वं सोमस्य नीविरसि, सोमदेवताया: प्रियभूता ग्रन्थिरसि, मूलाग्रयोरेकीकरणेन ग्रन्थिविशेषो नीविरुच्यते, अत एव त्वां कटिदेशेबध्नामि, त्वया कटिबद्धोऽहं सोमयज्ञकर्म विधातुं शक्तो भूयासम, वस्त्रेण शिरः प्रोर्णुते, शर्मेति हे वस्त्र त्वं विष्णोः व्यापकस्य यज्ञस्यं शर्मासि, सुखहेतुरसि; अतो यजमानस्य शर्म सुखं कुर्विति शेषः, हे यज्ञ पुरुष ! त्वं यथा पूर्वमिन्द्रस्य योनिरसि, तथेदानीं यजमानस्य यज्ञस्थाने यज्ञकर्मकर्त्तुं बलं च देहीति शेषः, पुरा कदाचित् यज्ञपुरुषो दक्षिणां देवीं समभवत, तस्मात संभावनात् इन्द्रो अजायत-तदार्यी अत्र अन्यस्योत्पत्तिर्माऽऽभूत इति विचार्य इन्द्रः स्वां योनीं दक्षिणायाः आच्छिद्य मृगेषु न्यदधात, सा योनिः कृष्णविषाणाऽऽभूत, इति तित्तिरिश्रुतौ कथा प्रसिद्धाऽऽभूत, तस्मात कृष्णविषाणायाः इन्द्रयोनित्वमिति कथनं गौणं, न समीचीनं; अश्लीलभाषणमिदं, अश्वमेधशतेनैव महेन्द्रो जायते ध्रुवं चेति वचनात् पूर्वं भूपतयो यज्ञैः पुरुषं समभ्यर्च्य महेन्द्रपदवीं च लेभिरे, तथेन्द्रस्य शतक्रतुः नाम श्रूयते तस्मात् यज्ञ एवेन्द्रस्य योनिरुत्पत्तिस्थानं हे यज्ञपुरुष त्वं कृषीः सुसस्याः कृधि कुरु शोभनं व्रीहि यवादिरूपं सस्यं यासु ताः सुसस्याः शोभनधान्याः कृषीः कुरु, चेत्यर्थः, मुखसंमितमौदुम्बरं दण्डं प्रयच्छति, दण्डो देवता,, हे वनस्पते वृक्षावयव दण्ड ! त्व मुच्छ्रयस्व, उन्नतो भव । त्वं धर्मदण्डोऽसि, अतो मां यजमानं यज्ञविघ्नकर्त्तृकृदंहसः पापात् पाहि, रक्ष कियन्तं कालपर्यन्तं, अस्यानुष्ठीयमानस्य यज्ञस्य उदृचः उत्तमायाः समाप्तिगतायाः ऋचः आ तादृक् पर्यन्तम् इति । यज्ञेशं शरणं समस्त जगतां ध्यायेम देवास्यपदम् ॥१०॥

(अथैकादशी)

व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहस ꣳ सुतीर्था नो असद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥११॥

अथ पदच्छेदः—व्रतं—कृणुत—अग्निः—ब्रह्म—अग्निः—यज्ञः—वनस्पतिः—यज्ञियः—दैवीं—धियं—मनामहे—सुमृडीकां—अभिष्टये—वर्चोधां—यज्ञवाहसम—सुतीर्था—नः—असत्—वशे—ये—देवाः—मनोजाताः—मनोयुजः—दक्षक्रतवः—ते—नः—अवन्तु—ते—नः—पान्तु—तेभ्यः—स्वाहा ॥ अथ मन्त्रार्थः— मौनोपस्थितस्य यजमानस्यैतन्मन्त्रोच्चारणं वाग्विसर्जनसाधनं हे परिचारकाः ! व्रतं कृणुत दोहनादिना यूयं क्षीरं संपादयत, दीक्षितस्य भोजनाय यन्नियतं पयस्तद्व्रतमित्युच्यते;अग्निर्ब्रह्मेति च सकृत् पठेत, ब्रह्मशब्देन वेदत्रयमभिधीयते, तस्मादयं श्रौतोऽग्निर्ब्रह्मैव वेदरूप एव, अयमग्निः यज्ञः, अग्निर्यज्ञ एवेति, वनस्पतिर्यज्ञियो यज्ञयोग्यः, वनस्पतेर्यज्ञसाधनत्वात् यज्ञत्वं, नहि मनुष्याः यजेरन् यद्वनस्पतयो न स्युरिति श्रुतिः,, दैवीं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धियमिति शक्करी अतिशक्करी वा, पूर्वार्धेन आचमनं, वयं धियं मनामहे यज्ञानुष्ठानविषयां बुद्धिं याचामहे, मनामहे इति याच्ञाकर्मसु पठितः, किमर्थमभिष्टये, अभिपूर्वस्य यजतेः क्तिनि आदिलोपः, अभिमुखत्वेन प्राप्तस्य यज्ञस्य सिद्ध्यर्थं, किं भूतां धियं दैवीं देवसम्बन्धिनीं, देवतोद्देशेन प्रवृत्तां, तथा सुमृडीकां शोभनसुखकर्त्रीं तथा वर्चोधां, तेजसो धारयित्रीं, तथा यज्ञवाहसं यज्ञपालनकर्त्रीं, तथा विधाधीः सुतीर्था, सुष्टतीर्थमवतरणमार्गो यस्यां सा सुतीर्था, एवं विधा सती नो वशे असत् अस्माकम् आधीनत्वे भवतु, मयि प्राणाः चक्षुरादीन्द्रियरूपाः ये देवाः वागेवाग्निः, प्राणापानौ मित्रावरुणौ, चक्षुरादित्यः, श्रोत्रं विश्वेदेवाः श्रुतिप्रसिद्धाः इति, किं भूताः देवाः मनोजाताः मनसः उत्पन्नाः, तथा मनोयुजः स्वप्नावस्थायां मनसा सह युज्यन्ते मनोयुजः, तथा दक्षक्रतवः, संकल्पितार्थकारिणः, ते देवाः नोऽस्मान् अवन्तु, यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु च तेभ्यः प्राणरूपेभ्यो देवेभ्यः स्वाहा समर्पितमिदं क्षीरं सुहुतमस्तु। देवाः वै शरणं समस्तजगतां ध्यायेम देवान् सदा ॥११॥

(अथ द्वादशी)

श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवी रमृता ऋता वृधः ॥१२॥

अथ पदच्छेदः—श्वात्राः—पीताः—भवत—यूयं—आपः—अस्माकं—अन्तः—उदरे—सुशेवाः—ताः—अस्मभ्यं—अयक्ष्माः—अनमीवाः—अनागसः—स्वदन्तु—देवीः—अमृताः—ऋतावृधः॥ अथ मन्त्रार्थः—श्वात्राः पीता इति नाभिमुपस्पृशति—अब्देवत्या जगती हे आपः क्षीररूपाः यूयं मया पीताः सत्यः श्वात्राः क्षिप्रपरिणामाः जीर्णाः भवत, श्वात्रमिति क्षिप्रनामसु पठितं, किं चास्माकं पीतवतामन्तरुदरे जले पाकस्थाने सुशेवाः शोभनसुखरूपाः भवत, किं च तथा विधाः आपः अस्मभ्यमस्मदुपकारार्थं अयक्ष्माः प्रबलरोगराजरहिताः, अनमीवाः सामान्यरोगरहिताः, अनागसः अपराधहारिण्यो भवन्तु, हे अमृताः अमरणधर्माणो देवाः पूर्वोक्ताः, वागादयः प्राणदेवताः, देवीः नाम देव्यः द्योतमानाः, ऋतावधः ऋतं यज्ञं वर्धयन्ति ताः, ऋतावृधः, ऋतस्य संहितायां दीर्घः, विश्वयज्ञवृद्धिहेतवः, ईदृशगुणविशिष्टाः ताः आपो भवन्तु, आस्वादयंतु तासामास्वादनं कुर्वन्तु,, देवाः वै शरणं समस्तजगतां कुर्वन्तु नो मङ्गलम् ॥१२॥

(अथ त्रयोदशी)

इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् । अ ५ होमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या संभव ॥१३॥

अथ पदच्छेदः—इयं—ते—यज्ञिया—तनूः—अपः—मुञ्चामि—न—प्रजां—अंहोमुचः—स्वाहाकृताः—पृथिवीं—आविशत—पृथिव्या—संभव॥ अथ मन्त्रार्थः—मूत्रं करिष्यन् लोष्टं तृणं वा गृह्णाति, हे यज्ञपुरुष इयं पृथिवी ते तव यज्ञिया तनूरस्ति, अतोऽस्या मूत्रोपहति दोषपरिहाराय व्यवधानं कर्तुं लोष्टं तृणं वा स्वीकरोमि, अपो मूत्ररूपाः अहं मुञ्चामि, न प्रजां प्रजोत्पत्तिनिमित्तं रेतो न मुञ्चामि, हे आपः मूत्राख्याः यूयं पृथिवीं आविशत, किं भूताः यूयं अंहोमुचः अंहसः नाम मूत्रवेगरूपात् पापात् मुञ्चंति पुरुषं पृथक् कुर्वन्ति,तथा स्वाहाकृताः पूर्वं क्षीरपानकाले स्वाहेति मन्त्रेण स्वीकृता, गृहीत लोष्टादिकं मूत्रस्थाने क्षिपेत्। हे लोष्टादिक! पृथिव्या सह त्वं सम्भव, एकीभव॥ यज्ञेशं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शरणं समस्तजगतां ध्यायेम देवास्पदम् ॥१३॥

(अथ चतुर्दशी)

अग्ने त्व ꣳ सुजागृहि वय ꣳ सुमन्दिषीमहि। रक्षाणो अप्रयुच्छन्प्रबुधे नः पुनस्कृधि ॥१४॥

अथ पदच्छेदः—अग्ने —त्वं —सुजागृहि—वयं—सुमन्दिषीमहि—रक्षाणः —अप्रयुच्छन्—प्रबुधे —नः — पुनः — कृधि ॥ अथ मन्त्रार्थ,—अग्ने त्वमित्युक्त्वा स्वपित्यधः प्राग्दक्षिणत इति, अनुष्टुवाग्नेयी। हे प्राणाग्ने त्वं जागृहि, सुष्ठु जागृतो भव, वयं यजमानाः सुमन्दिषीमहि, साधु स्वप्स्यामः, मदि स्तुति मोदमदस्वप्नकांतिगतिषु, अत्र स्वप्नार्थः, किं च नोऽस्मान् रक्ष सर्वतः, किं कुर्वन् अप्रयुच्छन्, युच्छ प्रमादे,अथ माद्यन् रक्षा, इत्यत्र "द्व्यचोऽतस्तिङः,, इति संहितायां दीर्घः, "नश्च धातुस्थोरुषुभ्यः" इति नकारस्य णत्वं", नो अप्रयुच्छन् इत्यत्र "प्रकृत्यान्तः पादमव्यपरे,, इति सूत्रकृत् प्रकृतिभावः, किं च हे प्राणाग्ने नोऽस्मान् पुनः प्रबुधे, प्रबोधार्थं कृधि प्रबुद्धान् कुरु, प्रबुधे इति संपदादित्वाद्भावे क्विप्, यतः स्वपतो जनान् अग्निः प्रबोधयति, अग्निरेव सर्वं विश्वं जागृतं करोति, तदुक्तं तित्तिरिणा — अग्निमेवाधिपं कृत्वा स्वपिति रक्षसामपहत्या,, अग्निर्वै शरणं समस्तजगतां कुर्यात् सदा मङ्गलम् ॥१४॥

(अथ पञ्चदशी)

पुनर्मनः पुनरायुर्म आगन्पुनः प्राणः पुनरात्मा म आगन्पुनश्चक्षुः पुनः श्रोत्रं म आगन्। वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात् ॥१५॥

अथ पदच्छेदः—पुनः—मनः — पुनः—आयुः—ये—आगन् —पुनः —प्राणः —पुनः—आत्मा—मे—आगन्—पुनः —चक्षुः —पुनः—श्रोत्रं—मे —आगन् — वैश्वानरः — अदब्धः—तनूपाः—अग्निः —नः—पातु—दुरितात्—अवद्यात् ॥ अथ मन्त्रार्थः—स्वापात्प्रबुद्धं पुनर्मन इति वाचयति—मे मम यजमानस्य मनः पुनरागन् सुषुप्तिकाले विज्ञानात्मनि गतं पुनरिदानीं शरीरे समागतम्, गमेर्लङि शपि लुप्ते "हल्ङ्याब्भ्यः" इति सूत्रेण प्रत्ययलोपे, मकारस्य नकारे च कृते प्रथमैकवचने आगन् इति रूपं, किं च स्वापकाले मे मदीयमायु र्नष्ट प्रायं भूत्वा पुनरुत्पन्नमिवासीत्, तथा मे प्राणो वायुः पुनरागन् तथा मे आत्मा अहंकृत्यात्मा पुनरागन्, तथा मे श्रोत्रं श्रवणेन्द्रियं पुनरागन्, स्वापकाले मनसा हीन्द्रियाणि विज्ञानात्मनि विलीयन्ते, तेषां पुनर्यथास्थानमागमनं मन्त्रेणानेन प्रार्थ्यते, एवं सर्वेन्द्रियेषु समागतेषु अयमग्निः अवद्यात् निन्दितात् दुरितात् पापात् नोऽस्मान् पातु पालयतु, किं भूतोऽग्नि र्वैश्वानरः सर्वेषां जङ्गमाजङ्गमानां प्राणात्मा हितकारी तथा अदब्धः, अनुपहिंसित-, तथा तनूपाः अस्मदीयशरीरपालकः,, स्वाप काले मनसा सह सर्वेन्द्रियाणि विज्ञानात्मनि एकीभवन्ति, तदानीं प्राणपानौ जागृतौ भवतः, अग्निर्वै शरणं समस्तजगतां कुर्यात्सदा मङ्गलम् ॥१५॥

(अथ षोडशी)

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः। रास्वेयत्सोमाभूयो भर देवो नः सविता वसोर्दाता वस्वदात् ॥१६॥

अथ पदच्छेदः — त्वं-अग्ने—व्रतपा — असि—देव—आ—मर्त्येषु—आ—त्वं—यज्ञेषु-ईड्यः—रास्व—इयत्-सोम-आभूयः —भर—देवः—नः—सविता—वसोः —दाता—वसु —

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अदात् ॥ अथ मन्त्रार्थः—दीक्षितो यदा व्रतविरुद्धं ब्रूते, तदा त्वमग्ने इत्यृचं जपेत्, गायत्र्याग्नेयी वत्सदृष्टा, हे अग्ने त्वं देवे आदेवेषु च मर्त्ये आ मनुष्येषु च मनुष्यपर्यन्तेषु सर्वप्राणिषु व्रतपा असि, व्रतस्य नाम कर्मणः पालकोऽसि, तथा आसमंतात् यज्ञेषु त्वमीड्योऽसि, ईडिरध्येणकर्मा चेति यास्कः, प्राणिभिः याचितव्योऽसि, अतो मां यजमानं पाहीति शेषः, ऋतौ प्राप्तं धनं स्पृष्ट्वा मन्त्रं पठेत् रास्वेति सोमदेवत्यं यजुः, हे सोम ! इयद्रास्व एतावद्धनं देहि भूयः पुनरपि आभर धनमाहर "ह्रग्रहोभः छन्दसि" इति हस्य भत्वं, यतो वसोर्धनस्यदाता सविता देवो नोऽस्मभ्यं वसु अदात् पूर्वमपि धनं दत्तवान् । अग्निर्वै शरणं समस्त जगतां कुर्यात् सदा मङ्गलम् ॥१६॥

(अथ सप्तदशी)

एषा ते शुक्र तनूरेतद्वर्चस्तया संभव भ्राजं गच्छ । जूरसि धृता मनसा जुष्टा विष्णवे ॥१७॥

अथ पदच्छेदः — एषा—ते —शुक्र—तनूः—एतद्—वर्चः—तया=संभव —भ्राजं—गच्छ—जूः—असि—धृता —मनसा —जुष्टा—विष्णवे ॥ अथ मन्त्रार्थः— ध्रुवास्थमाज्यं जुह्वां चतुर्गृहीत्वा तत्राज्ये दर्भतृणबद्धं स्वर्णं क्षिपेत्, एषा ते इति हिरण्याज्यदैवतं, हे शुक्र शुक्ल दीप्यमानाग्ने ते तव एषा तनूः दृश्यमानमाज्यं शरीरम्, एतदाज्ये प्रक्षिप्यमाणं हिरण्यं ते वर्चः त्वदीयं तेजः, तया आज्यरूपया तन्वा संभव एकीभव, ततो भ्राजं गच्छ, हिरण्यगतां दीप्तिं प्राप्नुहि, एतन्मन्त्रपाठेनाग्नेः सतेजस्त्वं सतनूत्वं च संपद्यते, हे वाक् त्वं जूरसि, वेगयुक्ता असि किं भूता त्वं मनसा धृता नियमिता, तथा विष्णवे जुष्टा, यज्ञो वै विष्णुः, यज्ञार्थं प्रीतियुक्ता भवतु,, यज्ञेशः शरणं समस्त जगतां कुर्यात्सदा मङ्गलम् ॥१७॥

(अथाष्टादशी)

तस्यास्ते सत्य सवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा । शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥१८॥

अथ पदच्छेदः—तस्याः — ते —सत्यसवसः—प्रसवे - तन्वः—यन्त्रं—अशीय —स्वाहा—शुक्रं-असि - चन्द्रं--असि—वैश्वदेवं—असि ॥ अथ मन्त्रार्थः—सत्यंसवो यस्याः सा सत्यसवाः तस्याः सत्यसवसोऽवितथानुज्ञायाः तस्याः तथा विधायाः ते तव वाचः प्रसवेऽनुज्ञायां वर्त्तमानोऽहं तन्वः शरीरस्य यन्त्रं नियमनं दार्ढ्यं अशीय प्राप्नुयां, स्वाहा, मया समर्पितं हविरिदं सुहुतमस्तु, जुह्वां बद्धा स्थापितं हिरण्यमुद्धरेत्, शुक्रमसि हिरण्यं देवता, हे हिरण्य त्वं शुक्रमसि, दीप्यमानमसि, तथा चन्द्रमाह्लादिकमसि, तथा अमृतमसि, विनाशरहितमसि, अग्नि संयोगे सत्यपि हिरण्यस्य विनाशाभावः प्रसिद्धः, तथा वैश्वदेवमसि, सर्वदेवरूपोऽसि, अतस्त्वामुद्धरामि, अग्निर्वै शरणं समस्त जगतां कुर्यात् सदा मङ्गलम् ॥१८॥

(अथैकोनविंशी)

चिदसि मनोसि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतःशीर्ष्णी । सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाध्वनस्पात्विन्द्रायाध्यक्षाय ॥१९॥

अथ पदच्छेदः— चित्—असि —मनः—असि—धीः—असि—दक्षिणा —असि- क्षत्रिया—असि—यज्ञिया—असि—अदितिः—असि—उभयतः—शीर्ष्णी—सा—नः—सुप्राची—एधि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मित्रः-त्वा—पदि—बध्नीतां —पूषा —अध्वनः-पातु-इन्द्राय-अध्यक्षाय ॥१९॥

अथ मन्त्रार्थः-वाग्रूपा सोमक्रयणी गौः स्तूयते, हे सोमक्रयणि ! वाग्देवतारूपे त्वं चिदसि, चिद्रूपासि, मनोरूपासि, धीरूपासि, चित्तमनोबुद्धय इति तिस्रः वृत्तयोऽन्तःकरणस्य, वागात्मिका सोमक्रयणी चिन्मनोधीरूपत्वेन प्रशस्यते, हे वाग्देवतारूपे ! सोमक्रयणि ! वाग्दानप्रशास्तत्वेन त्वं दक्षिणासि, सोमक्रयसाधनत्वेन त्वं क्षत्रियासि, देवेषु क्षत्रजात्यभिमानी सोमः तदुक्तं बृहदारण्यके यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमः पर्जन्यो रुद्रो यमो मृत्युरीशान इति तेन सोमेन सह त्वं क्षत्रियासि, तथा यज्ञसंबधित्वात् यज्ञियायज्ञयोग्यासि, अदितिः अदीना देवमातृरूपासि, तथा वाग्रूपत्वा दुभयतः शीर्ष्णी सर्वतो मुखी असि सा पूर्वोक्ता चिदादिरूपा त्वं नोऽस्मदर्थे सुप्राची सुप्रतीची च एधिभव, पूर्वं सोमस्य क्रेतारं प्रति सुष्टु प्राङ् मुखी भूत्वा पश्चात्सोमेन सहास्मान् प्रत्यागन्तुं सुष्टु प्रत्यङ्मुखी भव, किं च मित्रः सूर्यः पदि दक्षिणपादे त्वां बध्नीतां बन्धनं करोतु अप्रणाशाय तव पादयोः बलं दधातु, तथेयं पृथिवी पूषा पृथिवी त्वां अध्वनो मार्गात् पातु, किमर्थं, इन्द्राय इन्द्रप्रीत्यर्थं, कि भूतायेन्द्राय अध्यक्षाय यज्ञस्वामिने । श्री सोमो यजने समस्तयजुषां कुर्यात्स नो मङ्गलम् ॥१९॥

(अथ विंशी)

अनु॑ त्वा मा॒ता म॑न्यता॒ मनु॑ पि॒तानु॒ भ्रा॒ता स॒गर्भ्यो॑ऽनु॒सखा॑ सयू॒थ्यः॑ । सा दे॑वि देव॒मच्छे॒हीन्द्रा॑य॒ सोम॑ꣳ रु॒द्रस्त्वावर्त्तयतु स्व॒स्ति सो॑म॒सखा॑ पुन॒रेहि॑ ॥२०॥

अथ पदच्छेदः—अनु =त्वा —माता—मन्यतां—अनु—पिता—अनु—भ्राता—सगर्भ्यः-सखा—सयूथ्यः—सा—देवि—देवं — अच्छ—इहि—इन्द्राय—सोमं—रुद्रः—त्वा — वर्त्तयतु-स्वस्ति—सोमसखा—पुनः—एहि ॥ अथ मन्त्रार्थः किं सोमहरणे प्रवृत्तां त्वां हे सोमक्रयणि माता त्वदीया जननी अनुमन्यतां अनुज्ञां ददातु, पिता ते अनुमन्यतां एवं उपसर्गवृत्त्या क्रियापदावृत्तिः सगर्भ्यः समाने गर्भे भवः सहोदरो भ्राता त्वदीयोऽनुमन्यतां "समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु" इति समानस्य सादेशः, सयूथ्यः समाने यूथे भवः, सखा वत्सोऽनुमन्यतां, हे देवि सोमक्रयणि ! सा त्वमिन्द्राय इन्द्रार्थं सोमं देवमच्छेहि सोमदेवस्याभि मुख गच्छ, अच्छाभेराप्तुमिति शाकपूणिः, किं च रुद्रस्त्वा वर्त्तयतु, सोमं गृहीत्वा स्थितां त्वां रुद्रो देवोऽस्मान् प्रति निवर्त्तयतु, सोमो देवः सखा यस्याः सा सोमसखा, सोमसहिता सती स्वस्ति क्षेमेन पुनरेहि अत्र यज्ञे भूयोऽप्यागच्छ,, श्री सोमो यजने समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥२०॥

(अथैकविंशी)

वस्व्यस्यदि॑तिरस्यादि॒त्यासि॑ रु॒द्रासि॑ चन्द्रा॒सि॑ । बृह॒स्पति॑स्त्वा सु॒म्ने र॑मणातु रु॒द्रो व॑सु॒भिरा च॑के ॥२१॥

अथ पदच्छेदः—वस्वी—असि —अदितिः-असि-आदित्या-असि-रुद्रा-असि-चन्द्रा-असि—बृहस्पतिः—त्वा —सुम्ने —रमणातु —रुद्रः-वसुभिः—आचके ॥ अथ मन्त्रार्थः—उदीचीं नीयमानामनुगच्छति, वस्व्यसीति अनुष्टुब्बृहती वा, सोमक्रयण्याः स्तुतिः, सोमक्रयणी-गौः वस्वादित्यादित्यरुद्रचन्द्ररूपेण स्तूयते, वस्वादित्यादिपञ्चविशेषणैः,, हे गौः त्वं वस्वी-वसुरूपासि,अदितिदेवमातृरूपासि;द्वादशादित्यरूपासि, रुद्रा एकादशरुद्ररूपासि, चन्द्ररूपासि,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किं च बृहस्पतिः सुम्ने सुखे त्वां रम्णातु संयमयतु, रम्णातिः संयमनकर्मा, विसर्जनकर्मा वा, रुद्रो वसुभिरष्टदेवैः सहितः त्वामाचके त्वां रक्षितुं कामयताम्, चकमान इति कान्तिकर्मसु पठितः, इत्यलम्, गौः स्तुत्या शरणं समस्त जगतां कुर्याच्च नो मङ्गलम् ॥२१॥

(अथ द्वाविंशी)

अदित्यास्त्वा मूर्धन्नाजिघर्मि देवयजने पृथिव्या इडायास्पदमसि घृतवत्स्वाहा। अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वय ꣳ रायस्पोषेण वियौष्म तोतो रायः ॥२२॥

अथ पदच्छेदः—अदित्याः—त्वा—मूर्धन्—आजिघर्मि—देवयजने—पृथिव्याः—इडायाः—पदं—असि—घृतवत्—स्वाहा—अस्मे—रमस्व—अस्मे—ते—बन्धुः—त्वे—रायः—मे—रायः—मा—वयं—रायस्पोषेण—वियौष्म—तोतो—रायः॥ अथ मन्त्रार्थः—षट् पदान्यतीत्य पर्युपविशंति हिरण्यमस्मिन्निधाय अभिजुहोति अदित्यास्त्वेति, आज्यदैवतं यजुः,, हे आज्य अदित्याः अखण्डितायाः पृथिव्याः मूर्धन् मूर्धनि "सुपां सुलुक्" इनि ङिलोपः, शिरोरूपेदेवयजने देवानां यागयोग्यस्थाने त्वामाजिघर्मि, आक्षारयामि, घृक्षरणदीप्त्योः, पृथिव्याः ह्येष मूर्धा यद्देवयजनमिति तित्तिरिः,,हे देवयजनस्थानविशेष! त्वमिडायाः गोः पदमसि, गोपदेनाङ्कितत्वात् तद्रूपमसि, तच्च पदं देवयजनस्थानं गोपदरूपं घृतवत् घृतयुक्तं कर्त्तुं स्वाहा जुहोमि सुहुतं समर्पयामि, स्फ्येन पदं त्रिः परिलिखति, अस्मे रमस्वेति हे गोपदरूपदेव यजनस्थान! त्वमस्मे रमस्व अस्मदादिषु रमस्व क्रीडां कुरु, "समुद्धृत्य पदंस्थाल्यामावपत्यस्मे ते बन्धुरिति" हे गोः सोमक्रयणीपद! ते तव अस्मे नाम वयं बन्धुः बन्धु भूताः स्म, "सुपां सुलुक्" इति जसः शे आदेशः, अस्म इति रूपं यजमानाय पदं प्रयच्छ, त्वे राय इति हे यजमान! त्वे त्वयि रायो धनानि एतत् पदरूपेण तिष्ठन्तु "पशवो रायः" इति श्रुतिः, त्वयि पशवः सन्तु, मे राय इति यजमानः प्रतिगृह्णाति मे मयि यजमाने रायो धनानि गोपदरूपेण तिष्ठन्तु, पशवश्च मयि सन्तु, त्वे मे इति रूपे। मा वयमित्यध्वर्युरात्मानं संस्पृशति, वयमध्वर्व्वादयो रायस्पोषेण धनस्य पुष्ट्या मा वियौष्म वियुक्ताः मा भवाम, हृत्वा पत्न्यै पदं प्रयच्छति तोतः शब्दः कलत्रवाची वा युष्मदुपर्यायोऽव्ययं, कलत्रे रायो धनानि पशवश्च पदरूपेण तिष्ठन्तु, तोतः त्वयि वा रायो पशवश्च पदरूपेण तिष्ठन्तु, इत्यलम् गो पादो यजनेसमस्तयजुषां कुर्यात्स नो मङ्गलम् २२

(अथ त्रयोविंशी)

समख्ये देव्या धिया संदक्षिण्योरुचक्षसा। मा म आयुः प्रमोषीर्मो अहं तव। वीरं विदेय तव देवि संदृशि ॥२३॥

अथ पदच्छेदः—समख्ये—देव्या—धिया—संदक्षिण्या—उरुचक्षसा—मा—मे—आयुः—प्रमोषी—मो—अहं—तव—वीरं—विदेय—तव—देवि—संदृशि॥ अथ मन्त्रार्थः—सोमक्रयण्याः समीक्षयति, समख्ये पत्न्याशीः, आस्तारपंक्तिः, यस्याः आद्यावष्टाक्षरौ पादौ अन्त्यौ द्वादशाक्षरौ, सास्तारपंक्तिः सोमक्रयणी पत्न्याशिषमाशास्ते" हे सोमक्रयणि! देव्या त्वया धिया बुद्धया सह बुद्धिपूर्वकमहं समख्ये नाम इष्ट्या प्रकथने इत्यस्य धातोः सं पूर्वकस्य लुङि तङि "अस्तिवक्तिख्यातिभ्योऽङ्" इति च्लेरङि उत्तमैकवचने कर्मणि समख्ये इति रूपं" किं भूतया त्वया दक्षिण्या योग्यया तथा उरुचक्षसा विस्तीर्णदर्शनया एवं विधा त्वं मे मम पत्न्या आयुः मा प्रमोषी मा खण्डय, मो अहं तव सोमक्रयण्याः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आयुरहं पत्नी मा प्रमोषिषं, मार्थं मोऽव्ययं, अहं तवायुर्न नाशयामि, किं च वीरं विदेय तव देवि संदृशि हे देवि गौः तव संदृशि संदर्शने सति वीरं पुत्रं विदेय नाम लभेय इत्यलम्। गावः कामदुघाः समस्त जगतां कुर्वन्तु नो मंगलम् २३

(अथ चतुर्विंशी)

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामाना ५ साम्राज्यं गच्छेति मे सोमाय ब्रूतादास्माकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वतु ॥२४॥

अथ पदच्छेदः - एषः - ते - गायत्रः— भागः-इति-मे—सोमाय -ब्रूतात् —एषः-ते— त्रैष्टुभः-भागः-इति-मे-सोमाय-ब्रूतात्—एषः-ते-जागतः-भागः-इति—मे-सोमाय—ब्रूतात्—छन्दोनामानां—साम्राज्यं—गच्छ—इति-मे — सोमाय—ब्रूतात्-अस्माकः—असि— शुक्रः—ते ग्रह्यः—विचितः —त्वा — विचिन्वतु ॥ अथ मन्त्रार्थः—मन्त्रचतुष्टयं यजमानः पठेत्, हे अध्वर्यो सोमाय सोमाभिमानिने देवाय मे इति वचो ब्रतात् त्वं ब्रूहि किमर्थं हे सोमदेव ते तव एषः पुरो दृश्यमानो भागो गायत्रो गायत्री सम्बन्धी अंशः तव क्रयो नतु वधार्थमिति यजमानाभिप्रायं सोमदेवाय ब्रूहि, हे अध्वर्यो ! ते तव एषः त्रैष्टुभः त्रिष्टुप्छन्दसः सम्बन्धी भागः इति मे ऽभिप्रायं सोमदेवाय त्वं ब्रूहि, हे अध्वर्यो ! एषः ते तव जागतः जगतीछन्दसः सम्बन्धी भागः इति मेऽभिप्रायं सोमदेवाय त्वं ब्रूहि, हे अध्वर्यो ! छन्दोनामानां साम्राज्यं गच्छ सर्वेषां छन्दसां आधित्यं प्राप्नुहि, इति मे वचः सोम देवाय ब्रूहि यः सोमाय छन्दसामाधिपत्यं दत्वा तं सोमं क्रीणाति, स्वानामाधिपत्यं प्राप्नोति, अत एव तैर्मन्त्रैः सोमस्य राज्यप्राप्तिः सूचिता, गायत्र्यादिछन्दोदेवताः यत्र तिष्ठंति, सच्छन्दोलोकः, तदाधिपत्यं प्रापय्य सोमं क्रीणानः, स्वाधिपत्यभाग्भवतीत्यभिप्रायः, प्राङुपविश्यास्माकोऽसीति सोममालभते, हे सोम त्वं क्रयपथमागतः सन्नास्माकोऽसि, शुक्रः शुक्रसंज्ञः ते तव ग्रह्यः ग्रह्यः एव ग्रहः, शुक्रपदमैन्द्रवाय्वादिग्रहाणामुपलक्षणं, शुक्रादयः सर्वे तव ग्रहाः नाम पात्राणि विचितः विवेकेन चयनस्य कर्त्तारः त्वां विचिन्वन्तु विविक्तं कुर्वन्तु, सारासारविवेकं कृत्वा सारभूतं समूहयन्तु इत्यलम्। सोमो राजमणिः-समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥२४॥

(अथ पञ्चविंशी)

अभि त्यं देव ५ सवितारमोण्योः कविक्रतुमर्चामिसत्यसव ५ रत्नधामभिप्रियं मतिं कविम्। ऊर्ध्वा यस्याऽमतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः। प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजास्त्वमनुप्राणिहि ॥२५॥

अथ पदच्छेदः — अभि —त्यं —देवं— सवितारं—ओण्योः —कविक्रतुं – अर्चामि— सत्यसवं—रत्नधां—अभिप्रियं—मतिं—कविं— ऊर्ध्वा—यस्याः—अमतिः—भाः—अभिद्युतत्— सवीमनी—हिरण्यपाणिः—अभिमीत—सुक्रतुः— कृपा—स्वः—प्रजाभ्यः —त्वा — प्रजाः—त्वा— अनु -- प्राणन्तु —प्रजाः —त्वं —अनुप्राणिहि ॥ अथ मन्त्रार्थः— सोमोपनहनं द्विगुणं चतुर्गुणं वा स्तृणाति, प्राग्दशमुदग्वा तस्मिन् सोमं मिमीते, सावित्र्यृष्टिः, त्यं तं सवितारं देवमभ्यर्चामि, सर्वतः पूजयामि, कीदृशं देवं ओण्योः द्यावा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथिव्योरन्तरावर्त्तमानमिति शेषः, ओण्योरिति द्यावापृथिवीनामसु पठितं, तथा क्रविक्रतुं कविः क्रतुर्यस्य तं मेधाविकर्माणं, तथा सत्यसवं सत्यः सवो यस्य तं सत्यप्रेरणं, तथा रत्नधां रत्नानि दधातीति रत्नधा तं रत्नानां धारकं पोषकं दातारं वा तथा अभिप्रियं सर्वतः प्रीतिविषयं, तथा मतिं मन्यते इति मनिस्तं मननयोग्यं, तथा कविं अतीतानागतवर्त्तमानकालज्ञं, किं च यस्य सवितुर्भा दीप्तिः अमतिः केनापि मातुमशक्या, सती ऊर्ध्वा गगनाभिमुखी, सवीमनि अदिद्युतत् सवः प्रसवः प्रवृत्तिः नक्षत्रादीनां यस्मिन् सः सवीमा, तस्मिन् सवीमनि नाम गगनप्रदेशे सर्वाणि नक्षत्ररूपाणि वस्तूनि द्योतयन्ते, षु प्रसवैश्वर्ययोः "वृस्तृस्तुम्य इमनिच्" इतीमनिच् गुणावदेशौ, सवीमा प्रसवोऽनुज्ञेत्यभिधानं, स स्वरादित्यः, कृपा कल्पनं कृप् तया कृपा कल्पनया सोममभिमीते, एतावान् सोमः इति तदीयं परिमाणं निश्चितज्ञान् इत्यर्थः, किं भूतः स्वः हिरण्यपाणिः हिरण्यं पाणौ यस्य सः सौवर्णाभरणहस्तयुक्तः, सुक्रतुः साधुसंकल्पः, अन्तान् संगृह्योष्णीषेण बध्नाति, प्रजाभ्यस्त्वेति हे सोम प्रजाभ्यः प्रजानां उपकाराय त्वा त्वां बध्नामि उष्णीषेण बद्धस्य सोमस्य श्वासरोधो माऽभूदिति विवरं कुर्यात् इति सूत्रार्थः, हे सोम प्रजास्त्वामनुप्राणंतु, श्वासं कुवन्तं त्वामनुसृत्य सर्वाः प्रजाः श्वासं कुर्वन्तु नाम जीवन्तु, तथा हे सोम अनु श्वासं कुर्वतीः प्रजा अनुसृत्य प्राणिहि श्वासं कुरु, प्रजानां तव च कदाचित् श्वासरोधो माऽभूत्, परस्परमनुसृत्य जीवनं भवत्वित्यभिप्रायेण विवरकरणमित्यर्थः, सूर्ये वै यजने समस्तयजुषां ध्यायेम सोमास्पदं ॥२५॥

(अथ षड्विंशी)

शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणाऽमृतममृतेन । सग्मे ते गौरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम् ॥२६॥

अथ पदच्छेदः,—शुक्रं—त्वा—शुक्रेण—क्रीणामि—चन्द्रं—चन्द्रेण—अमृतं—अमृतेन—सग्मे—ते—गौः—अस्मे—ते—चन्द्राणि—तपसः—तनूः—असि—प्रजापतेः—वर्णः—परमेण—पशुना—क्रीयसे—सहस्रपोषं—पुषेयम् ॥२६॥

अथ मन्त्रार्थः—हिरण्यमालभ्य वाचयति शुक्रं त्वेति, हे सोम शुक्रं दीप्यमानं त्वा त्वां शुक्रेण दीप्यमानेन हिरण्येन क्रीणामि, किं भूतं त्वां चन्द्र आह्लादकरं, किं भूतेन हिरण्येन चन्द्रेण आह्लादकरेण, तथा अमृतं स्वादुत्वेनामृतसमानं तथा अमृतेन विनाशरहितेन क्रीणामि, यो हिरण्यमादाय सोमं विक्रीणीते, तद्धस्ते हिरण्यं दत्वा दत्वा स्वीकुर्यं स्तं निराशं कुर्यात्, हे सोम विक्रयिन् गौः सोममूल्यत्वेन तुभ्यं दत्तासतीसा त्वदीया गौः पुनः प्रत्यावृत्य सग्मे नाम यजमाने तिष्ठतु, हिरण्यमेव तवास्तु, गौर्मा भूदित्यर्थः, गौः ग्मा क्ष्मा क्षा क्षामेत्युक्तेः, ग्मा गौर्भवति, तया सह वर्त्तते इति सग्मः, यजमानः यजमाने प्रत्यर्पितं यद्गोद्रव्यं तत्पुनर्यजमानसहितं सोमविक्रयिणः पुरतो निदध्यात्, हे सोमविक्रयिन् ते चन्द्राणि तुभ्यं दत्तानि यानि हिरण्यानि मा भूवन्नित्यर्थः, अजां प्रत्यङ्मुखीमालभ्य वाचयति, तपसस्तनूरिति अर्धं अजा देवताऽस्य यजुषोऽर्धं सोमः, हे अजे त्वं तपसः पुण्यस्य तनूरसि देहोऽसि, दिविस्थितस्य यज्ञियस्यानयनायाजां गृहीत्वा जगामेति तित्तिरिणा उक्तत्वादजायाः पुण्यशरीरत्वं, किं च हे अजे त्वं प्रजापतेः वर्णोऽसि, वर्णो देहः, यथा प्रजापतिः सर्वदेवताप्रियः एवमजाऽऽपि, एवमजामुक्ता सोमं प्रत्याह हे सोम परमेण पशुना उत्तमेनाजालक्षणेन पशुना त्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रीयसे, क्रीतोऽसि, अतस्त्व प्रसादात्सहस्रपोषं पुत्रपश्वादि सहस्राणां पोषो यथा स्यात्तथा पुषेयं पुष्टोभूयासं। सोमो वै शरणं समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥२६॥

(अथ सप्तविंशी)

मित्रो न एहि सुमित्रध इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम्। स्वान भ्राजाङ्गारे वम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥२७॥

अथ पदच्छेदः—मित्रः—नः—एहि—सुमित्रधः—इन्द्रस्य—उरुं—आविश—दक्षिणं—उशन्—उशन्तं—स्योनः—स्योनं—स्वान—भ्राज—अङ्गारे—वम्भारे—हस्त—सुहस्त—कृशानो—एते—वः—सोमक्रयणाः—तान्—रक्षध्वं—मा—वः—दभन्॥ अथ मन्त्रार्थः—सव्येनाजां प्रयच्छन् मित्रो न इति दक्षिणेन सोममादत्ते, सौम्यं यजुः, हे सोम त्वं नोऽस्मान् प्रति एहि प्रत्यागच्छ, किं भूतस्त्वं मित्रः प्रीतियुतः सखा, यद्वा मित्रः रविरूपः, तथा सुमित्रधः शोभनानि मित्राणि दधातीति पुष्णातीति सुमित्रधः, वासस्या बद्धस्य सोमस्य कौर्यत्वात् तच्छान्त्यर्थं मित्रत्वेन प्रार्थ्यते, तदाह तित्तिरिः, वारुणो वै क्रीत सोम उपनद्धो मित्रो न एहि सुमित्रधः इत्याह शान्त्यै, इति वस्त्रमुपरि स्थाप्य सोमं निदध्यात्, अत्रेन्द्रशब्देन यजमान उच्यते, तथा च श्रुतिः—एष वा अत्रेन्द्रो भवति यद्यजमानः, हे सोम त्वमिन्द्रस्य यजमानस्य दक्षिणमुरुमाविश, दक्षिणे उरौ समीपे विश, किं भूतस्त्वं उशन्, 'वश कान्तौ,वष्टीति उशन् शतृ प्रत्ययांतः, यजमानस्य दक्षिणमुरुमाविश, यजमानस्य दक्षिणमुरुं कामयमानस्तथा स्योनः सुख भूतः, किं भूतमुरुं, उशन्तं सोमं कामयमानं स्योनमुपवेशे सुखकरं, स्वान भ्राजेति जपति, सोमविक्रयिणमीक्षमाणः स्वनतीति स्वानः, भ्राजते शोभते असौ भ्राजः, अङ्गस्य पापस्यारिः अङ्गारिः, बिभर्त्ति पुष्णाति विश्वमितिबम्भारिः हस्तः सर्वदा हृष्टरूपः,शोभनौ हस्तौ यस्य स सुहस्तः, कृशं दुर्बलं अनिति जीवयति इति कृशानुः, स्वानादयः सप्त सोमरक्षकाः देवविशेषाः, हे स्वानादयः सप्तदेवाः। वो युष्माकमेते सोमक्रयणाः सोमं क्रेतुमानीताः हिरण्यादि पदार्थाः पुरतः स्थापिताः, तान् पदार्थान् यूयं रक्षध्वम्, वो युष्मान् मा दभन्, वैरिणो यज्ञविघ्नकारिणः मा हिंसिषत। स्वानादयो धिष्ण्याधिष्ठातारः सोमरक्षकाः, ते चामुष्मिं लोके सोममरक्षन् इत्यलम्। सोमो वै शरणं समस्त यजुषां कुर्यात् स नो मङ्गलम् ॥२७॥

(अथाष्टाविंशी)

परिं माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज। उदायुषा स्वायुषोदस्थाममृताँ अनु ॥२८॥

अथ पदच्छेदः— परि — मा—अग्ने—दुश्चरितात्—बाधस्व—आ—मा—सुचरिते—भज - उदायुषा—स्वायुषा—उदस्थां—अमृतान्—अनु॥ अथ मन्त्रार्थः—गृहीत सोमं परि मग्ना इति वाचयति, अग्निदेवत्यापुरस्ताद्बृहती, यस्या आद्यो द्वादशक्षरस्त्रयोऽष्टाक्षराः पादाः सा पुरस्ताद्बृहती, हे अग्ने दुश्चरितात् पापान्मा मां परिबाधस्व परितो निवारय, मे पापे प्रवृत्तिर्मा भूत, सुचरिते शोभने चरिते सदाचाररूपे पुण्ये मा मां यजमानं आभज सर्वतो भज स्थापय, उदायुषा उत्कृष्टेन चिरजीवनलक्षणेनायुषा निमित्तेन तथा स्वायुषा यागदानादिना शोभनेनायुषा निमित्तभूतेन, अमृताननु सोमादिदेवाननुसृत्य उदस्थामहमुत्थितवानस्मि, इत्यलम् अग्निर्वै यजने समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥२८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(अथैकोनात्रिंशी)

प्रतिपन्थामपद्महि स्वस्तिगामनेहसम् ।
येन त्रिश्वाः परि द्विषो वृणक्ति विन्दते वसु॥२९

अथ पदच्छेदः—प्रति—पन्थां—अपद्महि—स्वस्तिगां—अनेहसं—येन—विश्वाः—परि—द्विषः—वृणक्ति—विन्दते—वसु॥ अथ मन्त्रार्थः—शीर्ष्णि सोमं कृत्वा पाणिमन्तर्धाय प्रतिपन्थामित्यनोऽभ्येति शकटमभिलक्ष्य गच्छतीत्यर्थः, अनुष्टुप्पथिदेवत्या, पन्थानं स्तौति, पन्थां पन्थानं स्तौति, पन्थां पन्थानं मार्गं वयं प्रत्यपद्महि, प्राप्ताः अभूम, 'पद गतौ, इत्यस्य व्यत्येन शपि लुप्ते लङि रूपम्, विभक्तेः पूर्वं सवर्णे पन्थामिति रूपं, किं भूतं पन्थानं स्वस्तिगां, स्वस्ति क्षेमेण गन्तुं योग्यं, गमेर्विटि प्रत्यये "विड्वनोरनुनासिकस्यात्" इति मकारस्याकारादेशे रूपं, तथा अनेहसं चौरादिबाधारहितं, येन यथा मार्गेण पुरुषो गच्छन् सन् विश्वाः विश्वान् सर्वान् द्विषो द्वेषिणः शत्रून् परिवृणक्ति, परितो वर्जयति, वसु च विन्दते, धनं च लभते अस्मिन् संसारे ईदृशं पन्थानं मार्गं वयं प्रत्यपद्महि प्राप्ताः स्याम—पन्था वै शरणं समस्त जगतां कुर्यात् स नो मङ्गलम् ॥२९॥

(अथ त्रिंशी)

अदित्यास्त्वगस्यदित्यै सद आसीद ।
अस्तभ्नाद्द्यां वृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः । आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥३०॥

अथ पदच्छेदः — अदित्याः — त्वग्—असि—अदित्यै—सदः—आसीद—अस्तभ्नात्—द्याम्—वृषभः—अन्तरिक्षं—अमिमीत—वरिमाणं—पृथिव्याः—आसीदत्—विश्वा—भुवनानि—सम्राट्—विश्वा—इत्—तानि—वरुणस्य—व्रतानि ॥ अथ मन्त्रार्थः—कृष्णोर्णासनमस्मिन् शकटे आस्तृणाति, अदित्यास्त्वगिति„ हे कृष्णासन् ! त्वमदित्यास्त्वगसि अखण्डितायाः कृष्णवर्णायाः पृथिव्याः कृष्णवर्णं त्वगूरूपमसि, तदुपरि सोमं निदधाति, हे सोम त्वमदित्यै अदितेः भूमेः सम्बन्धिस्थानमासीद सर्वतः प्राप्नुहि, हे वरुण देवते त्रिष्टुभौ, क्रीतसोमस्यवरुणदेवतत्वात् वरुणो परब्रह्मरूपेण स्तूयते, वृषभः सर्वकामप्रवर्षकः वरुणोद्यामस्तभ्नात्, द्युलोको यथा न पतेत् तथा स्तम्भितवान्, तथान्तरिक्षलोकमपि अस्तभ्नात् तथा पृथिव्याः वरिमाणं भूमेरुरुत्वममिमीत मिमीते, एतावती भूरिति विस्तारपरिमाणं जानाति, तथा सम्राट् सम्यक् राजमानो वरुणो विश्वा विश्वानि सर्वाणि भुवनानि आसीदत् व्याप्तवान्, विश्वा विश्वानि, इत एवार्थे, सर्वाण्येव व्रतानि द्युलोकस्तम्भनादीनि कर्माणि वरुणस्य, इत्यलम् —द्युलोकमन्तरिक्षं च पृथिवीं च स्वरूपतः । अस्माभिः स्वगणैः पूर्वं जगत्सर्वं च निर्ममे ॥ विज्ञातो यस्तु भूतानां तं वरुणमुपास्महे ॥३०॥

(अथैकत्रिंशी)

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु । हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥३१॥

अथ पदच्छेदः—वनेषु—वि—अन्तरिक्षं—ततान—वाजम्—अर्वत्सु—पयः—उस्रियासु—हृत्सु—क्रतं—वरुणः—विक्षु—अग्निं—दिवि—सूर्यं—अदधात्—सोमं—अद्रौ ॥ अथ मन्त्रार्थः—बन्धनहेतुना वस्त्रेण परितो वेष्टयित्वा सोमं जपति वनेषु व्यन्तरिक्षमिति, वरुणो वनेषु वनगत वृक्षाग्रेषु अन्तरिक्षमाकाशं विततान, तत्र वृक्षवर्धनाय सर्वतोऽन्तरिक्षं विस्तारितवान्, "वीर्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वै वाजः पुमा ꣳ सोऽर्वन्तः" इति श्रुतेः, तथा अर्वत्सु पुरुषेषु वाजं वीर्यं वितनान, यद्वा अर्वत्सु अश्वेषु वाजं बलं वितनान, तथा उस्रियासु पयः क्षीरं वितनान, उस्रिया शब्दो गोनामसु पठितः, तथा हृत्सु सर्वप्राणिहृदयेषु क्रतुं सङ्कल्पं तच्छक्तियुतं मनो वितनान, तथा विक्षु प्रजासु अग्निं जठराग्निं वितनान, तथा दिवि द्युलोके सूर्यं वितनान, तथा अद्रौ पर्वते सोमं वल्लीरूपमदधात् स्थापितवान्, पर्वतपाषाणसंधिषु सोमवल्लीसंजायते जलजमनी पाठा वा नामतो लोकप्रसिद्धा वै सोम वल्ली, य एवं मन्त्रद्वयोक्त द्युलोकस्तम्भनादिसामर्थ्यवान् परब्रह्मलक्षणो वरुणः तं वयं स्तुमः इति शेषः राजा वै वरुणः समस्तजगतां कुर्यात् स नो मङ्गलम् ॥३१

(अथ द्वात्रिंशी)

सूर्यस्य चक्षुरारोहाऽग्नेरक्ष्णः कनीनकम् ।
यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥२२॥

अथ पदच्छेदः—सूर्यस्य—चक्षुः—आरोह—अग्नेः—अक्ष्णः—कनीनकम्—यत्र—एतशेभिः—ईयसे—भ्राजमानः—विपश्चिता ॥ अथ मन्त्रार्थः—कृष्णोर्णासनं सोमस्य चिह्नं करोति, सूर्यस्य चक्षुरिति, कृष्णाजिनदेवत्याऽऽनुष्टुप् हे कृष्णाजिन! त्वं सूर्यस्य चक्षुर्नेत्रमारोह, तथा अग्नेः वह्नेरक्षणो नेत्रस्य कनीनकं तारकां चारोह तथोच्चैस्तरां भव, यथैताभ्यां दृश्यसे, यत्र यस्मिन्नेतयोर्दर्शने विपश्चिता विदुषा सर्वज्ञेन सूर्येणाग्निना च भ्राजमानो दीप्यमानः सन्नेतशेभिः एतशैरश्वैः त्वमीयसे, एतश इति अश्वनामसु पठितं, एतशैरिति कर्त्तरितृतीया यत्राश्वैस्त्वं नीयसे इत्यर्थः, सूर्याग्निदृष्टि विषयत्वे सती मार्गो सर्वविघ्नरहितो भवति, पन्था वै शरणं समस्त जगतां सूर्याग्निदृष्टो यदा ॥३२॥

(अथ त्रयस्त्रिंशी)

उस्रावेतं धूर्षाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ । स्वस्ति यजमानस्य गृहान्गच्छतम् ॥३३॥

अथ पदच्छेदः—उस्रौ—एतं—धूर्षाहौ—युज्येथां—अनश्रू—अवीरहणौ—ब्रह्मचोदनौ—स्वस्ति—यजमानस्य—गृहान्—गच्छतं ॥ अथ मन्त्रार्थः— अनड्वाहौ युनक्ति उस्रावेतमिति, आनडुही ऊर्ध्ववृहती, यस्यास्रयः पादाः द्वादशाक्षरा सोर्ध्ववृहती, हे उस्रौ अनड्वाहौ युवामेतमागच्छतम्, एत्य च स्वयं रथे युज्येथां, किंभूतौ युवां धूर्षाहौ, शकटधुरं वोढुं समर्थौ, तथा अनश्रू सोढारौ, तथा अवीरहणौ शृङ्गादिभिः शिशूनाहननमकुर्वाणौ, तथा ब्रह्मचोदनौ ब्राह्मणानां यज्ञं प्रति प्रेरकौ, एवं सम्बोध्य प्रयोजनमाह, तथा विधौ युवां यजमानस्य गृहान् प्रतिगच्छतम्, इत्यलम्—यज्ञेशं शरणं समस्तयजुषां ध्यायेम देवास्पदं ॥३३॥

(अथ चतुस्त्रिंशी)

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि । मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन् ॥ श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तन्नौ ꣳ स्कृतम् ॥३४॥

अथ पदच्छेदः—भद्रः—मे—असि—प्रच्यवस्व—भुवस्पते—विश्वानि—अभि—धामानि—मा—त्वा—परिपरिणः—विदन्—मा—त्वा—परिपन्थिनः—विदन्—मा—त्वा—वृकाः—अघायवः—विदन्—श्येनः—भूत्वा—परापत—यजमानस्य—गृहान्—गच्छ—तत्—नौ—संस्कृतम् । अथ मन्त्रार्थः—भद्रो मे इति वाचयति सौम्यं यजुः, हे सोम मे मह्यं यजमानाय मदुपकारार्थं त्वं भद्रोऽसि कल्याणरूपोऽसि भद्रि कल्याणे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भद्र इति, हे भुवः पते ! भू शब्देन भूमौ स्थितानि यजमानाध्वर्यु प्रभृतीनि लक्ष्यन्ते, तेषां भूतानां पालकत्वाद् पतिः सोमः, "तदाह तित्तिरिः प्रच्यवस्व भुवस्पत इत्याह भूताना ह्येषः पतिः इति" तथा विध हे सोम ! विश्वानि सर्वाणि धामानि स्थानानि पत्नीशालाहविर्धानप्रभृतीनि आलक्ष्य त्वं प्रच्यवस्व प्रकर्षेण गच्छ, च्युङ्गतौ इति, प्रच्यव्यमानं त्वा त्वां परिपरिणो मा विदन् मा जानन्तु, परिपरिणः तस्करविशेषाः तथा परिपन्थिनो यागस्य प्रतिषेधकाः नास्तिकाः त्वां मा विदन् मा जानन्तु, "छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि निपातावेतौ, तथा वृका विकर्त्तनशीलाः आरण्यश्वानो दुर्जना वा त्वा त्वां मा विदन् जानन्तु, किं भूताः वृकाः अघायवः परस्याघं कर्त्तुमिच्छन्तीति अघायवः, "सुप आत्मनः क्यच्" इति क्यचि "अश्वाघस्यात्" इत्याकारः, "क्याच्छन्दसीति क्यजन्तादु प्रत्ययः, किं च श्येनो भूत्वा श्येनाख्यपक्षिवच्छीघ्रगामी भुत्वा परापत उत्पत, यजमानस्य गृहान् गच्छ, तत् तत्र यजमानगृहेषु नौ आवयोः तव च मम च संस्कृतम् सर्वोपकरणयुक्तं स्थानं भवतीति शेषः । सोमं वै शरणं समस्तयजुषां ध्यायेम देवास्पदम् ॥

(अथ पञ्चात्रिंशी)

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत । दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥३५॥

अथ पदच्छेदः—नमः—मित्रस्य —वरुणस्य—चक्षसे—महः—देवाय—तत्—ऋतं—सपर्यत—दूरेदृशे—देवजाताय—केतवे—दिवः—पुत्राय—सूर्याय—शंसत ॥ अथ मन्त्रार्थः —वाचयति नमो मित्रस्येति, सौरी जगती सूर्यदृष्टा, द्वादशाक्षर चतुः पादा जगती, अत्र मन्त्रे सूर्यरूपेण सोमः स्तूयते, एवं विधाय सूर्याय नमः मम नमस्कारोऽस्तु, किं भूताय सूर्याय मित्रस्य वरुणस्य "चतुर्थ्यं षष्ठी" मित्राय वरुणाय मित्रवरुणदेवतारूपेण सर्व जगतां चक्षसे द्रष्ट्रे मित्रदृष्ट्या निष्कामभक्तान् पश्यति तेभ्यः कैवल्यपदं ददाति, वरुणदृष्ट्या सकामभक्तान् पश्यति तेभ्यः कर्मफलं ददाति, रुद्रदृष्ट्या पापिष्ठान् जनान् पश्यति तेभ्यः पापफलं ददाति, अत एव त्र्यम्बक इति वेदप्रसिद्धः, तथा महो नाम महसे तेजोरूपाय "सुपां सुलुक्" इतिविभक्तिलोपः, तथा देवाय द्योतमानाय तथा दूरेदृशे दूरे वर्त्तमानैः प्राणिभिर्दृश्यते इति दूरेदृक् तस्मै- तथा देवजाताय देवात् परमात्मनो जायते इति तस्मै "वाहिताग्न्यादिषु" इति जातशब्दस्य परनिपातः, तथा केतवे प्रज्ञारूपाय विज्ञानघनाय, केतुरिति प्रज्ञा नाम, तथा दिवस्पुत्राय द्युलोकस्य पुत्रवत् वर्त्तमानाय, एवं विधाय सूर्याय तत् ऋतं सत्यं, अवश्यफलप्रदज्योतिष्टोमरूपं कर्म, हे ऋत्विजः ! यूयं सपर्यत यागानुष्ठानेन सपर्यां कुरुत, ऋतं सत्यं परब्रह्मरूपं वा किं च शंसतु, शंसु स्तुतौ, सूर्यप्रीत्यर्थं यूयं स्तुतिं कुरुत, शस्त्राणि पठत इत्यलम् । सूर्यः कर्मफलप्रदानकुशलः कुर्यात्स नो मङ्गलम् ॥३५॥

(अथ षट्त्रिंशी)

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ३६।

अथ पदच्छेदः—वरुणस्य—उत्तम्भनं—असि—वरुणस्य—स्कम्भसर्जनी—स्थः—वरुणस्य—ऋतसदनी—असि—वरुणस्य—ऋतसदनं—असि—वरुणस्य—ऋतसदनं—आसीद ॥ अथ मन्त्रार्थः—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समीपेऽन उपस्थाप्योत्तम्भनेनोपस्तभ्नाति, वरुणस्योत्तम्भनमसि इति, पञ्च यजूंषि वारुणानि, हे काष्ट त्वं वरुणस्य नाम वस्त्रबद्धस्य सोमस्य उत्तम्भनमसि, उत्तभ्यते शकटमुखाग्रं उन्नतत्वेन स्थाप्यते यस्मिन् काष्टे तत्काष्टमुत्तम्भनं, शकटयुगे बद्धयोर्बलीवर्दयोर्गलबहिर्भागे काष्टनिर्मिते शम्ये स्थाप्येते, ताभ्यां वृषयोरितस्ततो गमनं निवार्यते, ततस्ते स्कम्भसर्जनी शब्देनोच्येते, हे शम्ये युवां वरुणस्य वस्त्रबद्धस्य सोमस्य स्कम्भसर्जनी स्थः, शम्ये भवथः, स्कम्भ रोधने, सर्ज अर्जने, स्कम्भनं रोधः सः सर्ज्यते क्रियते याभ्यां ते स्कम्भसर्जन्यौ, विभक्तेः पूर्वसवर्णः, वरुणशब्देनात्र वस्त्रबद्धः सोमः उच्यते, पञ्चस्वपि मन्त्रेषु, औदुम्बरीमासन्दीं प्रत्याह, उदुम्बरनिर्मिता पीठिका भवति सा आसन्दी प्रोच्यते, हे आसन्दि ! त्वं वरुणस्य वस्त्रबद्धस्य सोमस्य संबंधिनी ऋतसदन्यसि, ऋतं यज्ञस्तन्निष्पत्त्यर्थं उपवेशनस्थानभूतासि, कृष्णोणासनमस्यामास्तृणोति, हे कृष्णोणासन ! त्वं वरुणस्य वस्त्रबद्धस्य सोमस्य ऋतसदनं यज्ञार्थमुपवेशनस्थानभूतमासन्दी संस्थितं कृष्णोर्णासनमासीद सुखे, नोपविश ॥

सोमो वै शरणं समस्तयजुषां कुर्यात् स नो मङ्गलम् ॥३६॥

(अथ सप्तत्रिंशी)

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥३७॥

अथ पदच्छेदः—या—ते —धामानि—हविषा—यजन्ति—ता—ते—विश्वा—परिभूः—अस्तु—यज्ञम्—गयस्फानः—प्रतरणः—सुवीरः—अवीरहा —प्रचरा — सोम — दुर्यान् ॥ अथ मन्त्रार्थः—या त इति वाचयति सोमदेवत्या, त्रिष्टुप् गोतमदृष्टा., हे सोम ऋत्विजस्ते तव यां यानि धामानि प्रातःसवनादीनि स्थानानि प्राप्य हविषा त्वदीयरसरूपेण यजन्ति यज्ञमभिलक्ष्य यागं कुर्वन्ति, ते तव ता तानि विश्वा विश्वानि सर्वाणि स्थानानि परिभूरस्तु, भू प्राप्तौ, परितो भवति प्राप्नोति, परिभूः नाम भवान् परितः प्राप्तवान् भवतु, ऋत्विजो येषु स्थानेषु यागं कुर्वन्ति, तानि स्थानानि त्वं प्राप्नुहि, किं च हे सोम ! त्वमस्मदीयान् दुर्यान् यज्ञगृहान् प्रचर प्राप्नुहि, दुर्या इति गृहनाम, "द्व्यचोऽतस्तिङः" इति संहितायां प्रचरेति दीर्घः, किं भूतस्त्वं गयस्फानः यज्ञगृहाभिवर्द्धकः गयस्फानः गय इति गृहनाम "स्फायी वृद्धौ" गयान् स्फाययतीति, तथा प्रतरणः प्रतारयति जन्म मरण दुःखं निवारयतीति प्रतरणः, तथा सुवीरः शोभनास्त्वत् प्रसादलब्धा वीरा अस्मत्पुत्रपौत्राः यस्य तव स त्वं सुवीरः, तथा अवीरहा न वीरान् हन्तीति अवीरहा वीराणां परिपालकः, इत्यर्थः,

सोमं वै सदनं समस्तयजुषां ध्यायेम देवास्पदम् ॥३७॥

मया गोकुलचन्द्रेण पिण्डोरीधामवासिना ।
शालागाद्वाचनान्तश्चतुर्थोऽध्याय ईरितः ॥४॥

शं भवतु

इति माध्यन्दिनीयानां वाजसनेयिसंहितायां चतुर्थोऽध्यायः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh